NATIONAL LIBRARY, CALCUTTA

Class No. 180. Ec.

Book No. 87. 7.

N. L. 38.

MGIPC—S1—19 LNL/62—27-3-63—100,000.

NATIONAL LIBRARY

CALCUTTA.

This book was taken from the Library on the date last stamped. A late fee of 6 nP. will be charged for each day the book is kept beyond a month.

N. L. 44.

MGIPC—S1—37 LNL/60—12-1-62—50,000.

माधवनिदानम् ।

श्रीमाधवकरेण संग्रहीतम् ।

वैद्यमहामहोपाध्याय श्रीविजयरक्षित

श्रीकण्ठदत्तकृतौ व्याख्यामधुकोषाख्य समेतम् ।

शान्तिपुर निवासिना

श्रीकालिदास वैद्यरत्न कृत

व्याख्यामधुकोषपञ्जिकायां समेतं

तेनैव संस्कृतम् ।

॥ प्रथमोखण्डः ॥

कलिकातानगरे

श्रीयुतबाबुभुवनचन्द्रवसाक संस्थापित

संवादज्ञानरत्नाकर यन्त्रालये

तद्द्वारैव मुद्रितश्च प्रकाशितोऽभूत्

१७[illegible] शकाब्दे ।

[निमतल्ला घाटष्ट्रीट् ८ संख्यक भवन ।]

माधवनिदाने

BENGAL LIBRARY 1880 CALCUTTA

मङ्गलाचरणम्।

प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणम्।
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम्॥१॥

[1]शशिरुचिरचराईव्यक्तकान्तेदेवो दिशतु [illegible] घना घनाभः पद्मनाभः श्रियं वः। त्रिदशभरिदशोत्तोतका

अल्पेयं क्रियते व्याख्या मधुकोशस्य पञ्जिका।
वैद्यानां कान्तिदा चेयं प्रज्ञाकान्तिविवर्द्धिका॥
रक्षितेनेह यस्यार्थो नोक्तः सुगमबुद्धितः।
क्रियावान्यविधां नूनं तस्यार्थः कथ्यते मया॥
अतिपटिमविरहान्नितोऽन्वान्नितो वा,
यदिह वचनमुक्तं युक्तियुक्तातियुक्तम्॥
तदपि सदभावाद् बान्धवः साधुरत्र,
विदधतु निजभावान्मतिः साधु साधु॥

निर्विघ्नव्याख्यानविधानाय ग्रन्थादौ ग्रन्थकृत् मङ्गलाचरणमनुपक्षमति।

(१) शशिरुचिरेत्यादि। पद्मनाभः श्रीकृष्णः पोद्युक्तः श्रियं धनसंपत्कामक्ष्यप्रवर्णसम्पत्तिं श्रीः त्रिवर्गसम्पद्विभूतिरिति व्याडिः। दिशतु ददातु दिशत्विति दिशोऽयोपदलक्षणं लोप इति दर्षिर्तसमवाय न रत्नस्त्वात्विरूपं भावनानेकार्थत्वात् दानमात्रापनयेति

वारिजाक्षस्याभिभवमिव नाभौ वारिजं यस्य रेजे ॥

कविकल्पद्रुमटीकायां दुर्गादासः। दिश अति सर्जने। अतिसर्जनं दानमिति पाणिनिः। पद्मनाभदत्तेन श्रीकृष्णस्य सर्वजगज्जनक-पद्मजन्मनोऽजनकत्वं सूचितम्। कीदृशः अचिरविरहहरार्द्धव्यक्तकान्तार्द्ध-देहः अचिरविरहो मनोहरः अचिरविरहः शाकपार्थिवादित्वा-दिव शब्दस्य लोपः यथा भौ हरश्चेति अचिरविरह हरस्तस्यार्द्धं अचि-रविरहहरार्द्धं तस्मिन् व्यक्तकान्तमिवलक्षितं व्यक्तकान्तः देहस्यार्द्धम् अर्द्धदेहः श्रीवार्द्धतर्यं द्वितीयेत्यादि सूत्रात् पूर्वनिपातः। अचि-रविरहहरार्द्धे व्यक्तकान्तः प्रकाशित मिलितोऽर्द्धदेहो यस्य तथा। अनेन पद्मनाभस्य हरिहर मूर्त्तित्वं सूचितम्। तथाच वामनपुराणे सार्द्धं द्विनेत्रं कमलाक्षि कुण्डलमित्यादि। पुनः कीदृशः घनघनाघनः घनोऽसिधः घनोऽद्यः घनश्च घनश्चौ घनघनौ तत्र शब्दमत्वेनैक-शेष समासेऽपि घनाम इतिपदेन विपक्षितार्थयोर्मार्थयोरक्तु-क्तैर्नैकशेषः। उक्तं पाद्मेरत्वमुक्तत्वमात्सस्य रत्नप्रभाटीकायां युक्त-दत्त्वद् घनाघनयोःरव्योरिताव एकशेषा इत्याद्विरेकर्णवं विवक्षितविरोधा सूक्तेरिति। अनुत्तमुक्तमरः घनोऽम्बुदइति हारावलिस्थूदः। तयोर्द्वारेव आभाकान्तिर्यस्य सः मध्यपदलोपिसमासः इनूदात् पर भूयभावः शब्दः प्रत्येकमभिसम्बध्यते इति न्यायादाभाशब्दस्य प्रत्येकसम्बन्धात् नीलशुभ्रवर्णत्वं सूचितम्। त्रिदशानां देवानां सरि-न्नदी त्रिदशसरिद्गङ्गा तयोत एकाकीयोम आमयोयस्य सः यदीत योतः सूर्यस्तस्यात्मजा यमुना भागीरथीतनया यमुना त्रिदशसरित् यमीतचोतजायते त्रिदशसरिद्गीतद्योतजे तयोर्वारिणी तन्मध्ये तस्मिन् वा अभिरावर्त्तलक्षण तत्पनिर्यस्य तदिव वारिजं पद्मं यस्य नाभौ रेजे शुशुभे राजदीप्तेः। अथवा उत्तरपदे यत् शब्दस्य तत्-शब्दोऽनामिथ्यते। अनुतोपमालङ्कारोऽयम्। इतशब्दस्य पूर्ववर्त्तित्वाद-लोपोऽयमिति केचित्। अत्र मालिनीवृत्तं तल्लक्षणन्तु न न म य य युतेयं मालिनीभोगिलोकैः। येषां मतं विविच्य यत्नं विलोड् ग्रन्थकारो पत्यारभ्मतामुद्दिशति महादेवादि

[१]भट्टारजेन्द्रगदाधरचाप्यचन्द्र श्रीचक्रपाणिपकुलेश्वरसेन भव्यैः । ईशानकार्त्तिकसुकीरसुधीरवैद्यैर्मैथमाधव- मुख्यै र्लिखितं विचिन्त्य । तन्मान्तराण्यपि विलोक्य ममैष यत्नः सद्भिर्विधेय इह दोषविधौ समाधिः । मन्दोऽर- सर्व्वविदुरै र्विहितेऽपनामग्रन्थेऽस्ति दोषविरहः सुचिर- न्तनेऽपि । [२]तत्तद्ग्रन्थतरुभ्यो व्याख्याकुसुमरसलेशमाहृत्य भ्रमरेणेव मयायं व्याख्यामधुकोष आरब्धः । उपयुक्त-

---

(२) भट्टारकजेन्द्रस्य गदाधरस्य चाप्यचन्द्रस्य श्रीचक्रपाणिस्य मङ्ग- लस्य ऐश्वरसेनस्य तदाभव्यादिति तैरत्न अवदेवकमिटिव्याडितत् विशेषणस्याविपरवर्त्तितम् । भव्यं योग्यमितिमेदिनी । सुधीराश्च ते वैद्याश्चेति सुधीरवैद्या ईशानस्य कार्त्तिकस्य सुकीरस्य तदा सुधीर वैद्याश्चेतितैः । मैत्रेयस्य माधवस्य तौ मैत्रेयमाधवौ तावेव मुख्यौ येषां तैः । एतैर्लिखितं विचिन्त्य विभाव्य तन्मान्तराण्यपि विलोक्य दृष्ट्वा मम एष यत्न विषदकोपनः प्रयासः । ग्रन्थस्य- यस्य समानकर्त्तृकत्वनियमात् अवस्थित इति पदमध्याहार्य्यम् । इह यत्ने दोषविधौ असंबन्धसहते सद्भिः साधुभिः समाधिः समाधानं विधेयः करणीयइत्यर्थः । अथवा समाधिर्दृढैकाग्रता चित्तै- कावलम्बनता इति यावत् विशेषदस्यमेन परिज्ञातमुद्भिर्दवत मनः संयोगेनैवास्य दोषाभावो दृष्टव्य इतिध्वनिः । अनर्थ विदुरैरसर्व्व- ज्ञैर्मैत्रेयैः सुचिरन्तनेऽपि विहिते चिरकालं व्यावरचितेऽपि ग्रन्थे नामस्व्याचनावां क कुत्र दोषविरहो दोषाभावोऽस्ति अपितु मनुष्य प्रणीत ग्रन्थे सर्व्वत्रैव दोषसद्भावोऽस्तीति आकाङ्क्षाते । युक्तम् । अत्र पञ्चमाणिज्यर्थ इयं तद्भवान् धीयं वसन्ततिलक वृत्तम् अग्रीयः । तैयावत् प्रशस्तं ग्रन्थस्य नामनिर्दिशति ॥

(३) तत्तद्ग्रन्थेति । तत्तद्ग्रन्थतरुभ्यो भट्टारादिकृत ग्रन्थ महीरु- हेभ्यो व्याख्याकुसुमरसं कुसुमरसं मकरन्दं तल्लेशं बिन्दुम् आहृत्यसंस्थाप्य भ्रमरेणेव भ्रमरकल्पेन मया व्याख्यारूप मधुकोषो व्याख्यामधुकोषो

भिषगुक्तं निदानं माधवेन यत्। तद्व्याख्याप्रसङ्गेन मया तदपि लिख्यते। ⁸अथ प्रथित सर्व्वायुर्व्वेदबोध

व्याख्यामधुकम आरब्धः। यथा भ्रमरो विविध कुसुमरसमाहृत्य मधुकमं निर्म्मितं प्रवर्त्ततेतथाऽहमित्यभिप्रायः। मधुकस्तु मक्षिकादि कीटभेदेन बहुविधः तदुक्तं भावप्रकाशे माक्षिकं भ्रामरं क्षौद्रं पौत्ति-कम्मात्मकमिति। आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः। तत्र तैलवर्णाभि यथा मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः। ताभिः कृतं तैलवर्णं माक्षिकं तत्प्रचक्षते। किञ्चित् सूक्ष्माः प्रसि-द्धास्तु कुसुमेभ्योऽभिनिर्म्मितम्। निर्म्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम्। मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु। मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलम्भवेत्। याः कृष्णा मशकोपमा लघुतराः प्रायो महापिच्छका वृक्षाणां तद्कोटराभ्यन्तरगताः पुत्ता-वयं कुर्व्वते। तास्तानुद्दिश्य पुत्तिका निगदितास्ताभिः कृतं सर्पिराभ-तुल्यं यत्सवृत्तद्वेषर[illegible]ः संकीर्त्तितं पौत्तिकम्। वरटाः कपिलाः पीताः प्रायो हिमवद्वने। कुर्वन्ति वल्मीकाकारं तज्जातं मधु कथ्यते। तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः। वल्मीकास्तत्कृतं यत्तदार्घ्यमित्यभिधीयते। प्रायो वल्मीकमध्यस्थाः कपि-लाः स्वल्पकीटकाः। कुर्वन्ति कपिलं स्वल्पं तत्स्यात् औद्दालकं मधु। संशुद्धपतितं पुष्पं यत्तु भक्तौ परिस्रुतम्। मधुरं कुसुमत्वाच्च तद्दालं मधु कीर्त्तितमिति मधुकाद्युक्तम्। मधुकमनुकरोमः। आरब्ध इत्यत्र आविभिर्भूततादिर्दर्मादुक्तीति क्तः। रूपकमुपमानमलङ्कारः। वृत्तम-र्य्या। अनुष्टुबादि। इत्यष्टौ वृत्तम् अपत्योऽभिनिदानं माधवेनानुक्तं यद्यदनुक्तं तदपि [illegible] अभिधारि कुर्वन्नरोगादि मया [illegible] व्याख्यायाः प्रसङ्गेन प्रस्तावेन [illegible] लिख्यते। इत्यपि पद्यम्।

(४) अथ प्रथितेति। आयुर्वेदस्य निरुक्तिमाह अनेनपुरुषो यस्मा-दायुर्विन्दति वेत्ति च। तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः। [illegible]आयुर्वेदस्य विषयकथनेन निर्णीता [illegible] सुश्रुतस्य [illegible] माधव-

विशुद्धबुद्धि र्माधवकरो विकारनिकरहेत्वादितत्त्वबुभुत्सो-त्सुकचिकित्सकजनानुजिघृक्षया विविक्ततन्त्रसन्दर्भरूपं तत्प्रत्यूहव्यूहव्यपोहहेतुं परमात्मानमजरममरमप्रतिमाभं स्वेष्टदेवताप्रणामं प्राक् प्रायौक्षीत् । [1]ग्रन्थश्रोतॄणामपि निखिलेश्वरमहेश्वरस्य प्रणामानुवादश्रवणादपि विघ्नोपशमो भवतीत्यभिप्रायेण तं ग्रन्थादौ निबद्धवान् । प्रणम्येत्यादि । अत्र प्रशब्दो भक्त्यतिशयख्यापकः । निबद्धक्रियापेक्षया पूर्वकालभावित्वात् प्रणम्येति क्त्वा प्रत्ययः । जगच्छब्दे-नोत्पत्तिमन्तः क्षित्यादयोऽभिधीयन्ते तेषामुत्पत्तौ [2]स्वका-

---

करः रोगसमूहस्य निदान पूर्वरूपादितत्त्वविषयक जिज्ञासयोत्सुक चिकित्सकजनानामनुग्रहीतुमिच्छया विशिष्टमिदं ग्रन्थरचना रूपं तद्-ग्रन्थरचनायां विघ्नसमूह प्रशमनकारकं मङ्गलाचरणं शिष्टेरनाचरितमपि परमशिष्ट व्यवहार क्रमसिद्धमभीष्ट देवता प्रणामं प्राक् पूर्वं प्रायौक्षीत्कृतवान् । आप्तत्वं भ्रम प्रमाद विप्रलिप्सा करणापाटव रहितत्वमिति भ्रमोऽन्यथाज्ञानं प्रमादोऽनवधानता विप्रलिप्सा प्रता-रणेच्छा करणापाटवमिन्द्रियापटुता । कारिकादि लिखित प्रमाणं चरकेऽपि कथं प्राचीनैः प्रणामः कृतः इत्याशङ्काऽस्य समाधेति ॥

(१) ग्रन्थश्रवणे प्रवृत्तानामपि विघ्नेश्वरो नाशोपस्थितः शिवः परमेश्वरः निखिलेश्वरस्य प्रणामानुवादात् तत्प्रणामस्य शब्दश्रवणात् विघ्नानां दूरदशानां विनाशो भवतीत्यभिप्रायेण ग्रन्था-दौ तं परमेश्वरप्रणामं निबद्धवानित्यर्थः । ख्यापकः ख्यातिजनकः ज्ञापक इति यावत् । ननु यदि जगत्पदं पञ्चात्मविशिष्ट परं तर्हि त्रैलोक्यस्य भणितत्वेन पौनरुक्त्यं स्यात् तत्र त्रैलोक्य पदस्या-पि वक्तु व्यावहारिकत्वात् । अतो जगत्पदम् अन्यथा व्याचष्टे जगत् शब्देनेत्यादिना उत्पत्तिमन्तः क्षित्यादयः जन्या चेतन पृथिव्यादयः । अभिधीयन्ते उच्यन्ते भावान्तरस्य विशेषपरत्वेनेति न्यायात् ।

रणसमवाये। स्थितौ कतिचित्कालावस्थाने। संहारे प्रध्वंसे कारणं कर्त्तारम्। स्वर्गः [७] सुखम् अपवर्गो मोक्षः आत्यन्तिकदुःखनिवृत्तिरूपः। तयोर्द्वारमुपायं प्रधान-कारणम् एतेन सकलपुरुषार्थहेतुत्वमुक्तं [८] सुखावाप्तिदुःख-हान्यतिरिक्तस्य [९] पुरुषार्थस्याभावात् [१०] अतएव त्रैलोक्य-

---

(६) समवायकारणसमवायेति। समवायिनः कारणानुयोगिक समवाय-रूपजन्मनि। यथा कपाले घटो जायते तस्मिन् घटो जायते इत्यादौ कपालाद्यनुयोगिकसमवायो जन्मार्थः। जगतः सर्वकालिकस्थिते-रभावात् स्थितिं विशिनष्टि कतिचित् कालावस्थाने इति। कतिचित् कालं व्याप्य अवस्थानमित्यर्थः।

(७) सुखमिति दुःखासंभिन्नं सुखम्। उक्तं हि यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदम्। अस्यायमर्थः यद् दुःखेन संभिन्नं दुःखसंपृक्तं न यदनन्तरं न दुःखग्रस्तम् अभिलाषोपनीतम् इच्छाविषयीभूतं तत्सुखं स्वःपदास्पदं स्वःपद-प्रतिपाद्यमिति। आत्यन्तिक दुःखनिवृत्तिः अर्थात् चरमदुःखध्वंस-स्वरूप इति यावत्।

(८) सुखावाप्तीति सुखावाप्तिः सुखप्राप्तिः सुखसाक्षात्कारः अहं सुखीत्याकारक इति यावत्।

(९) पुरुषार्थस्याभावादिति। यद्येतद्व्यतिरिक्तपुरुषार्थस्यालीकत्वेन तद-भावोऽप्रसिद्धलक्षणम् एतद्व्यतिरिक्तस्य पुरुषार्थस्याभावादित्युक्तमिति वाच्यम्। एतद्व्यतिरिक्त पुरुषार्थाभावस्य प्रतियोगिनः पुरुषार्थस्य नालीकत्वं तेनाऽप्रसिद्धिः स्यात्तस्य च प्रसिद्धत्वात्। अपितु एतद्व्य-तिरिक्तत्वरूपविशेषणावच्छिन्नस्यैव तस्येति। यदुक्तं गौडाधिकारवि-वृतौ नाप्रसिद्धमस्ति किञ्चिदपि वस्तु इतरभिन्नस्य आख्यातार्थकरे गदाधरभट्टाचार्येण एतस्मिते आत्मनो नालीकत्वम् अपितु स्वेतररूप विशेषणावच्छिन्नस्यैव तस्येति। अथवा एतद्व्यतिरिक्त स्येत्यत्र अत्रार्थो निजत्वं पुरुषार्थ पदेन च पुरुषार्थत्वं धर्मावभासनिर्देशात् तथाच एतद्व्यतिरिक्तनिष्ठ पुरुषार्थत्वाभावस्यापि प्रसिद्धत्वात्।

नानामुनीनां वचनैरिदानीं,
समासतः सद्भिषजां नियोगात् ।

शरण्यं त्रैलोक्यरचितारम् । अथोक्तं जगत् स्थितिकारणत्वेन पौनरुक्त्यं जगच्छब्देनोत्पत्तिमतामेवाभिधानात् । अचलत्रैलोक्यशब्दो भुवनत्रयवर्त्तिचेतनाचेतनसमूहवाची लोकशब्दस्य जन भुवनयोरभिधायकत्वात् । तथाचामरः। लोकस्तु भुवने जन इति । त्रैलोक्यमिति स्वार्थे ष्यञ् चातुर्वर्ण्यवत् । हरादिपर्य्यायान् परित्यज्य शिवपदनिर्द्देशेन ग्रन्थस्य श्रोतॄणां तदध्येतॄणाञ्च कल्याणमभिलषन् शिवपदं निबद्धवान् शिवकारित्वेनैव महेशस्य शिवपदाभिधानमिति ॥ १ ॥

अभिधेयसम्बन्धप्रयोजनोपदेशमन्तरेण न प्रेक्षावतां प्रवृत्तिः स्यात् इत्यत स्तदभिधानार्थं श्लोकद्वयमाह । नानेत्यादि रोगाणां विशेषेण वातादिजन्यत्व साध्यासाध्यत्वादिरूपेण निश्चयो ज्ञानं येन स रोगविनिश्चयो ग्रन्थो निबध्यते विधीयते अस्माभिरिति शेषः । तस्य विशेषणं सोपद्रवेत्यादि सहोपद्रवादिभि र्वर्त्तते यः स तथा । एतेन विशेषणद्वारेण उपद्रवारिष्टनिदानलिङ्गस्वरूपमभिधेयमुक्तं भवति । एतद्व्यतिरेकेणान्याभिधेयाभावात् तथा उपद्रवादिभिरभिधेयैः सह ग्रन्थस्य वाच्यवाचकलक्षणसम्बन्धोऽप्यभिहितः। तत्र उपद्रवो रोगारम्भकदोषप्रकोपजन्योऽन्य विकारः । नियत मरणख्यापकमरिष्टम् ।

(१-) अतएवेति । अकस्य स्वर्गापवर्गयोः प्रधानकारणत्वादेव । प्रेक्षावतां विवेचकानां ग्रन्थे कर्त्तुं शमन्तरेण शास्त्राध्ययनेऽप्रवर्त्तमानाना-

सोपद्रवारिष्टनिदानलिङ्गो,

निबध्यते रोगविनिश्चयोऽयम् ॥ २ ॥

निदानं रोगोत्पादको हेतुः लिङ्गं रोगज्ञापको हेतुः। तेन लिङ्ग्यते ज्ञायते व्याधिरनेनेति व्युत्पत्त्या पूर्वरूप रूपोपशयसंप्राप्तयोऽभिधीयन्ते। यद्यपि निदानमपि रोगविशेषं बोधयति तथाप्युत्पत्तिज्ञप्तिहेतुत्वेन कारणद्वैविध्यप्रतिपादनार्थं तस्य पृथगभिधानं एवमेवोपद्रवादीनां विस्तराभिधानं यथावसरं करिष्यते। ननु रोगनिदानादितत्त्वमतिसूक्ष्मत्वेनाभ्यर्थिनस्य न ज्ञानविषयः स्यात् कथं [11]तदुपदेशे प्रेक्षावतां प्रवृत्तिरित्यत आह। नानामुनीनामित्यादि। एतेन ग्रन्थस्य प्रामाण्य [12]प्रदर्शयत्युक्तं मुनिभिर्हि

मिति यावत्। निश्चितमरणाख्यापकं निश्चित मरणाभिधानम् एतद्व्यवच्छेदार्थं [illegible] तत्र [illegible] मरणं [illegible] प्रतिबन्धकाभाव [illegible]। [illegible] मरणं [illegible] क्रियाभिः। [illegible] अव्यवस्थितरोगनिवारणार्थम्। [illegible] यावत् प्रतिक्रियाकाले [illegible] भावः। कदाचिद्दैवदोषेण [illegible] जीवति। [illegible] देहमाश्रिताः। दोषाः कुर्वन्ति [illegible] प्रयच्छति। तेनलिङ्गेन।

(११) तदुपदेशमिति। [illegible] माधवकरस्य कथने। एतेन ग्रन्थस्य प्रामाण्यमिति। [illegible] भवति [illegible] संभवात् [illegible] प्रवृत्तिरिति भावः। [illegible] निश्चितप्रामाण्यात् [illegible]। पुरुषातिशयः [illegible] विद्वत्साधनत्वेन। निबन्धः ग्रन्थसन्दर्भः।

(१२) [illegible] भावः [illegible]

नानातन्त्रविहीनानां भिषजामल्पमेधसाम् ।
सुखं विज्ञातुमातङ्कमयमेव भविष्यति ॥३॥

तपोयोगर्द्धिवशात् त्रैकालिकनिखिलज्ञानशालिपुरुषातिशय उच्यते । ननु एवम्भूतः कश्चिद्ग्रन्थो यद्यन्योऽप्यास्ते तेनैव व्यवहारसिद्धेः करणत्वेनास्य निष्प्रयोजनतास्यादित्यत आह इदानीमिति । इदानीमस्माभिरेव प्रायश्येन नानामुनीनां वचनैरेवम्विधो निबन्धः क्रियते । समासत इति संक्षेपात् । एतेन अल्पबुद्धीनाम् अतिविस्तरत्वेन अप्रहस्यकृतादोषः परिहृतो भवति । ननु कृतेऽपि ग्रन्थे अनुपादेयपुरुषप्रणीतत्वेन न कश्चिद् भिषक् प्रवर्त्तिष्यत इति ग्रन्थवैयर्थ्यं स्यात् इत्यत आह, सद्भिषजां नियोगादिति । नियोगो नियोजनं अस्मादुपकाराय ग्रन्थः क्रियताम् इति प्रार्थना इत्यर्थः । अथवा नियोग आज्ञा एतेनात्मनः सविनयत्वमुक्तं भवतीत्यर्थः॥२॥

नानातन्त्रेत्यादि । सुखं यथा भवति तथा आतङ्कं रोगं विज्ञातुमयमेव ग्रन्थो भविष्यति कारणमिति शेषः । एतेन रोगज्ञानं प्रयोजनमित्युक्तं[१२]फलश्चास्य[१३]चिकित्-

---

अप्रहस्तित्वरूपदस्यार्थः । अनुपादेयपुरुषप्रणीतत्वं अग्राह्यपुरुष रचितत्वेन । विज्ञातुमिति विज्ञानार्थम् अत्र तादर्थ्यमात्रविवक्षया चतुर्थ्यस्तु कर्मत्व एव कर्तृत्व विवक्षया । सुखेन रोगविज्ञान प्रयोजने भिषजामुपायो अयमेव ग्रन्थो भविष्यतीतिभावः ॥

(१२) प्रयोजनमिति । यमर्थमभीप्सन् तदुपायीभूत कर्म्मारभते तत्प्रयोजनं तद्द्विविधं मुख्यं गौणञ्चेति आद्यम् अन्यच्छाऽनधीनेच्छा विषयं तत्तु सुखदुःखाभावरूपं जीवानां स्वतइच्छा विषयत्वेन सिद्ध-

पातज्वरोऽसाध्य इति। असत्युपशयाभिधाने सङ्कीर्ण-लक्षणे अनभिव्यक्तलक्षणे वा व्याधौ विशेषबोधो न स्यात्। तदुक्तञ्चरके गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां परिक्षेतेति। असत्याञ्च संप्राप्तौ पूर्व्वरूपादि प्रतीतस्यापि व्याधेश्चिकित्सोपयोगिनोंऽशांशविकल्पनाबलकालादेरप्रतीतेश्चिकित्साविशेषो न स्यात्। तस्मात् पञ्चापि निदानादयो वक्तव्याः। पञ्चविधमप्येतद्रोगोत्पत्तिज्ञप्तिहेतुभूतं निदानशब्देनोच्यते। यदाह सुश्रुतः। हेतुलक्षणनिर्द्देशान् निदानानीति पञ्चधा। तत्रैव निदानशब्दनिरुक्तिः निर्द्दिश्यते व्याधिरनेनेति निदानं दिशेः पृषोदरादित्वात् रूपसिद्धिरिति गदाधरः। निश्चित्य दीयते प्रतिपाद्यते व्याधिरनेनेति निदानमिति जेज्जडः। भट्टारहरिश्चन्द्रेणापि २५तन्त्रयुक्त्यादिविवरणप्रस्तावे एव निरुक्तिरुक्ता। निशब्दो निश्चये तथा च वररुचेरुपसर्गसूत्रम्। निर्निश्चय निषेधयोरिति। लोकेऽपि अद्य निदानं करिष्यामीत्युक्ते निश्चयं करिष्यामीत्यवगम्यते। निदानमिति करणे ल्युट तेन व्याधिनिश्चयकरणं निदानमिति। निदानादिपञ्चकसामान्यलक्षणम्। निदानशब्दोऽयं निदानविशेषे हेतौ च वर्त्तते यथा तृणशब्दस्तृणविशेषे तृणजातौ च। २६यत्तु भट्टारहरिश्चन्द्रेण

(२५) तन्त्रयुक्त्यादीति। चरकैकदेशव्याख्याने। निदान विशेषे रोगोत्पादकहेतौ सामान्यतः कारणे।

(२६) यत्त्विति। भट्टारहरिश्चन्द्रेणापि वागौरित्यादि व्यासप्रयोगमुपन्यस्य उभाभ्यां निबन्धाभ्यां निदानशब्दो व्याख्यातः किं कृत्वा तत्राह निदीयत इत्यादि यद्व्याख्यानं तन्निदानस्थानपन्याभिप्रायेणेति

निमित्तहेत्वायतन प्रत्ययोत्थानकारणैः ।

निदानस्थाने यागौः सुदोह्या भवति न तां निद्दीते इति व्यासप्रयोगरूपन्यस्य निबन्धार्थो निदानशब्दो व्याख्यातः। निदीयते निबध्यते हेत्वादिसम्बन्धो व्याधिरनेनेति कृत्वा तन्निदानस्थानरूपग्रन्थाभिप्रायेण। नहि हेत्वादयो हेत्वादिसम्बन्धं व्याधिं प्रतिपादयन्ति ॥ ४ ॥

एषां निदानादीनां मध्ये [27]समानासमानजातीयव्यावर्त्तकं निदानलक्षणमाह[28]। निमित्तेत्यादिना पर्य्यायैरित्यन्तेन एतैः[29] शब्दैर्योऽर्थोऽभिधीयते तन्निदानम्। यथा बुद्धिरुपलब्धिर्ज्ञानम् इत्यनर्थाान्तरम्...

योजना। ननु निदीयते निबध्यतइयं॰प्रतिपाद्यते हेत्वादि सम्बन्धो व्याधिरनेनेति कृत्वा निदानशब्दस्य हेत्वादि परत्वापि संभवतीत्यतआह नहीति हि। यस्मादिति॥

(२७) समानेति। अत्रसमानजातीया निदानसमानधर्म्मिणः पूर्वरूपादयः असमानजातीया निदान वधर्मिणो घटपटादयः व्यावर्त्तकं भेदकम्॥

(२८) निदानेति। निमित्तेत्यादिना पर्य्यायैरित्यन्तेन ग्रन्थेन करणेन निदान लक्षण माहेत्यन्वयः॥

(२९) एतैरिति। एतैः शब्दैर्योऽर्थो वस्तुःभिधीयते प्रतिपाद्यते तन्निदानमिति निष्कृष्टार्थः। सव्यभिचारः सदोषः। तेषां शकुनादीनाम्। ते निमित्तादयः। इति कर्त्तव्यताव्यापारः तया सह वर्त्ततेयः स सेति कर्त्तव्यताकः रोगोत्पत्तिजनकः। हेतुः कारणं तल्लक्षणन्तु यत्तु नस्याद्विना येन तस्य तद्धेतुरुच्यते। तस्याः संप्राप्तेः। व्युदासार्थमिति निरासार्थम्। नानुबध्यन्त इति दुष्यादिभिर्नयुज्यन्ते। अभिनिर्वृत्तिर्निष्पत्तिः॥

न्तरम्। ननु किं मिलितैरेकैकशो वा। नाद्य एका-
र्थाभिधायिनां शब्दानां मिलितानामप्रयोगात्।
द्वितीयश्चेत्तदा अव्यभिचारः। निमित्तस्य शकुनादौ
हेतोः प्रयोजके, कर्त्तरि, आयतनस्य स्थाने, प्रत्ययस्य
ज्ञानादौ, उत्थानस्योद्गमनोत्सर्गयोर्दर्शनात्। नैवं, शकुना-
दीनां निमित्तादिभिः सर्वैरभिधानात् अतएवाह पर्य्यायै-
रिति नहि तेषां ते पर्य्याया यतः क्रमेणैकार्थवाचकाः
शब्दाः परस्परं पर्य्याया उच्यन्ते तस्मान्निमित्तादिशब्दैः
पर्य्यायैरभिधीयमानत्वं[२८] निदानत्वम्। एतच्च पर्य्यायक-
थनं शास्त्रे व्यवहारार्थम्। इदन्तु संक्षेपतो लक्षणम्।
येतिकर्त्तव्यताको रोगोत्पादकहेतु र्निदानम्। यन्मते
दोषेतिकर्त्तव्यतारूपा संप्राप्तिरिष्यते, तन्मते संप्राप्ति-
व्युदासार्थं येतिकर्त्तव्यताक इति पदं, तस्या दोषेति
कर्त्तव्यतारूपाया इतिकर्त्तव्यतान्तराभावात्। यन्मते
व्याधिजन्म संप्राप्तिस्तन्मते व्याध्युत्पत्तिहेतुर्निदानम् इति
लक्षणम्। उभयत्रापि उत्पत्तिपदं ज्ञप्तिहेतु पूर्व्वरूपादि
व्यवच्छेदार्थम्। अथ हेतुरनेकधा तत्र प्रथमं चतु-
र्विधो यदाह उपकल्पनीयाध्याये हरिश्चन्द्रः। सन्नि-
कृष्टविप्रकृष्टव्यभिचारिप्राधानिकभेदाच्चतुर्द्धा इति। सन्नि-
कृष्टो यथा नक्तं दिनर्त्तुभुक्तांशा दोषप्रकोपस्य हेतवः।
अथ ते चयादिकमपेक्षन्ते। विप्रकृष्टो यथा। हेमन्ते
निचितः श्लेष्मा वसन्ते कफरोगकृत्। किंवा सन्निकृष्टो
ज्वरस्य रूक्षादिसेवा। विप्रकृष्टो रुद्रकोपः। व्यभिचारी
यथा यो दुर्ब्बलत्वात् व्याधिकरणासमर्थः। यदाह

कारकः दोषा अवनीयाश्चो यदानानुबध्यन्ते न तदा विका-राभिनिर्वृत्तिर्भवतीति । प्राधानिको यथा विषादि त्रिविधो वा (१०) असात्म्येन्द्रियार्थसंयोग (११) प्रज्ञापराधपरिणाम-

---

(१०) असात्म्येति । इन्द्रियैरर्थसंयोगः इन्द्रियार्थसंयोगः सात्म्य-मोचितम् सात्म्यं तेन सह वर्तमानः सात्म्यः सात्म्यः असात्म्यः असात्म्य-श्चासौ इन्द्रियार्थसंयोगश्चेति । इन्द्रियाणि च चक्षुः श्रोत्र घ्राण रसन त्वग्भेदेन पञ्च । शब्दरूपगन्धरसस्पर्शा यथाक्रम-मेषामर्थाः भवन्ति ॥

(११) अयोगेति । श्रवणादीन्द्रियैः शब्दरूपादीनामदर्शनादिरयोगः । एवमतिशयदर्शनादिरतियोगः । तथा मिथ्यादर्शनादि मिथ्यायोगः । तथा च अल्पशब्दश्रवणात् सर्वथाऽश्रवणेन च । शब्दानां चाति हीनानां भवन्ति अश्रवणाज्जडाः । अतियोगः शब्दश्रवणा-च्छिन्न शब्दाश्रवणाच्च । परुषोद्धीपनाशक्तप्रियव्यसन सूचकैः । शब्दैः श्रवणसंयोगो मिथ्यासंयोग उच्यते । भैरवभयानकाः प्रशस्त प्रियविपत् सूचकशब्दैः सह श्रवणेन्द्रियसंयोगः मिथ्यासंयोग उच्यत इति । असं-स्पर्शोऽतिसंस्पर्शौ हीनसंस्पर्श एव च । स्पृश्यानां संस्पर्शयोक्तः स्पर्शनेन्द्रिय-बाधकः । अस्यार्थः । स्पृश्यानां शीतोष्णादीनाम् असंस्पर्शः सर्वदा स्पर्शाभावः । अतिसंस्पर्शः अतिशयसंस्पर्शः हीनसंस्पर्शश्च संक्षेपेण स्पर्श-नेन्द्रियबाधकः त्वग्बाधक उक्तः । यो भूतविषवातानाम् अकालेनागत-श्च यः । स्नेहशीतोष्णसंस्पर्शो मिथ्या योगः स उच्यते । अस्यार्थः भूतविष-वातानां यः संस्पर्शः यश्चाऽकालेषु आगतः प्राप्तः स्नेहशीतोष्णानां संस्पर्शः स मिथ्यायोग उच्यते । रूपाणां भास्वतां दृष्टिर्भास्वतामपि दर्शनात् । दर्शनाच्चाति सूक्ष्माणां सर्वशश्चाप्यदर्शनात् । द्विष्ट भैरव बीभत्स दूरातिश्लिष्टदर्शनात् । तामसानाञ्च रूपाणां मिथ्यायोगः स उच्यते । द्वेष्यभयानकविकृतातिदूरस्थित निन्दिततामसरूपाणाञ्च दर्शनाद् दृष्टिर्भ्रश्यते अतएतेषां यद्दर्शनं स मिथ्यायोग उच्यते । अत्यादानमना-दानं ओकसात्म्यादिभिश्च यत् । रसानां विषमादानं तज्ज्ञेयं दोषदूष-णम् । अस्यार्थः आस्यादिभिरात्मेन्द्रियमनोभीरसानामत्यादानम् अति

भेदात्। तत्रासात्म्येन्द्रियार्थसंयोगोऽयोगातियोगमिथ्यायोगयुक्ता ज्वरादयः। प्रज्ञापराधो मिथ्याज्ञानादि[22]। परिणामोऽयोगादियुक्ता ऋतुस्वभावजाः शीतादयः[23]। अधर्मस्य च रोगहेतोरत्रैवान्तर्भाव इति भट्टार हरिचन्द्रः। तदपि कालान्तरपरिणतस्य दुःखकर्तृत्वात्। अन्ये तु प्रज्ञापराधे तस्याधर्मस्यान्तर्भावमाहुः[24]। मिथ्याज्ञानकृत[24]ब्रह्मवधादिजन्मनोऽधर्मस्य प्रज्ञापराध[25]

असात्म्यं शब्दादीनाम् अपकृष्टं श्रोत्रादीनामत्युत्कृष्टं च विषममपकृष्टं सात्म्यं दोषदूषणम्। अतियोग इति श्रोत्रादीनां शब्दादीनामतिसेवनम्। अयोगः सर्वथा श्रोत्रेन्द्रियादीनामसेवनम्। पूतिभूतविषद्विष्टगन्धाद्येषामानां तेषां संयोगो मिथ्यासंयोग उच्यते। पूतिर्दुर्गन्धः भूताः पिशाचादिकाः द्विष्टोऽप्रियविषयीभूतः भूतश्च विषश्च द्विष्टश्च एतेषां ये गन्धास्तैर्न्नेत्र [illegible] घ्राणेन्द्रियसंयोगो मिथ्यासंयोग उच्यते। एवमसात्म्यार्थसंयोगस्त्रिविधो दोषकोपनः। तेन तत्र संयोगः सर्वहेतुरित्यर्थः। प्रज्ञापराध इति। प्रज्ञया बुद्ध्या अपराधः प्रज्ञापराधः।

(२२) मिथ्याज्ञानादीति। आदिना कर्मादेः परिग्रहः। यदाह धीधृतिस्मृतिविभ्रंशः कर्म यत् कुरुतेऽशुभम्। प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणमित्यादि।

(२३) परिणामेति। कालान्तरं प्राप्य परिणतः सन् व्याधिं करोतीति परिणामः।

(२४) मिथ्याज्ञानेति। आत्मनि देहाद्यभेदज्ञानं मिथ्याज्ञानं तेन कृतो यो ब्रह्मवधादि [illegible] अधर्मस्य विशेषणम्।

(२५) प्रज्ञापराध एवमूलमिति। अयमर्थः देहाद्यभिमानिनां मिथ्याज्ञानिनां दैहिक [illegible] ब्रह्मवधादि पापकर्मणि या बुद्धिः क्रियते तस्याः प्रज्ञापराध एवमूलं कारणम्।

एव सूत्रम्। अतावत्तं तत्र न निरूप्यते। तत्र रोगका-रणत्वेनाधर्म्मस्य सर्व्वेषां सिद्धत्वादिति। दोषव्याध्युभय-हेतुभेदात् स च त्रिविधः। दोषहेतवो यथा चयप्रको-प[२१] प्रशमनिमित्ता यथर्त्तुत्पन्ना मधुरादयः। व्याधि-हेतवो यथा मृद्भक्षणं पाण्डुरोगस्य कारणं यद्यपि मृदपि दोषं प्रकोपयत्येव यदुक्तं चरके कषाया मारुतं पित्तमूषरा मधुरा कफम्। तथापि तज्जैर्दोषैः पाण्डुरोग एवारभ्यते नत्वन्यो विकार इति व्याधिहेतुता भवति। उभयहेतुर्यथा वातरक्ते हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्चे-त्यादि। अत्र यद्यपि दोषप्रकोपपूर्व्वकं व्याधिजननं तथापि दोषदुष्याधारवपि तस्य कारणत्वं बोधयति। तेन तत्र व्याधिहरमात्रं भेषजं न प्रयोज्यं किन्तूभयप्रत्यनी-कम्। न च वाच्यं कारणभूतदोषनिवृत्तौ कार्य्यभूतस्य व्याधेर्निवृत्तिरिति यतः प्रतिनियतशक्तीनि भेषज-द्रव्याणि। कथमन्यथा श्लैष्मिकतिमिरे श्लेष्महरणं वमनं न प्रयुक्तमिति यदुक्तं चरकेण नशामयेत्तिमिरिणं न गुल्-मिनं नचापि पाण्डुरोगिणमिति। स एवोत्पादकव्य-ञ्जकभेदात् द्विधा तदुत्पादको यथा हेमन्तजो मधुरसः कफस्य। व्यञ्जको यथा तस्यैव कफ च यस्य व्यञ्जको वसन्ते सूर्य्यसन्ताप इति भट्टार हरिश्चन्द्रः। तच व्यञ्जकः प्रेरकः। बाह्यमभ्यन्तरभेदाच्च द्विधा तत्र बाह्या आहा-राचारकालादयः। एतदभिप्रायेण चिरटाचार्य्यः।

(२१) चयप्रकोपेति। यदुक्तं पित्तं प्रावृषि चीयते तु शरदि प्रा-प्नोति कोपं पुनः शान्तिं याति हिमे कफस्तु च हिमे सञ्चयते चद्रवः।

व्यायामादपतर्पणात् प्रपतनाद्भङ्गात् क्षयाज्जागराद्वेगानाञ्च[१७] विधारणादतिशुचः शैत्यादतित्रासतः। रूक्षक्षोभकषायतिक्तकटुकैरेभिः प्रकोपं व्रजेद्वायुर्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि च। [१८] कट्वम्लोष्णविदाहितीक्ष्णलवणक्रोधोपवासातपस्त्रीसम्पर्कतिलातसीदधिसुराशुक्तारनालादिभिः। भुक्ते जीर्यति भोजने च शरदि ग्रीष्मे सति प्राणिनां मध्याह्ने च तथार्द्धरात्रिसमये पित्तं प्रकोपं व्रजेत्। गुरुमधुर[१९]रसातिस्निग्धदुग्धेक्षुभक्ष्य-

---

ओषधानामभी यत्नाभिरक्षितं वीर्यं शरीरः पुनर्वीर्यं सञ्चिनुते प्रको-पयति प्रावृट् शरद् संहरेत्। प्रावृट् प्रकोपयति अर्थात् शरीरं एवं शरद् सङ्कटादिकमपि दुष्टम्। शीतोष्णमावर्षाधायैः क्रमेणामिषि-रादयः। शिशिरश्च वसन्तश्च शीतोष्णवर्षाशरद्धिमः। तिस्र ऋतवः [illegible] एकैकादशोऽमुना। विशेषेण प्रवर्त्तन्ते क्रमेण शिशिरादिष्विति। प्रकृतीनां निर्णयम्। प्रति नियत शक्तिकानि नियमानुसारिणि भक्ष्यो-ऽस्य सर्वमा शक्ति विनिश्चानि। तथा च यानि दोषहराणि तानि व्याधिहराणि तैल घृत मधु प्रभृतीनि। एवं यानि व्याधि-हराणि तानि न कदाचिदपि दोषहराणि खदिरादीनि। एवं यानि उभयहराणि तानि न एकमात्रहराणि दशमूलादीनि।

(१७) व्यायामादित्यादि। व्यायामात् श्रमात्। अपतर्पणात् लङ्घनात्। क्षयात् धातुक्षयात् वेगानां मलमूत्रादेः।

(१८) कट्वित्यादि। कटुरसस्तीक्ष्णरसः। विदाहीति ऊष्मकृद्द्रव्यं वंशकरीरादि। तत्कृद्धयाच्च विदाहि द्रव्यमुद्गारं [illegible] धूमोपगमादयाम्। शुक्तादिकञ्च जनोद् याम्लं गच्छति तच्छुक्तम्। सौवीरं द्रव्यं [illegible] शुक्तं कल्याणविशेषः तन्नामान्तः यवकल्कादिसुची-भावं सन्धानकोद्भवादिकम्। धान्यराशीनिरात्रं शुक्तं चुक्रं तदु-च्यते। आरनालं काञ्जिकम्। भोजने भोजन समये भोजनकालातीते इति केचित्।

IMPERIAL LIBRARY

द्रवदधिदिननिद्रापूपसर्पिर्मधूरैः । तुहिनपतनकाले श्लेष्मणः संप्रकोपः । प्रभवति दिवसादौ भुक्तमात्रे वसन्ते ।

अभ्यन्तरा दोषा दूष्याश्च[४०] तत्र दोषोपि कुपितः प्राकृतादि भेदादनेकधा प्राकृतो यथा । वसन्ते श्लेष्मा शरदि पित्तं प्रावृषि वायुः । वैकृतस्तु यथा वसन्ते पित्तं वायुर्वा वर्षा सकफः पित्तं वा शरद्विकफो वायुर्वा । अस्य प्रयोजनं सुखसाध्यतादि यदुक्तं चरके । प्राकृतः सुखसाध्यस्तु वसन्तशरदुद्भव इत्यादि । अनुबन्ध्यानुबन्धभेदा द्विधा अनुबन्ध्यप्रधानं अनुबन्धोऽप्रधानं यदाह चरकः स्वतन्त्रो व्यक्तलिङ्गो यथोक्त समुत्थानोपशमो भवत्यनुबन्ध्यः । तद्विपरीतलक्षणस्त्वनुबन्धः । अस्य प्रयोजनं संसर्गजे व्याधौ अनुबन्ध्यरोगापेक्षया चिकित्स्योऽनुबन्धाविरोधेन यदुक्तं तत्रोपद्रवस्य प्रायः प्रधानप्रशमात् प्रशम इति उपद्रवोऽनुबन्धः । प्रकृति विकृतितो यथा वातप्रकृते र्वातरोगः कष्टसाध्यो भवति कफप्रकृतेस्तु सुखसाध्यः । यदाह चरकः । सुखसाध्यलक्षणे न च तुल्यगुणो दूष्यो न दोषः प्रकृतिर्भवेदित्यादि । [४१]आशयापकर्षतो यथा यदा समान

---

(३९) गुरुमधुरैरित्यादि । मधूरैः परिदुर्गाभोजनैः । तुहिन पतनकाले हिमपतन समये । तुषारस्तुहिनं हिममित्यमरः मधुररसमयपायसदुग्धादीनां पहले मिष्टे पुनर्दुग्धादि पहलम् अतिशयदार्ढ्यमिति ।

(४०) दोषेति । दोषा वातपित्तकफाः । दूष्यास्तु रसासृङ्मांस-मेदोऽस्थि मज्जशुक्राणि धातवः । अप्रदूष्या समामूत्र शकृत् स्वेदादयो-ऽपि च ।

(४१) आशयेति । आशय आधारः स्थानमिति यावत् । तथ तस्मात् स्थानेन अपकृष्यागच्छन्ति नाशयन्ति ।

निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते ॥५॥

स्थितमेव दोषं स्थापयावाजन्य वायुः स्थानान्तरं नयति तदा समानस्थोऽपि दोषो विकारं जनयति। यदाह चरकः।

> प्रकृतिस्थं यदा पित्तं मारुतः श्लेष्मणः क्षये।
> स्थानादादाय गात्रेषु यत्र यत्र प्रसर्पति ॥
> तदा भेदश्च दाहश्च तत्र तत्रानवस्थितः।
> गात्रदेशे भवेत्तस्य श्रमो दौर्बल्यमेव च इति ॥

अस्य प्रयोजनं वातस्यैव विगुणस्य स्वस्थानानयनं कार्य्यं न तु पित्तस्य ह्रासनं ये त्वेतां पित्तस्य स्थानाकृष्टिं न विदन्ति ते दाहोपलम्भेन पित्तवृद्धिं मन्यमानाः पित्तं ह्रासयन्तः पित्तक्षयजन्यं रोगान्तरमेवोत्पादयन्त आतुरमतिपातयन्ति इति भट्टार हरिचन्द्रः। अन्ये त्वाहुः पाचकादिभेदेन सर्वदेहस्थिते पित्ते यदा स्वाश्रयात्कृष्टं पित्तमवयवान्तरं अनिलेन प्रापितं तदा तदवयवान्तरस्थं पित्तमागन्तु पित्तसम्बन्धेनाधिकमेव जातम्। ततश्च पित्तवृद्धिलक्षणैरेवं दुष्टिर्न दुष्ट्यन्तरम्। अन्यथा दाह एव न स्यात्। नहि समानस्थो दोषो विकारं जनयति हरिचन्द्रस्य त्वयमभिप्रायः। यद्यप्येवं तथापि चिकित्साभेदार्थं वृद्धिक्षयव्यतिरिक्त स्थानान्तरगतिरूपो दुष्टिविशेषोऽभ्युपेतव्यः। अन्यथा दाहं पित्तजमिति मत्वा विरेचनं पित्तह्रासनं वा कार्य्यम्। न च तत् तत्र योग्यं किन्तु स्वस्थानानयनं कार्य्यं यथोक्तं चरकेण। क्षयस्थानञ्च वृद्धिश्च विज्ञेया त्रिविधा गतिरित्यादि तत्र माधि-

क्तमिति गतिरी यथा दोषाणां क्षीणवृद्धिसमाख्याः । यदुक्तं चरके ।

क्षयः स्थानञ्च वृद्धिश्च विज्ञेया त्रिविधा गतिः ।
ऊर्ध्वञ्चाधश्च तिर्य्यक् च विज्ञेया त्रिविधा परा ॥
त्रिविधा चापरा कोष्ठशाखामर्म्मास्थिसन्धिषु ॥

यत्र स्थानमिति समत्वं तत्र यथाहि स्वस्थे यथा दोषाः प्रकृताः स्वं लिङ्गं दर्शयन्ति यथा वलं क्षीणा जहति स्वं लिङ्गं समाः स्वं कर्म्म कुर्वन्ति इति । स्वं लिङ्ग-मिति कुपितस्य वायो रुक्षादयो[१२]धर्म्माः कर्म्माणि च व्यामशूलादीनि यदाह चरकपाठमध्यादौ सुश्रुतावेन । [१३]आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्पप्रतोदाः

(१२.) रौक्ष्यादय इति । आदिना शीतादयः । यदुक्तं चरकेऽपि रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः । विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति । रूक्षः लक्षणः विशदः निर्म्मलः । खरः कर्कशः । सस्नेहमुष्णं तीक्ष्णञ्च द्रवमम्लं सरं कटुः । विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति । गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः । कृत्स्नाधिगुणनाशात् गुणिनोनाशः यथा वह्निना जलस्य शैत्यनाशात् जलनाशः ॥

(१३) आध्मानमित्यादि । आध्मानः सशब्दमुदरपरिपूर्णत्वम् । स्तम्भः जडता रौक्ष्यः स्निग्धता । स्फुटनम् अस्थ्यादि विदारणवद्वेदना । विमथनं मथनवत्पीडा । क्षोभः मनोविकारः । प्रतोदः सूचिवेधनवद्वेदना । कण्ठध्वंसः स्वरभेदः कण्ठावरुद्धता । अवसादः ग्लानिः । भ्रमः भ्रमणम् । अंशच्युतः अंशवेदनायुक्ताः इव वेदना इति यावत् । काठिन्यं मलमूत्रादेः कठिनता । विषाद परित्यक्ति अंशः विषयज्ञान-रहितः । हर्षणकोपः हर्षनाशः । विश्लेषः शरीरैकदेशभ्रंशः । सङ्ग-श्च वर्धितस्याननोद्गमः । श्रमः अनर्थग्लानिः । अवचयं निद्रा-शयः सन्धिच्छेदः । शोषः क्षीणत्वः । उत्साहः इच्छनः । विभाषी

कम्पस्रंसावसादौ भ्रमविलपनं व्यासशूलप्रभेदाः ।
पारुष्यं कर्णनादो विषमपरिणतिर्भ्रंशहृष्टिः प्रलापो
विक्षेपोद्घाटनानि व्यथनमवनमनं ताडनं पीडनञ्च ।
नामोन्नामौ विषादो भ्रमपरिपतनं जृम्भणं रोमहर्षो
विक्षेपाक्षेपशोषग्रहणसुषिरताच्छेदनं वेष्टनञ्च ॥
वर्णः श्यावोऽरुणो वा तृडपि च महती स्वापविश्लेषवक्रा ।
वक्त्रात् कर्कशत्वं सुषिरकुषितं भवतः स्यात् कषायो रसश्च॥

विस्फोटाम्लकधूमकाः प्रलपनं स्वेदच्युतिर्मूर्च्छनं दौर्गन्ध्यं दरणं मदोऽतिसरणं पाकोऽरतिः तृड्भ्रमौ उष्णाभिलाषः प्रमेहदहनं कटुतिक्तरसौ वर्णः पाण्डुविवर्जितः कथ्यते तानि कर्माणि पित्तस्य वैद्यैर्मिश्रचन्द्रागुरुकावैमित्य कठिनता मलाधिक्यं ।

कण्डापक्वश्लेपाः शैत्य कफप्रसेकश्च

सादो विषण्णता। भ्रमश्चक्रस्थितस्येव दृश्यदर्शनम्। अथवा स्वदेहभ्रमण ज्ञानम्। परिवर्तनं विचलः। विक्षेपः हस्तपादादेः। भ्रंशः शरीर च्युतः। स्फुरणम् अङ्गस्य। सुषिरता शरीरे छिद्रत्वम्। वेष्टनं बन्धनम्। छेदनम् अस्त्रादिद्वाराच्छेद ज्ञानम्। वर्णश्यावः धूम्रमिश्रित कृष्णवर्णः। रक्तवर्णो वा शरीरस्य वक्त्रस्य। स्वापः स्पर्शाज्ञानम्। विश्लेषः विश्लिष्टज्ञानम्। वक्त्रः वक्त्रतानं मुखादेः। कषाय रसश्च मुखस्य।

(८३) विस्फोटेत्यादि। अम्लः अम्लको अम्लधूमोद्गारो। मलिनः पुनः पुनरुष्णाभिलाषः। कम्पितताविक्षोभनमम्।

(८४) कण्डित्यादि। कफः कुक्षिप्रचलनाभिलाषः। कण्डूः कृमिः ... स्तैमित्यम् आर्द्रपटावगुण्ठितमिव। शरीरस्य। अथवा गुरुत्वं बहिः शरीरस्य प्रत्यक्षं ज्ञायते।

विरक्तत्वं शोषो निद्राधिक्यं रसौ पटु स्वादुः।
सर्वः स्रोतोऽवमता कर्षाणि कफस्य जानीयात्॥

द्विदोषलिङ्गः [४५]संसर्गं सन्निपातस्त्रिलिङ्ग इति। लिङ्गज्ञानप्रयोजनञ्च चिकित्साभेदार्थं यदाह सुश्रुतः। क्षीणा वर्द्धयितव्याः समाः पालयितव्याः वृद्धा ह्रासयितव्या इति। ऊर्द्ध्वादिगतिर्यथा। ऊर्द्ध्वगं रक्तपित्तमधोगञ्च अस्य प्रयोजनं रक्तपित्तस्य ऊर्द्ध्वगस्य विरेचनम् अधोगस्य वमनं तदुक्तं प्रतिमार्गेस्य[४६]हरणं रक्तपित्ते विधीयत इति यस्तु गतिभेदानभिज्ञः स विरेकः पित्तहराणामिति वचनात् अधोगे रक्तपित्ते विरेचनं प्रयोज्य आतुरस्यानर्थमेवोत्पादयति। ज्वरादिषु तिर्य्यग्दोषगतिषु यथोक्तं चिकित्सितमिति। वृद्धा दोषाः कदाचित् कोष्ठं कदाचित् शाखाः कदाचित् मर्म्मास्थिसन्धीनाश्रित्य वर्त्तन्ते मर्म्मास्थिसन्धिषु गतिः[४७] कृच्छ्रसाध्यत्वोपपन्नत्वादेकत्वेन

---

(४५) द्विदोषेति। द्वौ दोषौ वायुपित्तौ पित्तकफौ वा वातकफौ वा लिङ्गं चिह्नं यस्य सः संसर्गः। त्रयो दोषा वायुपित्तकफाः लिङ्गं चिह्नं यस्य सन्निपातः।

(४६) प्रतिमार्गेति। रक्तपित्तरोगे प्रतिमार्गस्य हरणं प्रतिमार्गः प्रतिकूलमार्गः विपरीत पथ इति यावत्। यद्वा निजाद्धि स्थानात् स्थानान्तरप्राप्तिर्गतिः ततश्च विपरीत पथ निज प्रापणं विधीयते रक्तपित्तस्य त्वर्थात्। विरेको विरेचनं प्रयुञ्जानः प्रयोगं कुर्य्यात्। अनर्थमनिष्टम्। ननु त्रिविधा अपरा कोष्ठशाखामर्म्मास्थि सन्धिभिस्तत्र दोषगत्या कथं त्रिविधत्वमुक्तं कोष्ठशाखा मर्म्मास्थि सन्धि भेदेन पञ्चविधत्वमापद्येत तन्निराकर्त्तुमाह।

(४७) कृच्छ्रेति कृच्छ्रसाध्यत्वस्यापादकत्वात् प्रापकत्वात मर्म्मास्थि।

निर्दिष्टा। कोष्ठमामाशयादि। त्वग्रक्तादयो धातव शाखा चेति चरककृतैव संज्ञा। कोष्ठाद्यभिधानप्रयोजनं चिकित्साभेदार्थम्। यथोक्तं चरके

आमाशयगते वाते कफे पक्वाशयाश्रये।
रूक्षपूर्वो हितः स्वेदः स्नेहपूर्वस्तथैव च॥

तथा सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रित इत्यादि। तथानाग्निकर्मोपदेष्टव्यं स्नायुमर्मसन्धिषु चेति एते च दोषाः ४८सामत्वनिरामत्वाभ्यामपि ज्ञातव्याः। यदुक्तं चरके

ऊष्मणोऽल्पबलत्वेन धातुमाद्यमपाचितम्।
दुष्टमामाशयगतं रसमामं प्रचक्षते॥४७
आमेन तेन संपृक्ता दोषा दूष्याश्च दूषिताः।
सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः॥४९
स्रोतोरोधबलभ्रंश५०गौरवानिलमूढताः।
आलस्यापक्तिनिष्ठीवमलसङ्गारुचिक्लमाः॥

कश्चित् दोषस्य गतिरेकत्वेन निर्दिष्टा निरूपिता। मर्म्म यथा बस्तिहृदयं मस्तकं प्रधानं यदाश्रित शिरः।

(४८) सामेति। सामत्वम् आमसहितत्वं निरामत्वम् आमरहितत्वं ताभ्याम् ऊष्मणोऽग्नेरल्पबलत्वेन अपाचितं अतएव दुष्टम् आमाशयगतम् आद्यं धातुं रसं आममिति प्रचक्षते कथयन्ति।

(४९) आमेनेत्यादि। तेन आमेन संपृक्ता मिलिता दोषा वातपित्तकफा दूष्या रक्तादयो धातवश्च दूषिताः येरोगास्तदुद्भवाः आमदोषोद्भवा स्तेच सामा इत्युप दिश्यन्ते कथ्यन्ते।

(५०) स्रोतरोधेत्यादि। स्रोतरोधः नाड्युपरोधः। बलभ्रंशः बलह्रासः अनिलमूढता वायु मूढत्वम् अपक्तिरपाकःनिष्ठीवः निष्ठीवनं मुखनासिकाभ्यां स्रावः।

लिङ्गं मलानां सामानां निरामाणां विपर्य्ययः
वायुः सामो[५१]विबन्धाग्नि सादस्तम्भान्त्रकूजनैः ॥
वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीडयेत् ।
विचरेद्युगपच्चापि गृह्णाति कुपितो भृशम् ॥
स्नेहाद्यैर्वृद्धिमायाति सूर्य्यमेघोदयेनिशि ।
निरामो[५२]विशदोरूक्षो निर्व्विबन्धोऽल्पवेदनः ॥
विपरीतगुणैः शान्तिं स्निग्धैर्याति विशेषतः ।
दुर्गन्धं[५३] हरितं श्यावं पित्तमम्लं स्थिरं गुरु ।
अम्लिकाकण्ठहृद्दाहकरं सामं विनिर्द्दिशेत् ।
आताम्रं[५४]पित्तमत्युष्णं रसे कटुकमस्थिरम् ॥
पक्वं विगन्धं विज्ञेयं रुचिपक्तिबलप्रदम् ।
आविलस्तन्तुलः [५५]स्त्यानः कण्ठदेशेऽवतिष्ठति ।

(५१) सामः साग्निः निरामाणां दोषाणां विपर्य्ययः विपरीत-लक्षणम् । वायुः सामेत्यादि । सामो वायुः विबन्धः बन्धनं यद्दोषः अग्निसादः अग्निमान्द्यः तन्द्रा निद्रावत् ग्लानिः अन्त्रकूजनं नाडीनाम् अव्यक्तध्वनिः । वेदनाशोथ निस्तोदैश्च क्रमशः अङ्गानि सकलशरीराणि पीड़येत् । युगपदेककालं विचरेत् वायुरामयोरिति शेषः । कुपितः सन् भृशं अत्यर्थम् अङ्गानि गृह्णाति वेदनया व्याप्नोति । स्नेहाद्यैः स्नेहक्रियाद्यैरादिना शीतल क्रियाभिः । एवं मेघो दये तथा सूर्य्योदये एवं निशिरात्रौ वृद्धिमाप्नोति ।

(५२) निरामेत्यादि । विशदः निर्म्मलः । निर्विबन्धः बन्धनभाव-रहितः विपरीतगुणैः विपरीत गुणक्रियाभिः ।

(५३) दुर्गन्धेत्यादि । हरितं पत्रवर्णम् अम्लिका अम्लोद्गारः । आताम्रेति ।

(५४) आताम्रम् ईषत्ताम्रवर्णम् ।

(५५) आविलेत्यादि । आविलः अनिर्म्मलः । तन्तुलः सूत्रवद्विस्तीर्णः स्त्यानः घन इति विश्वमेदिनी ।

शालाकलापोदुर्गन्धः सानुरुद्गारवातकृत् ॥
फेनवान् पिच्छिलः ⁽⁵⁶⁾पाण्डुर्निःसारो गन्ध एव च ।
पक्वः स एव विज्ञेयश्छेदवान बद्धपिच्छिलः ॥

अस्य प्रयोजनं सामे पाचनं निरामे शमनमिति । एते दोषाः परस्परसम्बन्धेनतरतमादिभेदेनानेकविधा भवन्ति । तदुदाहरणानि विस्तरत्वापत्ते रत्र न लिख्यन्ते। कौस्तुभदोषभेद विकल्पाध्याये द्रष्टव्यानि इति । उक्त हेतु-दोष भेदयोः संग्रहश्लोकौ । चत्वारो व्यभिचारि दूर निकट प्राधानिकत्वात् पुन स्त्रेऽसात्म्येन्द्रियकार्थ सुकपरि-णाति प्रज्ञापराधास्त्रिधाः । तद्दोषोभयकारणादपि तथा द्वौ व्यञ्जकोत्पादकौ बाह्याभ्यन्तरभेदतोऽपि कथिता हेतोः प्रभेदा अमी । दोषस्य च प्राकृतवैकृताभ्यां भेदो-ऽनुबन्ध्यादपि चानुबन्ध्यात् । तथा प्रकृत्य प्रकृतिस्वयोगात् तथाश्रयाकर्षणात् गतश्चेति । ५ ।

निदानान्तरीयकत्वात् पूर्वरूपादीनां तदनन्तरं प्राग्रूपमाह

प्राग्रूपं येनेत्यादि । द्विविधं हि पूर्वरूपं भवति

---

(५६) फेनवानित्यादि। पिच्छिलस्तन्तुवत् आकारः पाण्डुः पाण्डुवर्णः निःसारः नीरसः। इति निदानम्। निदानान्तरीयकत्वादिति। निदानस्यान्तर भावविनित्यात।

(५७) संमूर्च्छनेति संमूर्च्छनाद्भिव्याप्तिः धातवो धिष्ठान स्थानसंश्रय इति यावत्। यदुक्तं सञ्चयस्थानं चलितः क्रुद्ध इत्यादि। तथाच निदानाद्धयः चयात प्रकोपः प्रकोपात्प्रसरः प्रसरात् स्थानसंश्रयस्ततो व्यक्तिस्ततो भेद इति क्रियाकालः षट् चयः वृद्धिरिति यावत्प्रकोपः ऊर्ध्वाधस्तिर्यग् गन्तृकुम्बता। प्रसरः स्थानान्तर

सामान्यं विशिष्टञ्च तत्र सामान्यं येन दोषदूष्यसम्मूर्च्छना[57]वस्थाजनितेन भाविज्वरादि व्याधिमात्रं [58]प्रतीयते ।

नतु वातादिजनितत्वा विशेषः ।

यथा श्रमोऽरतिर्विवर्णत्वमित्यादि ।

तथा देवगुरुविप्रद्वेषादि सामान्याभिप्रायेणैव ।

तस्मान्तरं व्याधेर्जातिर्बुभूषा च पूर्व्वरूपेण लक्ष्यते

भावः क्रियाकालत्वञ्च [59]लक्ष्यते लक्षणेन तु ।

तथाहि पराशरः पूर्व्वरूपंनाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेष इति । विशिष्टं यथा ज्वरादौ लिङ्गान्येव वातादिजान्यव्यक्तानि यदुक्तं तन्त्रैव अव्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतमिति । तथा सुश्रुतः । सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात्। पित्तान्नयनयोर्दाहः कफादन्नारुचिस्तथा । हारितैरप्युक्तमिति पूर्व्वरूपमष्टानां ज्वराणां सामान्यतो विशेषात्तु जृम्भाङ्गमर्द्दभूयिष्ठं हृदयोद्वेगवातकमित्यादि । ननु

गतिः स्थानसंश्रयः भाविरोगाधिष्ठान स्थान प्राप्तिः । व्यक्तिः प्रकाशः । अयं नेत्ररोगः अयमुदररोगाकारतः । भेदः विशेषः अयं वातिकः अयं पैत्तिकः अयं श्लैष्मिकत्वादिरूपेण । यदुक्तं सञ्चयञ्च प्रकोपञ्च प्रसरं स्थानसंश्रयम् । व्यक्तिं भेदञ्च दोषाणां यो वेत्ति स भवेद्भिषक् ॥

(५८)आधेरित्यादि । आधेर्जातिं ज्वरत्वादि बुभूषामवित्तमिच्छाभावः यस्या ।

(५९)क्रियाकालत्वमिति । वातादीनां मध्येन व्याधा यस्य क्रियाकालस्वभावः क्रियाकालत्वम् । लक्ष्यते ज्ञायते । नाम इत्यव्ययं नाम्ना पूर्व्वरूपमित्यर्थः । प्रवक्ष्येतद्यापयन्ति वपुर्जीर्णमं शरत्स्य वयोरुद्राभ्यां जहोर्दिदिति रूपमेवहितेनौतेरूपम् । आपद्यतेव्याप्तां कुर्व्वन्ति ।

चार्थं व्यक्तत्वं ततश्च जृम्भादेरपि रूपत्वं प्रसज्येत यद्व्यक्ति तदेव व्यक्तता यातं रूपमित्यभिधीयत इति । उच्यते यथा-श्रमादय इतररोगव्यतिरिक्तं भाविज्वरमात्रं बोधयन्ति न तु वातजत्वादि विशेषमित्यत स्तेषामव्यक्तत्वं तथात्रापि पित्ता-दिज्वरव्यतिरिक्तं भविष्यद्वातज्वरमात्रं बोधयन्ति जृम्भादयः । न तु वातस्य रूक्षशीत धातुक्षयावरणादि जन्यत्वरूपविशेषं बोधयन्ति इत्यतोऽव्यक्त वातज्वर बोधकत्वादव्यक्तत्वमेव जृम्भादीनामिति जेज्जटवाप्यचन्द्रमाधवकार्त्तिककुण्डादयो व्याचक्षते । अन्येत्वाहुः । प्रभूताव्यक्त[१०] पूर्व्वरूप सहचरित व्यक्तस्यापि जृम्भादेः पूर्व्वरूप व्यपदेशः । यथा मायराशिच्छत्रिणो गच्छन्ति इत्येवमादि । न च व्यक्तत्वेन रूपादभेदः । नियमेन पूर्व्वरूपरूपयो-[११] र्भाविव्याधि वर्त्तमानव्याधिबोधकत्वादिति । अत्र विशिष्ट पूर्व्वरूपं रूपावस्थायामनुवर्त्तत एव । तस्यैवाभिव्यक्तस्य रूपत्वात् । न तु दोषदूष्यसम्मूर्च्छनावस्थाजनितं रोमहर्ष-वाक्यमर्द्दादिकं नियमेनानुवर्त्तते । यद्यनुवर्त्तते तदा

---

(१०)प्रभूतेति । प्रभूतः योऽव्यक्तः पूर्व्वरूपस्तस्य सहचारिणः । पूर्व्व-रूपव्यपदेशः पूर्व्वरूपमितिसंज्ञा ।

(११) नियमेन पूर्व्वरूपेति । नियमस्यावश्यकता । तथाच यत् पूर्व्वरूपं तद्भाविव्याधिबोधकमेव एवं यद्रूपं तद्वर्त्तमानव्याधिबोधकमेव-भवतीतिभावः । वाक्यशेषाकाङ्क्षात् कारकसम्बन्धात् । तस्मादेवार्थ-विवृतमिच्छुः ।

(१२)दोषविशेषेणेति । दोषपदेनात्र दोषकार्य्यः कार्य्यकारणयोरभेदोप-चारात् कार्य्यं दोषेणानुमीयतेऽव्याविकृतमात्रा कार्य्यत्वमापद्यत इति चट शब्दार्थः । तस्य विशेषः वैषम्यादि तेन इत्यभिप्रायः वातादिजन्योऽव्यक्तो । ननु दोषविशेषपदेन वातादि दोषाणामव्यक्तमेव उच्यते कथं वैषम्या-

सर्वज्वराणाम् असाध्यत्वं प्रसज्येत एतदभिप्रायेण पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया। यं विशन्ति विशत्येनं मृत्युर्ज्वरपुरःसर इति चरकवचनमित्याहुः। तदेव द्विविधे पूर्वरूपे व्यवस्थिते सामान्यं पूर्वरूपमाह प्राग्रूपं येन लक्ष्यते उत्पित्सुरामयो दोषविशेषेणानधिष्ठित इति येन प्रमादिना उत्पित्सुः सामग्रीसाकल्यादुत्पादेच्छुरामयो रोगः दोषविशेषेण (१२)वातादिजन्यासाधारणवेपथ्वादिना अनधिष्ठितोऽसम्बन्धो लक्ष्यते ज्ञायते तत्प्राग्रूपमिति। विशिष्टप्राग्रूपमाह लिङ्गमव्यक्तमल्पत्वात् व्याधीनां तद्यथायथमिति। प्राग्रूपमित्यनेन पूर्वोक्तेन सम्बन्धः। लिङ्गम् लक्षणं अव्यक्तं नात्यभिव्यक्तम् अत्र हेतुरल्पत्वात् अपटुत्वात् नत्वावरणादियोगादव्यक्तत्वमित्यर्थः। यथा यथं यस्य व्याधे यद्रूपं तदेवाव्यक्तं तस्य पूर्वरूपमित्यर्थः। अन्ये तु पूर्वरूपलक्षणमाहुः।

स्थानसंश्रयिणः क्रुद्धा भाविव्याधिप्रबोधकम्।

दोषाः कुर्वन्ति यल्लिङ्गं पूर्वरूपं तदुच्यते॥ इति

तन्नातियुक्तं राजयक्ष्मणः पूर्वरूपस्य स्वप्ने शकुनिपातादेरदृष्टजन्यस्याव्यापकत्वात्। यदाह चरकः।

दिर्व्याख्यातः। अत्रोच्यते कार्यरूप वेपथ्वादि मन्तरेण तत् कारण स्वरूपवातादि विशेषो नानुमीयते अतो वेपथ्वादिनाऽनधिष्ठितमपि रोगमात्रबोधकत्वेन पूर्वरूपस्य दोष विशेषाबोधकत्वं सुगमम्। भाविपदार्थस्य अतिप्रसङ्गादतिव्याप्तेः। निष्ठीवं याङ्कर्णं निष्ठ्वया। अवच्छेदः पदेः।

(१२) वातादिद्वन्द्वादि। आदिना योगमूलमेतं न वदेत् यथेहं रक्तस्य पित्तस्यादि सम्प्रबोधः। अतो वाद्यपथे द्वितीये द्वितीयपथे।

यक्ष्मिणां धूमकेशानां दन्तानां पतनानि च । प्रावीऽस-
पाने केशानां नखानाञ्चाभिवर्द्धनमिति नच तदपि दोषजं
दोषाद्दे कूपादिभिरसम्बन्धत्वादिति । असम्बन्धस्य च
नावस्य कारणत्वेनादृष्टत्वात् परम्परया तु सम्बन्धकल्पन
यातिप्रसङ्गात् सर्व्वं सर्व्वस्य कारणं स्यादिति । तद्दोष
परिजिहीर्षया परमकुशलेन वाभटेन अदृष्टदोषजसर्व्वं
पूर्व्वरूपोपसंग्राहकं येनेति पदं निबन्धमिति मत्वा
तदीय पूर्व्वरूपलक्षणं माधवकरो लिखितवानिति ।
सङ्क्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्व्वरूप
मिति । एवंप्रकारेण निदानोपशययोः संप्राप्तेश्च दोषेति
कर्त्तव्यतारूपाया व्यवच्छेदः । अजातोत्पन्नानामनु
त्पन्नव्याधिबोधकत्वात् । तथाहि निदानं स्वस्वलक्षणरूपं
भाविपाण्डुरोगं मनुष्यपयश्च वर्त्तमानविशिष्टव्याधिं
बोधयति उपशयो हि पूर्व्वरूपावस्थःप्रयुक्तभावि विशिष्ट
व्याधिं ज्ञापयतिरूपावस्थाप्रयुक्तश्च वर्त्तमान विशिष्टव्याधिं
गमयति संप्राप्तिश्च पूर्व्वरूपस्य मध्यावस्थादावुत्पत्ति प्रको
पाभ्यां भविष्यत् विशिष्टव्याधिं रूपेण मध्यान्तकोपादिना
वर्त्तमानव्याधिम्। ज्ञापयतीत्येवमुत्पन्नानुत्पन्नव्याधिबोधक
त्वम्। ननु यदा पूर्व्वरूपविशेषं ज्ञात्वोत्पन्नस्य व्याधेर्विशेषाव-
धारणं तदापूर्व्वरूपमपि वर्त्तमानव्याधिबोधकम् । यदोक्तं

---

(१४) अनुभवाभावादिति । अनुभावस्याभावात् । अनुभवो हि-
स्मृति भिन्नज्ञानं तच चतुर्विधः प्रत्यक्ष अनुमिति उपमिति शाब्दश्च ।
तत्र स्मृतिजनक संस्कारहेतुः । तथाच अनुभवजन्य स्मृतिहेतुः संस्का-
र इति संस्कारलक्षणम् । न प्रतिभातं न ज्ञातं प्रतिभाशब्दो बुद्धि
विशेषे वर्त्तते । अज्ञाततात् गततात् । कारणं न प्रमाणमिति । प्रमा-

उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः ।
लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम् ॥ ६ ॥

रक्तपित्तप्रमेहरूपमन्ते ह चरकेण हारिद्रवर्णं रुधिरञ्च मूत्रं विना प्रमेहस्य हि पूर्व्वरूपैरित्यादि । ननूच्यते किं व्याधिजन्मनः पूर्व्वं पूर्व्वरूपं गृहीतं नवेति । आद्ये भाविव्याधिबोधकत्वमेव, द्वितीये स्मरणोत्पत्तिरेव न स्यात् अनुभवाभावात्[१४] । अथोच्यते पूर्व्वरूपं दन्तादीनां मलाढ्यत्वमित्यादि रूपं स्वरूपेणानुभूतमेव किन्तु प्रमेहपूर्व्वरूपतया न प्रतिभातम् । उत्पन्ने तु व्याधौ तत्स्मृतं प्रमेहविशेषमवधारयति एवं तर्हि पूर्व्वरूपस्मरणं कारणं न तु पूर्व्वरूपम् । रूपावस्थायां पूर्व्वरूपस्य व्यपगतत्वात् स्मरणं न प्रमाणमिति चेत् सत्यं किन्तु स्मरणसहकृतं रूपं व्याधिविशेषबोधकं न तु केवलं स्मरणं यथा संस्कारोपस्थापित स्मरणसहकृतं चक्षुः प्रत्यभिज्ञायां प्रागवस्थाविशिष्ट घटावबोधकं सोऽयमिति घटः । एवं स्मरणवद्रूपोपदेशोऽपि[१५] वाच्यः तस्य लिङ्गपदेन व्युदासः । भाविपदेन

सत्यं हि अगृहीतग्राहित्वं स्मरणान्यगृहीतग्राहीति अतोन प्रमाणमिति । प्रशस्तिपादभाष्ये अभिज्ञानसमये ।

(१५) स्मरणवदिति । स्मरणे यद्रूपेण व्याधिबोधकताभिव्यक्ताप्तोपदेशेऽपि तद्रूपे नेतीति वाच्यम् । तस्याप्तोपदेशस्य व्युदासः निरासः । इति पञ्चरूपम् । पूर्व्वरूपमिति पूर्व्वरूपमात्रं केचित्तु तदितिविशिष्ट पूर्व्वरूपमेव तच्छब्दस्य सन्निकृष्टस्यविशिष्ट पूर्व्वरूपस्यैव परामर्शकत्वात् । अव्यक्तस्य व्यक्ताभिव्यक्तत्वाच्च । तत्र पूर्व्वरूपाणां ज्वरादीनां रूपावस्थायामनुवर्त्तनात् । अतीसारादौ दौर्बल्यंचा-

तदेव व्यक्ततां यातं रूपमित्यभिधीयते।

रूपस्य च लिङ्गपदेन ज्वरादेः सत्त्व घटस्थानादेः साधा-
रणत्वेन लिङ्गत्वात्। असाधारणं हि लिङ्गं भवति
एतच्च पूर्व्वरूपमविद्यमानस्य व्याधेर्लिङ्गं भवत्येव यथा
विशिष्टमेघोदयो वृष्टेरिति पूर्व्वरूपम्॥ ६॥

यद्यपि पूर्व्वरूपानन्तरं संप्राप्तिर्भवति तथापि व्याधि
स्वरूप ज्ञानार्थं रूपमाह। तदेवेत्यादि। तदेव तत्पूर्व्वरूपं
व्यक्तता मुद्भूततामिति। ननु व्यक्तत्वं पूर्व्वरूपस्य किं का-
र्त्स्न्येनैकदेशेन वा। आद्ये सर्व्वज्वरादेरसाध्यत्वं स्यात्।
यदुक्तं पूर्व्वरूपाणि सर्व्वाणीत्यादि। द्वितीये हि जृम्भा-
त्यर्थं समीरणात् पित्तान्नयनयोर्दाह इत्यादेरपि रूपत्व-
प्रसङ्गः। नैवं अनभ्युपगमात् न कार्त्स्न्यस्य नाप्येकदेशस्य
किन्तु अनिर्द्धारितैकत्वानेकत्व विशेषस्य पूर्व्वरूपमात्रस्य

दि निर्द्दिष्टतद्व्याधि मधिकृत्य। ननु श्रमादीनां तदानीमव्यक्तानामि-
दानीं व्यक्तानामनुवर्त्तनम्। किंवा तेषां व्याधि पूर्व्वरूपावस्थायां व्यक्ता
नामव्यक्तानां वा रूपावस्थायामपि तदवस्थानामेवानुवर्त्तनम्। आद्ये
सामान्यत्वानुपपत्तिर्विशिष्टत्वापत्तिश्च। द्वितीये रूपत्वाद्योगः अव्यक्त-
वत् पुनर्व्यक्ततां यातं तस्य रूपत्वेनाभिधानात्। नैवं श्रमादीनां सर्व्वेषां
पूर्व्वमेवाव्यक्तानामपि रूपावस्थायां पूर्व्वरूपावस्थापेक्षयाऽतिव्यक्तानाम-
नुवर्त्तनाददृष्टत्वमेवैतदभिप्रायेण पूर्व्वरूपाणि सर्व्वाणीत्याद्युक्तम्। कति-
पयानान्तु जृम्भादीनां पूर्व्वमेव व्यक्तानामपि रूपावस्थायां तदवस्थानामपि
प्रभूताऽपरव्यक्तरूप सहचरितत्वेन छत्रिणो गच्छन्तीति न्यायेन पूर्व्वरूप-
वद्रूपत्वमेव। विशिष्ट पूर्व्वरूपाणामव्यक्तत्वेऽपि ज्वरादीनां सर्व्वथा मनुव-
र्त्तनादपि नव्याधीनामसाध्यत्वम्। यत्तु सन्निपातज्वरादौ सर्व्वसंपू-
र्णलक्षण योगेनासाध्यत्वमुक्तं तद्व्याधि महिम्ना वर्द्धते दुश्चिकित्सि-

संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृति ॥७॥

व्यक्तस्य व्याधेर्लिङ्गत्वमिति । यथा तार्णपार्णादिविशेषणं विरहेण धूममात्रस्य वह्निबोधकत्वम् । एवं व्यवस्थिते यदा सर्व्वस्याभिव्यक्तिस्तदा न साध्यत्वं अन्यथा तु साध्यत्वम् । नच अश्मादौ रूपत्वप्रसङ्गः तस्य प्रागेव व्यक्तत्वात् अव्यक्तं यदुपलक्षितं यातं तस्य रूपत्वेनाभिधानात् । अपरः प्रभूताव्यक्तलिङ्गसहचरितत्वेन पूर्व्वरूपरूपयोरसमानकालत्वेन च रूपत्वायोगादिति । ईश्वरसेनस्त्वाह । ११व्याधेः स्वरूपं यद्व्यक्तं तद्रूपमिति तन्न विकल्पासहत्वात् तथाहि स्वरूपमिति किं स्वरूपम् आहोस्वित् स्वीयं रूपं स्वीयमपि धर्म्मो वा कार्य्यं वा न तावत् स्वरूपं स्वात्मनिक्रियाविरोधात् रूपं हि व्याधिप्रतिपत्तिनिमित्तमुक्तं नच्चैतत् व्याधिस्वभाव एव तर्हि व्याधिस्वभावादेव व्याधिस्वभावः प्रतीयत इति व्यक्त स्वा-

---

रोलोठनाद्युरिह योगेनवृत्तिबोध्यम् । कार्त्स्न्यं न साकल्येन । अभ्युपगमात् स्वीकारात् । तार्णस्तृणजन्यः । पार्णः पर्णजन्यः ।

(११) व्याधेस्स्वरूपमिति । व्याधेर्यत् स्वरूपं व्यक्तं तद्रूपं विकल्पासहत्वादिति । कस्यचित् पक्षस्यापि सहनानर्हत्वात् । आहोस्वित् स्वीयरूपमित्यादि । आहो विकल्पे स्वितप्रश्ने । आहो उताहो किमुत विकल्पे किं किमूतच स्वित् प्रश्न वितर्कयोः इत्यमरः । नतावत्स्वरूपमिति । तावदित्यवधारणे । नैवस्वरूपमित्यर्थः । स्वात्मनिक्रियाविरोधादिति । आत्मानं स्वात्मा स्कन्धोऽप्यस्ति तथाचनैषधे खरेवच स्वात्मपरासनाच्छदति अत्रश्लोके टीका कर्त्रा मल्लिनाथ व्याख्यातम् । व्याधिः स्वभावादेव व्याधिस्वभावः प्रतीयत इत्याशयः । व्याधिस्वभावस्य प्रतीतिजनने व्याधिस्वभावस्यैव हेतुता स्वीकारे स्वात्म

अपि क्रियाविरोधः। नापि धर्म्मिचरकोक्त लक्षणत्वकृच्छ्रसाध्यत्वमित्यादेर्धर्म्मिणो रूपत्वानुपपत्तेः। नहि लक्षणत्वकृच्छ्रसाध्यत्वादिकम् धर्म्मिणो धर्म्मः अतन्निष्ठत्वात् धर्म्मस्य धर्म्मिनिष्ठत्वात्। अन्यथातिप्रसङ्गात्। नापि कार्य्यमुपद्रवादेरपि रूपत्वप्रसङ्गात् तदपि कृच्छ्रसाध्यासाध्यव्याधिलिङ्गमिति चेन्नैवम् असाध्यत्वादेस्तल्लिङ्गत्वं नतु व्याधेस्तस्य पूर्व्वमेव ज्ञापत्वात् भेदेनोपदानाच्च यदुक्तं सोपद्रवारिष्टनिदानलिङ्गो निबध्यते इत्यादि। ननु उपद्रवो न व्याधिकार्य्यं किन्तु व्याध्यारम्भक दोषस्य यदुक्तं सुश्रुते। स तन्मूलमूलक एव उपद्रवसंज्ञक इति व्याचक्ष्यते टीकाकृतः। तन्मूलं मूलं यस्य स तन्मूलमूलक इति नैवम् अपचारेण मूलभूत(१७) दोषोपष्टम्भेण लब्धबलस्तद्व्याधिरुपद्रवं करोति तेन तन्मूलमूलक इत्युक्तवान्। अतएवाह चरकः कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यतीति। सर्व्वमेतत् स्वरूपशब्देन वाच्यं क्वचित् किञ्चिदिति त-

---

भूताभिधाकर्त्तृकक्रियाया आपत्तिः स्यात्। व्यक्तः स्पष्टः। अनुपपत्तेरसङ्गतेः। अतिप्रसङ्गादतिव्याप्तेः। प्रसङ्गात् सङ्गतेः। तस्य-व्याधेः।

(१७) मूलभूतेति। मूलभूतदोषस्य उपष्टम्भेन दृढ़ावलम्बनं बलं येन स व्याधिः। नव्यभिचारः न दोषः। आपत्तेः प्रसक्तेः न च रूपस्य रूपव्यतिरेकेण व्याधिरधिगम्यत इत्यनेनान्वयः। व्याधेः स्वरूपमाह। तथाविधदोषदूष्याणि। चरकेन तु स्वधातुवैषम्यनिमित्तजा ये विकारसमूहास्ते शरीरे न सङ्घक् पित्तकफानिलेभ्य आगन्तवस्तु ते ततोऽनिमित्ताः। अस्यायमर्थः स्वमिति शरीरं धातवोऽत्र वातादयः। चरके दोषा अपि धातुसंज्ञां लभन्ते। तथाचोक्तं शरीरं दूषणाद्दोषा मलिनीकरणान्मलाः। धारणा द्धातवस्ते तु वातपित्तकफास्त्रयः।

वा सति न व्यभिचार इति केचित्तु तदपि व्यवस्थामात्रं न तु लक्षणम् एकस्य सकलरूपसंग्राहकस्य धर्मस्याभावादुपद्रवस्यापि व्याधिस्वरूपत्वापत्तेश्च इति तस्मादुत्पन्नव्याधिबोधकमेव लिङ्गं रूपमिति लक्षणम्। उत्पन्न इतिपदं पूर्व्वरूपव्यवच्छेदार्थम् एवकारेण निदानसंप्राप्त्युपशया व्यवच्छिद्यन्ते। तेषां उत्पन्नानुत्पन्नव्याधिबोधकत्वात् तच्च दर्शितमेव लिङ्गपदेन चक्षुरादेर्व्युदासः। यस्मात् व्याधिजन्मरूपा संप्राप्तिरुच्यते तस्याः संप्राप्तेर्लिङ्गपदेन व्यवच्छेदः। नहि सा व्याधिज्ञाने लिङ्गं किन्तु कारणमात्रम्। शास्त्रव्यवहारार्थं निदानवल्लक्षणार्थस्य रूपपर्यायमाह। संस्थानमित्यादि। ननु रूपेण व्याधिर्ज्ञायते। न च रूपव्यतिरेकेण व्याधिरुपलभ्यते यतो मिलिता सन्तापादयः एव ज्वरः। कामाद्येकादश रूपाण्येव

धातुवैषम्यञ्च तन्निमित्तञ्चेति समासः। तद्रोगा पित्तकफानिलेभ्य एवोत्पद्यन्त इति पित्तकफानिला एव कार्यकारणयोरभेदोपचारात्। यथान्नदेहस्यान्तरं पाकघटत्वेन परिणमति। चरकेऽपि कार्ययोनिस्तु या मा विक्रियमाणा कार्यत्वमापद्यते। तथागन्तोर्ज्वरस्यान्तरगमनमेव जन्मोच्यते। आगन्तवस्ततोऽभिघातादिति। शारीरेतोभिन्नाः आगन्तूनां दण्डादिनिमित्तजत्वेन धातुवैषम्यनिमित्तजत्वाभावात्। नन्वागन्तुषु द्रव्यस्य लक्षणमगुणत्वेऽपि गुणवद्द्रव्यमिति द्रव्यलक्षणवत् पुनर्धातुवैषम्यं जडस्य अपगमस्याविशेषेण वर्त्तमानत्वात् कथं धातुवैषम्यनिमित्तजत्वाभाव उच्यते आगन्तुषु धातुवैषम्यस्य कथञ्चिन्निमित्तत्वेऽपि दण्डादीनां विशेषेण निमित्तत्वाद्दण्डादिनिमित्तजत्वस्य व्यपदेशः अन्यथानिमित्तपदं व्यर्थं स्यात्। तस्माद्वैषम्यसाम्यावस्था भिन्नावस्था विशेषवद्दोषत्वं रोगत्वमिति शास्त्रे। नैयायिकास्तु द्रव्यत्वेतरेति दोषभिन्नदोषजन्यत्वं रोगत्वम्; द्रव्यत्वेनानेन तद्गतगुणकर्मणस्तत् प्रत्यक्षस्य च निरासः

यस्मा उच्यते नैवं तथाविध दोषदूष्य संमूर्च्छनावस्थाविशेषो ज्वरादिरूपो व्याधि स्तत्कार्य्यास्तापज्वरादयः किञ्च। सन्तापादय एव प्रत्येकशो रूपाणीति तत्समुदायो व्याधिः यतः समुदायिभ्योऽन्य एव समुदायः यथा खदिरतरूणां वनमिति अन्ये तु राहोः शिरः शिलापुत्रस्य शरीरमितिवत्। असत्यपि भेदे भेदविवक्षया समर्थयन्ति। नैयायिकास्तत्रापि भेदमुपपादयन्तीति ननु विकारो दुःखमेव पति चाकाशवनात्। दुःखस्यात्मगुणस्य च च-

---

दोषभिन्नत्वेन समविषमदोषजन्य धातुसाम्य धातुवैषम्यस्य निरासः। दूष्यत्वेप्रमाणमाह चरकः। अतस्त्रिविधा व्याधयः प्रादुर्भवन्ति आग्नेय वायव्य सौम्याश्चेति। कृत्स्नाकर्तृत्व सामान्यादेक एवगदो मतः। निजागन्तु विभेदेन रोगस्तु द्विधामतः। शारीरो मानसश्चैव स द्विधाश्रयभेदतः। सामान्यजाः मताः केचित् केचिन्नानात्मजा मताः। सामान्यजाश्च सामान्य दोषजाता ज्वरादयः। नानात्मजाश्च दाहाद्यास्ते भिन्नात्म दोषजाः। कर्म दोषोद्भवत्वेन व्याधिरेव द्विधामतः। सुखसाध्य कृच्छ्रसाध्य याप्य प्रत्याख्येयाश्चतुर्विधाः। अस्यायमर्थः। सुखेनोपायैः साध्यते निवर्त्तते यः सुखसाध्यः कृच्छ्रे उपायैर्यत्नेन कृच्छ्रसाध्यः।

याप्यः यापयति पालनं यापनीयः नतु निःशेषं निवर्त्तनीयः। प्रत्याख्येयः निराकरणीयः प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिरित्यमरात् अचिकित्स्य इति यावत्। यदुक्तं नेमकृत्तन्त्र साध्यानां चिकित्सन्ति भिषग्वराः। अतो वैद्यैः श्रमः कार्यः साध्यासाध्यपरीक्षणे इति। ननु तावत् प्रतिक्रियाकालौ यापयस्तमिति मानवः। कदाचिद्दैवयोगेन हन्तारिष्टोऽपि जीवति। तद्यत्नात्साध्यत्वं सन्दिग्धं प्रकृतम्। साध्यासाध्यत्व भावानि यान्ति नत्वन्य साध्यताम्। प्रतियाप्योऽवस्थान्तरात् प्रत्याख्यानक्रियायोग्यामिति दिक् अथ प्रकृतमनुसरामः। कथयन्ति निष्पादयन्ति। उपपन्नयन्ति यक्तीभि र्युक्तिभिः प्रतिपादयन्ति।

हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थकारिणाम् ।

मलज्वरादि समुदायित्वं नैवं दुःखयतीति[१८] दुःखमिति व्युत्पत्त्या दुःखहेतौ धातुवैषम्यादौ व्याधित्वस्वीकारात् । ज्वरादयस्तु स्वरूपेण विकारा एव यदा अन्यप्रतिपादकास्तदा लिङ्गान्युच्यन्ते । यदाह चरकः ।

ज्ञानार्थं[१९] यानि चोक्तानि व्याधीनां लिङ्गसंग्रहे ।
व्याधयस्ते तदात्वे तु लिङ्गानीष्टानि नामयाः इति ॥७॥

उपशयमाह हेतुव्याधीत्यादि । हेतुर्बाह्योऽभ्यन्तरश्च व्याधिर्ज्वरादिः ॥ एतयोर्हेतुरोगयोर्व्विपर्य्यस्तयोर्व्विपर्य्यस्ता विपरीता एतयोरेव विपर्य्यस्तार्थकारिणो निदानसमानधर्म्मिणोऽपि प्रभावात् रोगप्रशमकारिणः एवंविधा ये औषधान्नविहारा भेषजाहाराचारास्तेषामुपयोगमाच पथ्यं सुखावहं सुखकरमुपशयं विद्यात् उपशयाख्यं जानीयात् व्याधेस्तस्य पर्य्यायमाह संहितात्म इति ख्यात इति चरकेऽप्युक्तं सात्म्यार्थोह्युपशयार्थ इति हि शब्दः पादपूरणे सुखानुबन्धमिति सुखं रोगनिवृत्तिलक्षणं यथा लोके व्यपदिशन्ति भारापगमे सुखिनः संवृत्ताः स्म इति ।

(१८) दुःखयतीति । दुःखयति यद्दुःखं दुःखहेतुधातुवैषम्यं विकार इत्यर्थः । तथा च रोगस्तु धातुवैषम्यं धातुसाम्यमरोगतेति ।

(१९) ज्ञानार्थमित्यादि । अस्यायमर्थः । व्याधीनां लिङ्गसंग्रहे ज्ञानार्थम् अर्थाद्व्याधेः ज्ञानार्थं यानि च उक्तानि ते व्याधयः तदात्वे त्विति । अन्याधिरेवात्मा यस्य तदिदम् भवति तानि लिङ्गान्येव इष्टानि वाञ्छितानि न तु आमयाः । लिङ्गस्वरूपाणां विकाराणां रोगात्मकत्वमेवं स्वीकृतम् । यदाह तदात्मकानेव सर्व्वविकारान् नामे योपदिशन्ति

औषधान्नविहाराणामुपयोगं सुखावहम् ।

तत्सुखमावहति अव्यग्रतयानुबन्धेन करोति इति सुखावहम्। एतेन सद्यः तृष्णानवज्वरिणः शीतजलपानं तत्कालसुखकरमपि नोपशय इति तात्पर्य्यार्थः। अत्रौषधान्नविहाराणामित्युपलक्षणं तेन देशकालावपि बोद्धव्यौ अतएव वृद्धवाग्भटेन व्याध्यादिकमभिधाय एतेन देशकालावपि व्याख्याताविति व्याख्यातम्। सुदान्तसेनोऽपि आह सुखानुबन्धी यो हेतुव्याध्यादिविपरीतकः देशादिकश्चोपशयो ज्ञेयोऽनुपशयोऽन्यथेति। अस्मन्मतस्तु लक्षणम्॥ औषधादिजनितः सुखानुबन्ध उपशय इति। स्रक्चन्दनवनिताद्युपभोगजनितसुखनिवृत्त्यर्थमौषधादिपदम् अनुबन्धशब्दश्च अपथ्यजनिततदात्वसुखनिवृत्त्यर्थम् एतदपि उदाहरणदर्शनमात्रम् औषधादीनां हेत्वादिविपरीतानां परस्परव्यभिचारेण लक्षणत्वायोगात् सम्यग्व्याधिजनितदुःखोपशमनहेतुरुपशयः सात्म्यमुपशय इति वा लक्षणम् औषधजनितसुखानुबन्ध उपशय इति वा। चरके आहाराचारदेशकालर्त्वादीनां द्रव्याद्रव्यभूतानाम् औषधत्वेनाभिधानात्। एषामुदाहरणानि अत्र हेतुविपरीतमौषधं यथा शीतकफज्वरे शुण्ठ्यगुरूष्ण-भेषजं यदुक्तम्

---

* सुद्रिमत इति। तदात्व इति अवकारपाठोऽयं क्वचिद्दृश्यते क्वचि-त्परक प्रमादजन्य एवेति मन्तव्यम्। व्याधीनां विशुषंपव स्थाने व्याधिचिह्नानि संपक्व इति पाठोऽपि। इतिरूपम्।

विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः ॥८॥

शीतेनोष्णकृतान् रोगान् शमयन्ति भिषग्विदः ७०।
ये च शीतकृता रोगास्तेषामुष्णं भिषग्जितमिति ॥

अन्नं यथा श्रमानिलजे ज्वरे रसौदनम् ७१। विहारो यथा दिवास्वप्नोत्थे कफे रात्रौ जागरणमिति। अथ

विपरीता नाशका इति यावत्। व्यपदिशन्तीति आचार्यगणे वक्तिनः संप्रदायाभिज्ञा इतिवाक्य प्रयोगं कुर्वन्ति। तदुपशयं रोगनिवृत्ति कारणम्। आयत्यनुबन्धेनेति। आयतिरुत्तरकालः। आयतिस्तु-त्तरकाले प्रभावागामिकालयोरिति मेदिनी विश्वे। अनुबन्धः सम्बन्धः आयत्या अनुबन्ध आयत्यनुबन्धस्तेन उत्तरकाल सम्बन्धेन दीर्घकाल स्थायित्वेनेति यावत्। तदात्वं सुखकरमिति तत्काल सुखकरमित्यर्थः। तत्कालस्तु तदात्वं स्यादित्यमरः।

सुखानुबन्धमित्यादि। सुखम् अनुबध्नाति दीर्घकालं व्यापक-रोतीति हेत्वाद्यादि विपरीतकः सुखकरोऽप्यौषधादि हेत्वादिकम् उपशयो मत इत्यन्वयः। यद्यपि औषधादेराचरणम् उपशयलक्षणा-न्तर्गतमभेदोपचारात् आचरित औषधादेरुपशयत्वं बुध्यम्। औषधादिजनित सुखम् अनुबध्नाति दीर्घकालं व्याप्तं करोतीति सुखानुबन्धः औषधादिजनित सुखानुबन्धोऽप्युपशयः। उपशयो इति अवच्छेदार्थं प्रभेदार्थम्। परन्तु अभि-चारः यत्रौषधजनितत्वं तत्रनाशादि जनितत्वमिति यत्र न तत्कजनितत्वाभावात्।

(७० भिषग्विद इति। वैद्येषु ज्ञानिनः। भिषग्जितमिति भिषजां भयो यस्मात् तत् भिषग्जितम् औषधम्।

(७१) रसौदनमिति। रसोऽत्र मांसरसस्तेन सिद्धमोदनं। दोषप्रशमनीयं दोषनाशकमितियावत्। अरण्यवनौ

व्याधिविपरीतमौषधं यथा अतीसारे स्तम्भनं पाठादि तथा शिरीषो विषं हन्ति खदिरं कुष्ठं हरिद्रा प्रमेहमिति। नैते दोषमपेक्षन्ते प्रभावाद्रोगप्रशमनकारित्वात्। वाग्भटस्त्वाह ज्वरादिव्याधिहरस्य यद्द्रव्यं तदपि दोषप्रत्यनीकं किन्तु दोषप्रत्यनीकादस्यायं भेदः। यद्दोषप्रत्यनीकं तन्नावश्यं व्याधिहरं यथा वमनलङ्घने कफहरे न तु कफगुल्मं हरतः। उक्तं हि चरके कफे लङ्घनसाध्ये तु कर्त्तरि ज्वरगुल्मयोः। तुल्येऽपि देशकालादौ लङ्घनं नच सम्मतमिति। तथा न वामयेत्तैमिरिकं न गुल्मिनं नचापि पाण्डुरोगिणमिति॥ यत्तु व्याधिहरं तदवश्यं दोषहरं तद्व्याधिं शमयेत्तदारम्भकदोषस्य शमनत्वम्यथा सरोगोऽजित एव नस्यात् कारणतादवस्थ्यादिति[७२] तन्नातिसङ्गतमित्यन्ये। यतो दोष एव समवायिनिमित्तत्वात्[७३]। नच समवायिनिमित्ताभावप्र-

निमित्तयोरित्यर्थः। कफो न लङ्घनीयः स्यान्निरिति ज्वर गुल्मयोरिति वचनात्।

(७२) कारणतादवस्थ्यादिति। कारणस्य एव रोगोत्पादकस्य अवस्थायाः तदवस्थस्य अभावत्वादवस्थ्यत्वात्।

(७३) समवायीति। समवायिकारणम्। यत्र समवेतं कार्यं भवति तत्। यदिति यस्मिन्। असमवायिकारणं हि तन्त्वसंयोगमिति। अत्र समवायिकारणे आरब्धं प्रत्यायतं वायव्यानव तदित्यर्थः। दुष्पादेयः दुष्प्राप्यः। शीतवातोत्थे ज्वरे पेया। तद्वच्च यथा वातदर्पपद्मे नीरे रक्तवान्यादितिः लता। दूवाधिका सत्त्वविदया पञ्चामोक्षा भिषग्वरैः। उपनाहः प्रलेपद्रति मेदिनी। प्रत्याकृष्टं कृत्स्नम्। चिराद्युक्ति चिरस्थितिः। रोमाञ्चको रोमविकारः। विलापनेन विद्रापनेन उदीर्यते वर्द्धते। व्यापनीकरोति निवर्त्तोति

दण्डो विनष्टेन कार्य्याभावः । किन्त्वसमवायिकारणाभा-
वप्रयुक्तोऽपि यथा कपालद्वयसंयोगस्यासमवायिकारण-
स्याभावात् घटाभावः । तथा रोगेऽपि संप्राप्तिघटकस्य
संयोगस्य विनाशात् रोगस्यापि विनाशः । दोषस्तु स्वयं
क्रियान्तरेण वा निवर्त्तते । किञ्च यदि व्याधिप्रत्यनीक-
मौषधं दोषं निवर्त्तयेदिति स्वीक्रियते तद्दोषप्रत्यनी-
काद्धेतोरुपशयः स्यादिति । ननु यदि निमित्तकारणं
दोषः स्यात् कथं तदारब्धविकारेषु वमनादिना दोषहरणं
विधीयते नहि दण्डकुलालाद्युच्छेदे घटोच्छेद इति ।
उच्यते यत्र यावन्निमित्तकारणस्थायि कार्य्यं तत्र निमित्त-
कारणविनाशादपि कार्य्यविनाशः । यथा वर्त्तितैलवि-
नाशाद्दीपनाशः । तथाभूताश्च दोषाः प्रायश इति ।
अन्नं यथा अतीसारे स्तम्भनं मसूरादि । विहारो
यथा उदावर्त्ते प्रवाहणम् । मन्त्रौषधिविधारणमङ्गलोप-
हारनियमप्रायश्चित्तहोमादिगुरुदेवताशुश्रूषादयोऽपि
व्याधिविपरीताविहारा इति वाप्यचन्द्रः । तत्र हेतु-
व्याधिविपरीतमौषधं वातशोथे दशमूलं वातघ्नं सर्व-
शोथहरञ्च । यदुक्तं चरके । यावन्त्येतानि वातह-
राणि शोथहराणीति । अन्नं यथा वातकफहन्त्री
तक्रं शीतवातोत्थे ज्वरे पेयाद्यपि उष्णवीर्य्यत्वात् वातं
हन्ति प्रथमात् ज्वरञ्च यदुक्तं चरके ज्वरघ्नी ज्वरसात्म्यत्वा-
दिति । सुश्रुते च ज्वरे पैत्तातिसारे च यवागूः सर्वदा
हि हितेति । विहारो यथा स्निग्ध दिवास्वप्नजातायां
कफतन्द्रायां च । रात्रौ कफतन्द्राविपरीतं जागरण-

मिति। अथ हेतु विपरीतार्थकारीणि। औषधं यथा पित्तप्रधाने पच्यमाने व्रणशोथे पित्तकर उष्ण उपनाहः। अन्नं यथा तत्रैव व्रणशोथे अन्नं विदाहि। विहारो यथा वातोन्मादे त्रासनमिति व्याधिविपरीतार्थकारि औषधं यथा छर्द्यां वमनकारकं मदनफलम् अन्नं यथा अतीसारे विरेचनार्थं क्षीरम्। विहारो यथा छर्द्यां वमनार्थं प्रवाहणमिति। उभय हेतुव्याधिविपरीतार्थकारीणि औषधं यथा। अग्निदग्धे उष्णोऽगुर्वादिलेपः विषे च विषम्। अन्नं यथा मद्यपानोत्थे मदात्यये मदकारकं मद्यं विहारो यथा व्यायामजनितसंमूढवाते जलप्रतरणरूपव्यायाम इति। ननु छर्द्यां वमनस्य प्रवृत्तौ वमनयोग्यथा यदि वमनं न क्रियते तदा चिरानुबन्धिरोगानुच्छेदो वा स्यात् तस्माद्वमनं प्रयुक्तं दोषप्रत्यनीक मेव भवति यदुक्तं सुश्रुते। छर्दिषु बहुदोषासु छर्दनं हितमुच्यत इति। एवमग्निदग्धेऽप्युष्णक्रियया रक्तस्य विलयनेन स्वाभाविकत्वापादनात् हेतु प्रत्यनीकतैव। अन्यथा रक्तं दाहप्रकुपितं तत्स्थं पाकमारभेत्। यदुक्तम्

सुश्रुते अग्निना कुपितं रक्तं भृशं जन्तोः प्रकुप्यति।
ततस्तेनैव वेगेन पित्तमप्युदीर्यते इति॥

शीतक्रिया च तत्र निषिद्धा रक्तस्य स्कन्दनहेतुत्वात् यदाह सुश्रुतः प्रकृत्याप्युदकं शीतं स्कन्दयत्यपि शोणितम्। तस्मात् सुखयति ह्युष्णं न तु शीतं कथञ्चनेति। [illegible]यति। ज्वराणि करोति यथा मूलकविषे जङ्गमस्थावरयोर्विषयोर्विषमयोगस्वरूपं हेतुविपरीतमेव यदुक्तं चरके।

तिर्थं विलक्षणं यत्तत्प्रमाणप्रमाणाभिमतमिति यथाप्रसङ्गः विपर्ययविशेषेऽपि कुतो भवितव्य इत्यत आह ७४ प्रमाणप्रमाणाभिमतमिति। यथा मणिकृते महालये यन्नाम तदपि मत्तमधुपाद्युक्तं पुष्पलतादिभिर्भूषितं भैषज्य द्रव्यान्तर संयुक्तं भक्ष्यमेव यथवा मातमहालये रचनाशी-कारिकाजनिते तत्र चिन्मय पीठिकादि वस्तु प्रयुज्यमानं हेतु विपरीतमेव वस्तुतं युज्यते। यथा गरेन्द्रोपचतस्य कस्यचित् भवेत् प्रमादस्य तदेव भाष्यतः मुखं तथास्य चतस्य रेखिणो भवेत् प्रमादस्य तदेव भाष्यत इति। तस्यास्य जातीयाभिप्रायेणैव। यत्र उपलब्धे जलप्रकर-णम्। तथापि जलस्य घटादिभिरनिर्णयादेवोदकादिवत् कुम्भकारचक्रवती न्यायेनान्तः पिण्डितो भेदः स एवासौ विजातवति न्यायागमश्च तौ प्रोपपत्ति ततस्तु भिन्नार्थो-पायः स्वार्थप्रतिपत्तौ भवतीति हेतु प्रमाणोक्तव वने-नैव न्यायेन धर्ममेव तद्धर्मकादि यथा यत्नं हेतु प्रत-ीकारे वाक्यार्थं प्रतीति उच्यते। यद्यप्येवं तथाप्यात्मा-न्तरवैधर्म्यप्रतिपादनाभिप्रायैः एवमुदर्शितं यथा परोक्ष-मुक्तम् उपपत्तिहेतु विपरीतानां विपरितार्थकारिणाम् जीवनाप्यविहारादाम् उपयोगः कुकार्य इति। वैधर्म्यहेतु समान धर्मकत्वेऽपि रोग प्रथमकल्पमिति॥८॥

विपरीतोऽनुपपन्न इति जीवकादीनां दुःखकर उप-

---

(७४) प्रमाणप्रमाणाभिमतमिति। प्रमाणेन विपक्षेण प्रमाणेन बाध-नीयं प्रमाणितं दर्शितं दृष्टान्तमावश्य वैधर्म्यात्। वैधर्म्यादृष्टान्ता-न्तरजीवनादिकार्यकारणादृष्टान्तान्तर संयुक्तं यथा विकल्पेन। विजातवति इत्यवति यथार्थं प्रतिपत्तः उपपत्ताः। इत्युपपन्नः।

विपरीतोनुपशयो व्याध्यसात्म्येति संज्ञितः॥८॥
यथा दुष्टेन दोषेण यथा चानुविसर्पता ।

योगेऽनुपशय इत्यर्थः । तत्पर्य्यायमाह व्याध्यसात्म्य इति । व्याधिग्रहणेन दोषोऽपि बोध्यः । नन्वनुपशयः किं व्याधिविशेषं बोधयति नो वा नेति चेत् तदुपन्यासो निदानेऽव्यर्थः । प्रतिपादयति इति चेत् रोगाणां विज्ञानं पञ्चधा इति व्याहन्यते तस्य षष्ठत्वापत्तेः नैवं प्रतिपाद्यत्वेव यदाह चरकः । गूढलिङ्गं व्याधिमुपशयानुपशयाभ्यां परीक्षेतेति किन्तु निदाने तस्यान्तर्भावो दोषस्य रोगस्य च वर्द्धकत्वादिति । इत्यनुपशयस्य निदानेऽन्तर्भावान्न षष्ठत्वापत्तिः । वक्ष्यति च निदानोक्तोऽनुपशय इति लक्षणम् ॥ ८ ॥

संप्राप्तिमाह यथेत्यादि नानाविधा हि दोषाणां दुष्टिः प्राकृता वा वैकृता वा अनुबन्ध्यानुबन्धरूपा वा एकशो वा द्विशो वा समस्ता वा अंशांशादिभिः समस्तैर्भावैरल्पैर्वा एवमादि इति दुष्टेन दोषेण जायमानस्य रोगस्य निष्पत्तिरुत्पत्तिः संप्राप्तिरुच्यते । यथा चानुविसर्पतेति अनेकधा दोषाणां विसर्पणं गतिरूर्द्ध्वाधस्तिर्य्यगादिभेदेन तथा विसर्पता संवर्द्धता संप्राप्तिपर्य्यायमाह शास्त्रे व्यवहाराय लाघवार्थं च जातिरागतिरिति जात्यादिभिः शब्दैर्योऽर्थोऽभिधीयते सा संप्राप्तिरिति । अन्यापि शास्त्रका-

(७१) जातिरागतिरिति । जातिर्जन्म कुपितदोषस्य व्याध्युत्पत्तिपर्य्यन्तं अनुधावनं आगतिः । अजातस्य आगमनाभावादिति ।

निर्वृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः॥१०

र्वृत्तमिति अजातस्य ज्ञानाभावात् इत्याह हरिचन्द्रः । एतेनैतदुक्तं भवति नहि निदानादिवत् बोधकत्वेन कारणत्वम् । किन्तु बोध विषयत्वेन७७ कारणत्वम् । तत्र त्वत्र आलोकचक्षुरादेरिव एवं विधं प्राप्तेर्विवक्षायामनुपयोगात्७८ न चास्ति नियमो जातमेव ज्ञायते अजातस्यापि व्याधेर्निदानपूर्व्वरूपाभ्यां वृष्ट्यादेरिव मेघादिनाज्ञाय मानत्वात् । अथ जातमिति जन्मावच्छिन्नमुच्यते वृष्ट्यादिकञ्च भविष्यत् । जन्मावच्छिन्नमेव । यस्तु कालत्रयेऽपि जन्मनास्ति तत्र ज्ञायत एव तथापि न व्याधिमात्र जन्मसंप्राप्तिः। जन्मवदालोकचक्षुरादेरपिव्याप्यत्वापत्तेः तांरवि विना ज्ञानाभावात् । तस्माद्दोषेति कर्त्तव्यतोपलक्षितं व्याधि जन्मसंप्राप्तिर्न तु केवलं जन्मेति भट्टारहरिचन्द्रस्याय मभिप्रायः । वाग्भट्टेनापि यथा दुष्टेनेत्यादि वदताविशिष्टमेव व्याधि

अजातस्य जन्मरहितस्य ज्ञानाभावात् । तथाच तत्तत्पदार्थविज्ञान ज्ञानेतत्तत्पदार्थोत्पत्तिरपेक्षिता जातमेव ज्ञायतइति नियमादित्यभिप्रायः ।

(७६) बोधकत्वेनेति । तत्तत् विषयकबोधजनकत्वेन ।

(७७) विषयत्वेनेति । लौकिक प्रत्यक्षत्वावच्छिन्नं प्रतिविषयत्वेन बोध्यत्वेनेति यावत् कारणत्वमिति पूर्व्वेणान्वयः उभयत्र तृतीयार्थोऽवच्छिन्नत्वं तस्य च कारणत्वेनान्वयः ।

(७८) अनुपयोगादिति । उपयोगित्वाभावात् । दोषेतिकर्त्तव्यतोपलक्षितमिति । इतिकर्त्तव्यताव्यापारः स च ज्वरं आमाशय दूषणादिरूपमाः तयोश्च वर्णितं तद्विशिष्टम् ।

संख्याविकल्पप्राधान्यबलकालविशेषतः।
सा भिद्यते यथात्रैव वक्ष्यतेऽष्टौ ज्वरा इति॥

अन्यार्थसंप्राप्तिरुक्ता तथा सति क्रियाविशेषोऽपि लभ्यते। यथा ज्वरे आमाशयदूषणाग्निमन्दनादि दोषे लङ्घन-पाचनस्नेहादिकरणमिति संप्राप्तिरेवं ज्ञेया। यद्यपि दोषाणामामाशयव्यापारत्वेन दोषप्रत्यक्षे नैव व्यापारः प्राप्यते तथापि चिकित्साविशेषार्थमेव पृथक् क्रियते। यथा व्याधौ ज्ञापकत्वाविशेषेऽपि पूर्वरूपमेव रूपात् पृथगिति। दोषेति कर्मत्वतोपलक्षितं व्याधि जनकसंप्राप्ति-रित्येव लक्षणमिति तस्या [७८]औपाधिकभेदमाह ॥१०॥

संख्यैतादिनासा भिद्यते इत्यन्वयेन अन्यच प्रधान्योपादानात् अप्रधानस्य तत्प्रतियोगि तथा योग्यत्वम् अत एव विवरणे स्वातन्त्र्यापारत अन्यान्यामिति वक्ष्यति एवं बलेऽपि पित्राख्यानम् एवं वाग्भटेऽपि व्याख्यातम् संख्यादिकमेव विवृणोति यथेत्यादि अष्टौ ज्वरा इति-संख्याविवरणम् अष्टत्वं वातादिकारणभेदादेकत्वाच्च ज्वरोद्भवत्वाच्च चयःप्रभृतिगतत्वेनैव चानन्तु कथेति।

(७८) औपाधिकेति। उपाधिनाकृतम् औपाधिकम्। संख्या-दिना भिद्यते इत्यन्येन पक्षेण ननु संख्यादिना व्याधिरेव भिद्यते कथं संप्राप्तिर्भिद्यते। उच्यते संख्यादिभिर्व्याधौ संप्राप्तिरपि भिद्यत एव। यदोषविधिवाचा भावाना भविष्यल्लक्षितिरपि भिन्नत्वेन भिद्यैव। तत्-प्रतियोगिनवेति। तत्र प्राधान्यस्य प्रतियोगितया विरोधितया अप्राधान्यस्य तु सम्बन्धित्वतः।

दोषाणां समवेतानां विकल्पोंऽशांशकल्पना ॥

यद्यपि द्वन्द्वैर्दोषैः सन्निपाता स्त्रयोदश यदुक्तञ्चरके । द्वन्द्वश्चैकोल्बणैः[८०] षट् स्युर्हीनमध्याधिकैश्च षट् समैश्चैको विकारास्ते सन्निपातास्त्रयोदश इति । तथाप्यत्र त्रिदोषजत्व सामान्यात् सन्निपातिक एकत्वेन गणितः । एवं कामशोकभयाद्यनेककारणकोऽप्यागन्तुज आगन्तुत्व सामान्यादेकत्वेन निर्दिष्ट इत्यष्टौ ज्वरा इति । विकल्पं विवृणोति । दोषाणामित्यादि । दोषाणां समवेतानां परस्पर सम्बद्धानां तेन द्वन्द्वसन्निपाततयो र्ग्रहणम् अंशांशकल्पनेति अंशावातादिगत रौक्ष्यादयः । तैरेकद्वित्र्यादिभिः समस्तैर्वा वातादिकोपावधारणं विकल्पना । यदुक्तं सुश्रुते सर्व्वैर्भावैस्त्रिभिर्व्वापि द्वाभ्यामेकेन वा पुनः संसर्गे कुपितः क्रुद्धं दोषं दोषोऽनुधावतीति । एवं विधश्च दोषकोपो निदानवैचित्र्याद्भवति तद्यथा वातस्य[८१] रौक्ष्य-

(८०) द्वन्द्वैकोल्बणैरिति द्वन्द्वौ द्वौ ययोस्ते द्वन्द्वाः द्वन्द्वाश्च एकोल्बणाश्च ते तैर्दोषैः । सर्व्वैर्भावैरिति । रूक्षादिभिः सर्व्वैर्धर्म्मैः । संसर्गे कुपितो दोषः परस्परसम्बन्धे कुपितो दोषः । क्रुद्धं दोषं निदानात् क्रुद्धं दोषम् । अनुधावति पश्चाद्गच्छति ।

(८१) वातस्येति । रौक्ष्यशैत्यलाघववैशद्यादिगुणस्य वातस्य एवं गुणः एवं द्रव्यः वातगुण सदृश इति यावत् गुणोऽस्य सकषायो रसः भवतीत्यर्थः । कषायोरसस्तु सर्व्वरसेभ्यो वातप्रकोपकत्वात् [illegible] वातगुणबहुलत्वात् । तस्य शीतकः नदीवाताकः यस्य प्रसिद्धिः । वायव्यः कुबेरकाष्ठा यस्य प्रसिद्धिः । शीघ्रः सद्यविशेषः । दीपकः सामग्री दाढातकफलं पेयानकम् । कार्यः सेतुर यस्य प्रसिद्धिः ।

स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्॥
इत्यादि कात्, व्याख्यावयवैर्बलाबल विशेषणम् ।

शैत्यलाघववैशद्यादि गुणस्य एवं गुणः कषायरसः कषायस्य सर्वैरंशैर्विवर्द्धकः । रौक्ष्यशैत्यलाघवैः स्तम्भकोपकः । रौक्ष्यशैत्याभ्यां कासघ्नः रौक्ष्येण शीधु तथा पित्तस्य सर्वैर्भावैर्विवर्द्धकः । कटुकोरसः मद्यञ्च हिङ्गुकटूष्णती-क्ष्णैर्दीपक शैत्यौष्ण्याभ्याम् औष्ण्येन तिला तथा श्लेष्मणः सर्वैर्भावैर्मधुरो रसः माहिषञ्च पयः स्नेह-गौरवमाधुर्यैः राजादनफलं कफदः । शैत्य गौरवाभ्यां शैत्येन क्षीरिणां(८२) फलानि अपरगुणोदाहरणप्रकाराश्च-ण्ड गदाधर वाचस्पतिव्याख्या विशेषाश्च विस्तरत्वापत्तेरत्र न लिखिताः ।" प्राधान्यं दिशेदिति स्वातन्त्र्यपारतन्त्र्या-भ्याम् इत्यनुबन्ध्यानुबन्ध भावेनेत्यर्थः । अत्रापि दोषाणां

(८२) क्षीरिणामिति । न्यग्रोधादि पञ्चवृक्षाणाम् । तथाच राजनिर्घण्टे । न्यग्रोधोदुम्बराश्वत्थ पारिश प्लक्षपादपाः । पञ्चैते क्षीरिणो वृक्षा इत्यादि । पारिशः पिपुलः कपिलवर्णपलाशइति च भाषा । केचित्तु पारिशस्थाने शिरीषं वेतसं परे वदन्तीति शेषः । अनुबन्ध्योऽस्य स्वतंत्रइति कर्मधारये बहुव्रीहित्वेपि अनुबन्धानुरोधा-त्तत्र कर्मधारये प्रयोगः । केचित्तु अनुबन्धेन अप्रधाना अनुबन्ध्या-श्चालक अस्वतन्त्रस्वरूपः कार्यमुच्यते तस्यांशो यथाज्वरादयस्तत्राद्यः । अन्यादोषं दोषमनतिक्रम्य यतेनैतदुक्तं यत्किञ्चिदादेरंशे यस्य दोषस्य प्रकोप उक्तोऽपि सोऽंश सदोषजस्य व्याधेः कारणत्वार्थः। अथमिश्चरित संज्ञा योगित्वादिति । यथा द्विविधा व्याधयो द्विविधं रक्तपित्तमित्या-द्युक्त द्वित्वसंख्यापि प्रतीयते । वाचस्पतिव्याख्यानमुपन्यस्यति ।

नक्तं दिनर्त्तुभुक्तांशै व्याधिकालो यथा मलम् ॥
इति प्रोक्तो निदानार्थ स्तद्व्यासेनोपदेक्ष्यते॥११॥

समवेतानामित्यनुवर्त्तनीयम्। अप्रधानस्य इति शेषः।
गम्यमानत्वान्नोपदर्शितम्। तेन स्वातन्त्र्यात् प्राधान्यं पार-
तन्त्र्यादप्राधान्यमिति सिध्यति। बलं विशेषोति हेत्वा-
दीनि हेतु पूर्व्वरूपाणां साकल्यासाकल्याभ्यां तेषामव-
यवैकदेशेनावलम्। कालं विशेषोति नक्त मित्यादि
नक्तं रात्रिः दिनमहः ऋतवो वसन्तादयः। भुक्तमाहार
एषाम् च अंशैरेकदेशै व्याधिकालो व्याधि वृद्धियानि हेतु
कालः। अत्र ऋतोरंशाः कतिपयान्यहोरात्राणि।
यदाह वाभटः ऋतोरादन्त सप्ताहा. ऋतुसन्धिरिति स्मृत
इति। अथवा संवत्सररूपस्य च कालस्य ऋतुरूपो अंश
ऋत्वंश इत्यपि बोध्यम्। ऋतोः सम्बन्धितस्य तत्र तत्र
कारणत्वेनोक्तत्वात्। नत्वेकस्य ऋतोर्हिमादिवर्षादि
मध्यान्ता ऋत्वंशाः। यथामलं यथा दोषं तद्यथा
रात्रेरादौ च ग्रामध्येपित्तं शेषे वायुरेवं दिनस्य वसन्ते
कफस्य शरदि पित्तस्य वर्षासु वायोः कोप एवं भुक्तादौ
भुक्तमात्रे कफस्य मध्ये पच्यमानावस्थायां पित्तस्य सम्यक्-
परिणते वायोरिति यदुक्तं वाभटेनैव। ते व्यापिनोपि
हृन्नाभ्यो रधोमध्योर्ध्वसंश्रया। वयोहोरात्रिभुक्तानामन्त
मध्यादिगाः क्रमादिति। अमात इतिक्रमेण वातपित्त-
कफाः। ननु संप्राप्तिभेदे चरकेण संख्यादिविहितिर-
युक्तः। कथादिविधाव्याधयोनिमाणमात्र भेदेन द्विविधं

रक्तपित्तमित्यादि तत्कृतोऽत्र विधिर्भेदा उच्यते संख्या-
प्रकारेण विशेषेण बोधः । तस्मात् व्यभिचरितः संख्या
योगित्वाद्विधिसंख्ययोश्चायं भेदो विधिप्रकारः । स
चाभिन्नजातीयानामेव कस्यचिद्धर्मान्तरस्यानुगमाद्भवति
यथा रक्तपित्तत्वाविशेषेपि ऊर्द्धगादि प्रकारो भवति संख्या
तु भिन्नमात्रे यथा चत्वारो घटा इति । [८३]अत्रैव विधिर्हि:
प्रकाराः स च भिन्नस्य न युक्तः अतः संख्यादिभिन्नेषु
कारणधर्मानुगतश्च प्रकारो युज्यते । तथाच न्यायविदोः
ब्रुवते सामान्येन धर्मेण यत्राभेदानां परिग्रहः क्रिय-
ते स विधिः संख्या तु भेदमात्र इति वैयाकरणाश्च व्याच-
क्षते । अन्वयवान् प्रकारो निरन्वयवान् भेद इति वाप्य-
चन्द्रो लिखितवान् । ननु यथा अंशांशविकल्पनया
ज्वरो ज्ञायते । न तथा संख्यया । उच्यते संख्या भेदेन
व्याधे दोषभेदो ज्ञायते । यतो ज्वरादिकं स्वरूपतो-
ज्ञात्वा चिकित्सार्थं विशेषो जिज्ञास्यते कतमोयं ज्वर

---

(८३) अत्रेति । विधिर्हि भिन्नेषु आत्यन्तिक भेदनिष्ठेषु विजाती-येष्विति यावत् न युक्तः अतः कारणात् सजातीय मध्ये संख्यादिभिन्नेष्व-पि व्याधिषु रक्तपित्तादिषु कारणधर्मानुगतः तत्तद्व्याधीनां कारण-भेदैः प्रकुपित रक्तपित्तादि रूपकस्यानुगतः अन्वितः सन्नेव प्रका-रो युज्यते । ननु कारणधर्मानुगतप्रकारेषु ऊर्द्धाधोगादिरूपेषु रक्त-पित्तादिव्याधिषु समानरूपेण वर्त्तमानत्वात् । अत्र निजागन्तुभेदेन द्विविधो व्याधि निर्दिष्ट अत्र धातुवैषम्यमेव कारणधर्मः । निजावि-तत्र विवरणं सटीकमाह ।

(८४) तत्रेति । यथाशास्त्रलक्षणात् यस्य ज्वरस्य तल्लक्षणं ज्वरः

सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः ।

इति तन्त्र[84] युक्त्यनुमान एवासौ दोषभेदादिभ्यो वात वातोद्रुक्तस्य पर्य्यायं कतमोऽयमित्याकृरिति ॥ ११ ॥

इति संप्राप्ति लक्षणम् ॥

उक्त निदानपञ्चक मुपसंहरतीति प्रोक्तो निदानार्थ इति । इति शब्दः समाप्तौ निदान शब्दोऽत्र सामान्य वचनम् । अर्थोऽभिधेयः तदिति निदानं संक्षेपेण लक्षणमात्रेणोक्तम् । अधुना व्यासेन विस्तरेण उपदेक्ष्यते कथयिष्यते सकलेन कृत्स्नेन प्रतिरोगं निदानपूर्व्वरूपादय एव [85]तद्विशेषैर्व्यक्त्या इत्यर्थः । द्विविधं हि रोगस्य कारणं विप्रकृष्टं सन्निकृष्टञ्च विप्रकृष्टं विरुद्धाहारादि सन्निकृष्टं वातादिः । तत्र वातादेः सर्व्वरोगेष्वव्यभिचरित कारणमाह सर्व्वेषामित्यादि यदुक्तं चरके ।

नास्ति रोगो विना दोषैर्यस्मात्तस्मात् विचक्षणः ।
अनुक्तमपि[86] दोषाणां लिङ्गैर्व्याधिमुपाचरेदिति ॥

कतमः वातिकः पैत्तिकादिको वा इति पर्य्यायम् अन्यं यथं युक्तमित्यर्थः । इतिसंप्राप्तिः । उपसंहरति समाप्तिं करोति । सकलेन कृत्स्नेनेति सह पञ्चावयवेन ।

(८५) तद्विशेषैरिति । प्रतिरोगं निदानपूर्व्वरूपादीनां वैशेषिकाः सन्ति तैर्विशेषैः । विचक्षणः पण्डितो वैद्य इति यावत् ।

(८६) अनुक्तमपीति । अनुक्तं नामतोऽकथितमपि व्याधिं यदुक्तं आचार्य्यकारा न हि सर्व्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः । ध्रुवा नियता । दोषाणां लिङ्गैः सकलदोषलिङ्गज्ञानैः उपाचरेत् चिकित्सेत् । उक्त-
[illegible] ।

तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम् ॥१२॥

आगन्तुव्याधिषु यद्यप्युत्पत्तौ दोषकोपो नास्ति तथाप्युत्पत्त्यनन्तरमवश्यंभावी । [८०]उत्पन्ने द्रव्ये गुणयोगवत् यदुक्तं चरके । आगन्तुर्हि व्यथापूर्वं जायते । यथाभिजं दैविरनुबध्यत इति निदानं कारणं मलादोषा मलिनीकरणात् । ननु वातादीनां किमिदं दोषत्वम् अत्राहुरेके स्वातन्त्र्येण दूषकत्वं दोषत्वं रसादि दूष्यव्यवच्छेदार्थं स्वातन्त्र्येणेति पदं ते हि वातादिदुष्टाः[८८] सन्तो दूष्या न दोषयन्तीति दूषकाः । अत्राहुरेके कि-

---

(८०) उत्पन्नद्रव्ये गुणयोगवदिति । यथोत्पन्नद्रव्ये गुणा न स्वयः उत्पत्त्यसमवर्त्तमाना भूत्वा परक्षणे पुनर्वर्त्तन्ते तथा आगन्तुव्याधिषु दोषकोपः । अत्रायं भावः आगन्तुव्याधिषु दोषकोपाभावस्य स्वल्पकालस्थायित्वेनाव्यपदेशात् दोषकोपस्य नियतपूर्ववर्त्तित्वेन आगन्तुव्याधिकारणत्वं सुतरां स्वीकृतमेवेति। अथवा इतिपाठे पक्षात्। दूषकत्वं दुष्टिकारकत्वम्। वर्त्तन्ते स्वस्वकार्यं निष्पादयन्ति। वर्त्तन्तीति पाठान्तरम्। प्रकृत्यारम्भकत्वे सतीति । प्रकृतिर्हि गर्भारम्भककालीन विलक्षण शुक्रशोणितनिष्ठ प्रकोपविशेषः । अस्याः गर्भारम्भकत्वरूप वैशिष्ट्यं यत्र शोणितं तन्निष्ठ प्रकोपविशेषः । सा च अपरित्यक्तस्वभावरूपा सा च स्फुटित करचरणादि वचनानुमेया । यथा च प्रकृति दोषजन्यैव । अतः वातप्रकृतिकः पुरुष इत्यनेन वातरूपदोषजन्यशुक्रशोणितनिष्ठ प्रकोपयुक्त शरीरविशिष्ट पुरुष उच्यते । एवं पित्तप्रकृतिकत्वादावपि बोध्यम् ।

(८८) दुष्टिकारणत्वमिति । दुष्टिशब्देन नाम विकृतिरुच्यते । तथाच दोषशब्दस्य निरुक्तिमाह भावप्रकाशे। धातवश्च मलाश्चापि दुष्यन्ते भिर्यतस्ततः । वातपित्तकफा एते त्रयो दोषा इति स्मृताः दोषा इत्यत्र

मिदं वातमात्र दोषान्तरनिरपेक्षत्व हेत्वन्तरनिरपेक्ष-
त्वाभ्यां चाद्येवातस्यैव दोषत्वं स्यात् न तु वातसापेक्षयोः
कफपित्तयोः । यदुक्तं

पित्तं पङ्गुः कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥

द्वितीये वातस्यापि न दोषत्वं कफपित्तयोरिव निदा-
नसापेक्षस्यैव वातस्य दूषकत्वादिति तस्मात् प्रकृत्यारम्भक-
त्वे सति दुष्टिकर्तृत्वं दोषत्वमिति लक्षणम् । रसरक्तादि-
निवृत्त्यर्थं प्रकृत्यारम्भकत्वमिति विशेषणम् । नहि वाता-
दिप्रकृतिवत् शास्त्रे रसरक्तादिप्रकृतिरुक्ता । वातादि
प्रकृतित्वञ्च शरीरस्य(८८) वातादिदूषितशुक्रशोणितारब्धत्वम्
यदाह चरकः । दोषानुशायिता ह्येषां देहप्रकृतिरु-
च्यते । यथा वातलाद्याः सदातुरा इति सुश्रुतेनापि
प्रकृतिलक्षणे वातप्रकृतिः स्फुटितकरचरणो जागरूको-
ऽनवस्थितचित्त इत्यादि पठ्यताम् । प्रकृतिरोगयोश्चायं

दूषयत्यन्ये दूषयति आतो दूष्यत्वमिति निरुक्त्या कर्त्रैव कारके इत्य-
नेन सूत्रेण करणेऽर्थेऽच्प्रत्ययः । वातादिप्रकृतिकस्य पारिभाषिक लक्ष-
णमाह ।

(८८) शरीरस्येत्यादि । एतेनेदमुक्तं यस्य पुरुषस्य शरीरं यद्विध
शुक्रशोणितेन । रब्धं भवति तस्य तत्प्रकृतिकत्वमुच्यते दोषत्वात् दोषानुशायि
तेति दोषानुशायिता दोषकृतेत्यर्थः । विपद्यते इत्युच्यते । तस्मात् प्रकृति
अस्मात् । बाध्यते आक्रम्यते । विपक्षा रसरक्तादेः व्याप्तिः प्रभेदः
शास्त्रे रसादेः प्रकृतिलक्षणेनानुक्तत्वात् । किञ्च प्रकृत्यारम्भकत्वं दोषत्व-
मिति मात्रलक्षणेन दोषत्वरूपं नोक्तं भवति तेन दुष्टिकारकत्वं दोषत्व-
मिति चोक्तम् ।

विशेषः प्रकृतिरपथ्यसेव्यमानं नात्यर्थं बाधते यदुक्तं
विषजातो यथा कीटो विषेण न विपद्यते तद्वत् प्रकृति-
भिर्देहस्तज्जातत्वान्न बाध्यत इति ॥

संचयः । विस्तरस्तु सुश्रुते श्लोकवार्त्तिक प्रश्नविधानाख्य टीकायां द्रष्टव्यः । ननु प्रकृत्यारम्भकत्वं दोषत्वम् इत्येवास्तु सत्यं विपक्षाद्या इत्यभिर्भवत्येव किन्तु दोषस्वरूपत्वं नोक्तं स्यादिति सुश्रुतादिभिर्वातादेरिव रक्तस्यापि प्रकोपप्रकोपकाल । निवर्हणस्थानविशेष रोगविशेष श्चिकित्साविशेषाणामभिधानाद्रक्तस्यापि दोषत्वं पूर्व्वटीकाकारैराषाढवर्म्मस्वामिदासादिभिः स्वीकृतम् ।(८०) तदप्येतेन व्यवच्छिन्नम् अधुना तैरस्वीक्रियमाणत्वात्। ननु दोषाः कारणञ्चेत् तर्हि तेषां सर्व्वदा देहे सम्भवात् सर्व्वदा रोगोत्पत्तिप्रसङ्ग इत्यत आह कुपिता इति विकृतिमापन्नाः ननु कुतः प्रकोपः स्वभावात् कारणान्तराद्वा तत्र नाद्यः पूर्व्ववत् प्रसङ्गात् । अथ कारणान्तरादिति किम् आह त्रिविधाहितसेवन मित्यादि त्रिविधस्य नाना विधस्यापि तस्या सात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिणामलक्षणस्य सेवनामिति । ननु किमेतदेव निदानं तदन्यदप्यस्तीत्यतश्चरकवचन मुपन्यस्यति ॥ १२ ॥

---

(८०) तदप्येतेनेति । तत् रक्तस्य दोषत्वमपि अनेन वचनेन व्यवच्छिन्नं परिहृतम् । अधुनातनै राधुनिकैः पण्डितैरस्वीक्रियमाणत्वात् पूर्व्ववत् प्रसङ्गात् तेषां सर्व्वदा देहे सद्भावात् सर्व्वदा रोगोत्पादकत्व प्रसङ्गात् इत्युपन्यस्यति उत्थापयति ।

निदानार्थकरो रोगो रोगस्याप्युपजायते ।
तद्यथा ज्वरसन्तापाद्रक्तपित्तमुदीर्य्यते ॥ १३ ॥
रक्तपित्ताज्ज्वरस्ताभ्यां शोषश्चाप्युपजायते ।
प्लीहातिवृद्ध्या जठरं जठराच्छोथ एव च ॥ १४ ॥

निदानार्थकर इत्यादि अपि शब्दोऽत्र भिन्नक्रमे रोगोऽपि निदानार्थकरो(८१) रोगस्यायमर्थः निदानेन योऽर्थः क्रियते स व्याध्याख्यः अरोगेनापि इति । रोगोऽपि रोगकर इति वाच्ये यन्निदानार्थकर इत्यवोचत् । तेनैतद्दर्शयति रोगोऽपि रोगान्तरं कुर्व्वाणो निदानान्तरोपष्टम्भितबल एव करोतीति अत्रैव दृष्टान्तरमाह ॥ १३ ॥

तद्यथेत्यादि ताभ्यामिति रक्तपित्तात् ज्वराच्च । दुःखं पीडाकरम् अयञ्च दुःखशब्दो लिङ्ग विपरिणामेन सर्व्वेष्वेव ज्वरादिषु योज्य इति वाप्यचन्द्रः ॥ १४ ॥

---

(८१) निदानेनेत्यादि । निदानेन यत् प्रयोजनं क्रियते तद्व्याधिजनकं प्रयोजनं रोगेनापि क्रियत इत्यर्थः । उपष्टम्भितबलः वर्द्धितबलः । निदानभूतरोगस्यैव रोगान्तरकारित्वं यो यस्य प्रयोजनसाधकः स तेनैव प्रयोज्य इति नियमात् । कथं न विरुध्यतीति । नञः काकाविद्वदुभय । बहुविधविषयत्वं नेति । रोगाणां बहुविधत्वात् तद्विशन्ति लक्षणानां लिङ्गैरपि बहुविधविषयत्वं निवृतीति । प्रकृति सम समवाय विकृति विषम समवायस्यार्थम् उपदिष्टाद्यत्र नैवरक्षति । वातादिगुणाः प्रागेवाचार्य्याभिर्व्याख्याताः ।

सर्व्वरोगनिदानम् ।

अथ सर्व्वरोगप्राधान्यादिति । सर्व्व रोगेषु प्राधान्यात् ।

अर्शोभ्यो जठरं दुःखं गुल्मश्चाप्युपजायते ।
प्रतिश्यायादथो कासः कासात्संजायते क्षयः ॥१५॥
क्षयो रोगस्य हेतुत्वे शोषश्चाप्युपजायते ॥१६॥

गुल्मश्चाप्युपजायत इति । अर्शोभ्य एव । कासात् संजायते क्षय इत्योजः प्रभृतीनामित्यर्थः ॥ १५ ॥

अथ क्षयोरोगस्य हेतुत्वं उपजायते इति कस्य रोगस्येत्याह शोषस्येति राजयक्ष्मणः । अत्र केचित् हरिश्चन्द्रादिभिर्व्याख्यातं पाठान्तरं पठन्ति क्षयोरोगस्य हेतुत्वे शोषश्चाप्युपजायते । अस्यार्थः क्षयो राजयक्ष्मा उरोग उरःक्षतः समाहारद्वन्द्वैक वचनं तस्य[८२] हेतुत्वे शोषो धातुक्षय उपजायते इति । ननु चरके सर्व्वनिदानं त्रैविध्येन संगृहीतम् । असात्म्येन्द्रियार्थसंयोग इत्यादिना ततश्च रोगस्यापि निदानत्व माचक्षाणः स्वोक्त निदानत्रैविध्यसंग्रहं कथं न निरुणद्धि । अत्रैके समाधिमभिदधति त्रिविधं यन्निदानमुक्तं तत्सर्व्व व्याधिविषयम् इदन्तु प्रतिनियतविषयं यतो न सर्व्वे रोगा रोगाज्जायन्ते किन्तर्हि कश्चिदेव व्याधिः कुतश्चिद्रोगाज्जायते अतुर्थमेव तन्निदानं रोगाख्यमिति । अन्ये त्वाहुः । रोगस्य रोगोऽपि निदानं भवन् त्रिविधनिदानव्यतिरेकेण न भवत्येव

---

(८२) तस्येति । तस्य ज्वरस्य । प्राणिसम्बन्धस्य प्राणिवैरिणः । रिपौ वैरि सपत्नारीत्यमरः । भूतस्य अवश्यम्भाविनः । प्रभवोद्भवे निधनोत्पत्तिकाले ।

ते पूर्व्वं केवला रोगाः पश्चाद्धेत्वर्थकारिणः॥१७
कश्चिद्धि रोगोरोगस्य हेतुर्भूत्वा प्रशाम्यति ।

ततो यावदयं [६१]ज्वरोऽसात्म्येन्द्रियार्थसंयोगादिभिरुपबृंहितबलो न भवति । न तावद्रक्तपित्तमारभते तस्माद्व्याध्युत्पादे त्रिविध एव हेतुः । साक्षात्पारम्पर्य्येणेवेति । ननु ये इमे रोगारोगान्तरस्य निदानत्वेनोक्तास्ते किमुत्पन्नमात्र एव रोगं जनयन्ति उतोऽनन्तरकालम् इत्याह॥१६

ते पूर्व्वमित्यादि ते व्याधय उपबृंहितहेतुत्वलाभात् प्राक् केवलाः स्वतन्त्राः स्वरोगारम्भकत्वात् पश्चादुपबृंहकहेतुलाभात् हेतोर्निदानस्य योऽर्थः यत्प्रयोजनं व्याधिजननाख्यं तत्कुर्व्वन्ति । यथा ज्वरो रक्तपित्तमिति । तस्यैव रोगजनकस्य व्याधेर्वैचित्र्यमाह ॥ १७ ॥

कश्चिद्धीत्यादि एवमुक्तप्रकारेण व्याधिसङ्करा व्याधिमेलकाः । यथा प्रतिश्याये न निवर्त्तते कासश्च जायते अर्शो न निवर्त्तते जठरगुल्मौ स्यातामिति । कृच्छ्रतम-

(६१) ज्वरेणेत्यादि । ज्वलयता मन्थरताज्वरेण किञ्चिद्भूतं न तप्यते नहि अपितु सर्व्वं भूतं तप्यत एव । नागानां हस्तिनाम् अश्वाद्य अवयवस्तते तेषां छागमेषाणाम् । करभ उष्ट्र । अहिषु सर्पेषु । नीलिका शैवालम् । शैवलं शैवलेन स्त्री सेपालो जलनीलिका इति वाचस्पतिः ऊषरः क्षारवत्त्वम् । अपचारात् विरुद्धाचारात् । पित्तविरोधिनीक्रिया पित्तोपशमकारिणीचिकित्सा । पित्तविरुद्धानि पित्तोद्रेककराणि । भस्म प्रहरणः भस्मास्त्रः रौद्रः भयानकः । कालान्तक यमोपमइति । कालोद्भवः ... ज्वरयति रुजति सन्तापयति देहेन्द्रिय मनांसीति ज्वरः ।

न प्रशाम्यति चाप्यन्यो हेतुत्वं कुरुतेऽपि च ॥
एवं कृच्छ्रतमा नृणां दृश्यन्ते व्याधिसङ्कराः ।

तस्यैवं बहुविध दुःखजनकत्वात् प्रायोविरुद्धोपक्रमाश्चेति अत्र निदानपञ्चकस्य रोगनिर्ज्ञानलक्षणा सिद्धादि हेतुत्वेनावश्यं ज्ञातव्यतामाह तस्मादित्यादि उद्यतां बहुविधयत्नेन महती विनिश्चयोनिदानमिति । अथ वक्ष्यमाणविकारेषु[८४] प्रकृतिसम समवायविकृतिविषमसमवायादि ज्ञानार्थं चरकोक्ता वातादि गुणाः लिख्यन्ते ।

रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ।
विपरीतगुणै द्रव्यै र्मारुतः संप्रशाम्यति ॥
सस्नेहमुष्णं तीक्ष्णञ्च द्रवमम्लं सरं कटुः ।
विपरीतगुणैः पित्तं द्रव्यैराशु प्रशाम्यति ॥
गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः ।
श्लेष्मणः प्रशमं यान्ति विपरीत गुणैर्गुणा इति ।
अथ सर्व्वरोगप्राधान्यात्[८५] प्रथमं ज्वरो वाच्यः ।

---

(८४) प्रकृत्यादीनामित्यादि । आहारस्य भोजनादेरुपयोगः फलसाधनताफलञ्च धातुसाम्यादि आहारनिष्ठ धातुसाम्यादिरूप फलजनन योग्यताइति यावत् । तस्य हेतुभूतानां प्रकृत्यादीनां विरुद्धत्वेन विपरीतत्वेन उपयोग आचरणं मिथ्याहारः तस्मिन्निति निष्कृष्टार्थः । आहारविधि विशेषायतनानीति । आहारस्य विधिर्विधानं तस्य विशेषोहिताहितत्वं तस्यायतनानि निदानानि उपयोग संस्थेति । उपयोगोनियमः संस्थासंस्थेति: नियमेन संस्थितिः ।

(८५) आरम्भादीति । आदिना अनारम्भस्य परिग्रहः । यदुक्तं तन्त्रान्तरे अयज्ञः कुरुते कर्म यतिर्मन्त्र प्रवर्त्तते । मिथ्या-

तस्मात् यत्नेन सद्वैद्यैरिच्छद्भिः सिद्धिमुत्तमाम्।
ज्ञातव्यो वक्ष्यते योऽयं ज्वरादीनां विनिश्चयः॥१८

इति पञ्चलक्षणं निदानञ्च ।

प्राधान्यञ्च तस्य शारीररोगेषु प्रथमोत्पन्नत्वात् बलवत्त्वाच्च देहेन्द्रिय मनस्तापित्वाच्च जन्मनिधनयोरवश्यम्भावित्वाच्च स्थावरजङ्गमरूप सर्व्वभूतव्यापित्वाच्च नैवमन्ये विकाराः । यदुक्तं चरके

देहेन्द्रियमनस्तापी सर्व्वरोगाग्रजो बली ।
ज्वरः प्रधानो रोगाणा मुक्तो भगवता पुरा ।
तस्य प्राणिसपतनस्य ध्रुवस्य प्रलयोदय ॥

इत्यादि यावद्भगवन् वक्तुमर्हसीति । तथा ज्वरेणा-विग्रताभूतं नहि किञ्चिन्न तप्यते । उक्तञ्च वैद्यके ।

पाकलः सतु नागानाम् अभितापस्तु वाजिनाम्।
गवामीश्वरसंज्ञश्च मानवानां ज्वरो मतः ॥
अजावीनां प्रलापाख्यः करभे चालसो भवेत् ।
हारिद्रो महिषाणान्तु मृगरोगो मृगेषु च ॥
पक्षिणामभिघातस्तु मत्स्येष्विन्द्रमदो मतः ।
पक्षपातः पतङ्गानां व्योडेष्वक्षिक संज्ञकः ॥

इत्यादि। तथान्यत्र । जलस्य नीलिका भूमे रूषरो वृक्षस्य कोटर इत्यादि । तस्य प्रागुत्पत्तिमाह॥१८॥

सिद्धर इच्छतो वर्ज्यते सिद्धसैरपि । उत्तरकाणं तद्वलम्बदिति । उत्त-रकाणं ज्ञाय दोषोत्कर्षः ।

अथ ज्वरनिदानम् ।

दक्षापमानसंक्रुद्धरुद्रनिश्वाससम्भवः ।
ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ॥ १ ॥

दक्षापमानेत्यादि । दक्षापमानेन दक्षप्रयुक्तपरिभवेण क्रुद्धस्य रुद्रस्य निश्वासात् सम्भव उत्पत्तिर्यस्य स तथा । निःश्वासोऽत्र क्रोधलिङ्गत्वेन निर्द्दिष्टः अतएव सुश्रुतेन रुद्रकोपाग्निसंभूत इत्युक्तः क्रुद्धेन रुद्रेण ललाटे तृतीय-नमाग्नेयच्चक्षुः सृष्टाततोप्याग्नेयोबाणोनिर्म्मितः। यदाह चरकः । सृष्ट्वा ललाटे चक्षुर्वै दग्ध्वा तानसुरान् प्रभुः । बालं क्रोधाग्निसन्तप्तमसृजज्ज्वरनाशनमिति एषा च ज्वरोत्पत्तिकथा चरकचिकित्सिते सविशेषं श्रोतव्या । एतेन रुद्रकोपस्य विप्रकृष्टकारणत्वमुक्तं यदि हि ततो ज्वरो नोत्पद्यते अधुनाप्यपचारान्नोत्पद्यत इति भट्टार हरिचन्द्रः । एतदभिधानस्य चिकित्सानुपयोगित्वेनान्ये टीकाकृतोऽन्यथा व्याचक्षते कोपोद्भवत्वेन तैजसत्वं प्रकाश्यते । यदाह चरके क्रोधात्पित्तमित्यादि तेन सर्व्वज्वरे पित्ताविरोधिनी क्रिया कार्य्येति सिध्यति । तदुक्तं वाग्भटेनैव उष्मा पित्तादृते नास्ति ज्वरो नास्त्युष्मणा विना । तस्मात् पित्तविरुद्धानि त्यजेत् पित्ताधिकेऽधिकमिति । अत एव चरके कालमवधाय पाचनान् परित्यज्य तरुणज्वरे पाचनत्वेन तिक्तको रसः पित्तघ्ननिर्द्दिष्टः यदाह

मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः ।

लङ्घनं स्वेदनं कालो यवागुस्तिक्तको रसः ।
पाचनान्यविपक्कानां दोषाणां तरुणज्वरे इति च तत्कालोऽष्टाहः

अन्येत्वाहुः रुद्रकोपसम्भवत्वेन देवतात्मकत्वात् पूजार्हत्वमुपदर्शितम् । यदाह विदेहः । ज्वरस्तु पूजनैर्व्वापि सद्यस्सैवोपशाम्यति । हरिवंशेपि ।

ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः ।
भस्मप्रहरणो रौद्रः कालान्तकयमोपम इति ।

मूर्त्तिमानेवोक्तः । बहुविधमपि ज्वरं संक्षेपेणाह ज्वरोऽष्टधेति अष्टत्वं विवृणोति दृश्यतेति तच्च संप्राप्तौ विवृतम् ।

संप्राप्तिं चाहमिथ्येत्यादि । आहारस्य मिथ्यात्वं प्रकृत्यादीनामाहारोपयोगहेतुभूतानां विरुद्धत्वेनोपयोगः। यदाह चरकः । तत्रेमान्यष्टावाहार विधिविशेषायतनानि प्रकृतिकरणसंयोगराशिदेशकालोपयोगसंस्था उपयोक्ताष्टमानीति अत्र प्रकृतिर्द्रव्याणां स्वाभाविक गुरुत्व लघुत्वादिगुण योगः यथामाषमुद्गयोः करणं संस्कारः यथाव्रीहेर्गुरो लघवोलाजा संयोगः संहतीभावः यथा क्षीर मत्स्ययोः राशिराहारस्य द्रव्याद्रव्यस्यावयवेन समुदायेन च परिमाणं देशोद्रव्योत्पत्तिप्रचारादि स्थानम् । कालोनित्यश्चावस्थिकश्च उपयोग संस्था उपयोग नियमः यथा जीर्णाश्च एव भुञ्जीत । उपयोक्ता स्वयं निरूपितात्म प्रकृत्यादिकः पुरुष इति । विहारस्य मिथ्यात्वमयथाबलमारम्भादि आमाशयाश्रया

बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः॥२॥

इत्यनेनामाशयप्राप्तिव्यतिरेकेण दोषा ज्वरं नारभन्त इति प्रतिपादयन्ति। आमाशयश्च नाभिस्तनान्तरं जन्तोरामाशय इति स्मृत इति चरकेणोक्तम्। बहिर्निरस्य कोष्ठाग्निमिति कोष्ठाग्निरेव दोषैराक्षिप्तो बहिर्निर्गत उष्मतया प्रतिभाति कोष्ठाग्निमिति चात्वग्निनिरासार्थं ज्वरदा ज्वरकारिणः रसानुगा रससम्बन्धाः। अवश्यं रसं दूषयित्वा ज्वरोत्पादका इति। एषा च संप्राप्तिः शारीराणामेव नत्वागन्तूनां तेषां व्यथा पूर्वकत्वात्। ततो वाताद्यनुबन्ध इति जेज्जटः। अत एव सुश्रुते आगन्तु संप्राप्तिः पृथगेव पठ्यते यथा।

श्रमच्चाभिघातेभ्यो देहिनां कुपितोऽनिलः।
पूरयित्वाखिलं देहं ज्वरमापादयेद्भृशमिति॥

अत्र न आमाशयगत एव वायुः किन्तूर्द्ध्व तिर्य्यग-धोवाहि स्रोतश्चरः। चरकेऽप्युक्तं

तत्राभिघातजो वायुः प्रायो रक्तं प्रदूषयन्।
स व्यथाशोथवैवर्ण्यं करोति सरुजं ज्वरमिति॥

नन्वागन्तुज्वरेष्वप्युपलभ्यते व्यथापि ताहते नास्ति इत्युक्तम् अत आगन्तुरपि शारीरः स्यात् नैवम् उत्तरकालं तदुत्पत्तेः। यदुक्तम् आगन्तुर्हि व्यथा पूर्वो जायते पश्चान्निजैर्दोषैः सम्बध्यते। तथा आगन्तुरन्वेति निजं विकारं निजस्तथागन्तुमपि प्रवृद्ध इति। ननु मिथ्याहार इत्यादिना एकैव संप्राप्तिरुक्ता एतच्चानुपपन्नं यतः

स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणन्तथा ।

संप्राप्तिः संयोगभेदः संयोगभेदश्च संयोगिनिबन्धः संयोगिनश्चात्र वातादयो नानाविधाः अतः संप्राप्तिरपि नानात्वं स्यात्। नहि वातपित्तयोर्यः संयोगः स एव कफपित्तयोरिति। उच्यते। अनेकैव संप्राप्तिः किन्त्वेकजातीयामाश्रित्य बुद्ध्यादेः सर्व्वत्राविशेषणाभिधानात्[८६]। एवमागन्तु संप्राप्तिरपि संयोगिभेदाद्भिन्नेति ज्वरलक्षणमाह ॥ २ ॥

स्वेदावरोध इत्यादि। स्वेदावरोधो घर्म्मानिर्गमः ताप इति वक्तव्ये सन्तापग्रहणाद्देहेन्द्रियमनसां तापं लक्षयति। यदुक्तं चरके देहेन्द्रियमनस्तापीति[८७] तथा वैचित्यमरतिर्ग्लानिर्मनः सन्तापलक्षणमिति। सर्व्वाङ्गग्रहणं सर्व्वाङ्गवेदना युगपदिति मिलितं लक्षणं प्रत्येकशो व्यभिचारात् स्वेदावरोधोऽपि कुष्ठपूर्व्वरूपे तथा सन्तापो दाहाख्यरोगे सर्व्वाङ्गग्रहणं सर्व्वाङ्गवातरोगे इति। ननु पैत्तिके स्वेदागमात् वातिके विषमारम्भविसर्गित्वेन सर्व्वाङ्गग्रहणाव्यवस्थिते चाव्यापकं लक्षणमिति। अत्र केचित्

---

(८६) सर्व्वत्रेत्यादि। सर्व्वत्र अविशेषेण अभिन्नरूपेण अभिधानात् एकैव संप्राप्तिरित्यन्वयः लक्षयति ग्रन्थकृदिति शेषः।

(८७) देहेन्द्रियमनस्तापीत्यादि। तत्र देहसन्तापो देहोष्णता। इन्द्रियसन्ताप इन्द्रियवैकल्यम्। उक्तञ्च इन्द्रियाणाञ्च वैकल्यं यत्तत् सन्तापलक्षणम्। वैकल्यमरतिर्ग्लानिर्मनः सन्तापलक्षणमिति। उक्तेति। उक्तिः सामान्यम् अपवादो विशेषलक्षणेन व्यवस्था इति।

युगपद्यत्र रोगे च स ज्वरो व्यपदिश्यते ॥३॥

कार्त्तिक कुण्डादयः समादधते उत्सर्गापवादभावेन व्यवस्थितिरिति तन्न सङ्गत मित्यन्ये विधौ[98] तूत्सर्गापवादभावो न तु लक्षणे अव्यभिचरति व्याप्तयोर्लक्षणदोषत्वात्[99] तस्मात् स्वे दोऽग्निरिति स्विद्यतेऽनेनेति व्युत्पत्त्या तस्यावरोधो दोष व्याप्तिः। वात ज्वरे यद्यपि वायोश्चलत्वेनारब्ध विसर्गयो वैषम्यं तथापि सर्व्वदेहगत ज्वरारम्भक[100] दोष दुष्टाग्निवृत्तेरनुद्भूत सर्व्वाङ्गग्रहस्य विद्यमान तैरेति न व्यभिचारः। चरकेतु ज्वरलक्षणं ज्वरप्राप्त्यात्मिकं लिङ्गं सन्तापो देहमानस इति। ननु शारीरोजायते पूर्व्वं देहे मनसि मानस इति। चरकवचनात् देह मनसोरन्योन्य व्यभिचारादलक्षणमिति चेन्न सूक्ष्मतरकाल व्यवहितस्यान्यतररूपस्यावश्यम्भावित्वात् यथा [1]गुणवद् द्रव्यमिति द्रव्यलक्षणं पूर्व्वरूप माह ॥ २ ॥

(९८) विधौ हीति। विधौ यथा सकथाकां यथामांहिंस्यात् सर्व्वाभूतानि शास्त्रवां श्वेत छागल मालभत इत्यादौ उत्सर्गापवादभावः सामान्य शब्दस्य विशेषेतर परता।

(९९) लक्षणदोषत्वादिति। तथाच सर्व्वत्र उत्सर्गाप वादभावे नैशाऽव्याप्त्यति व्याप्ति कारण सम्भवात् तयोर्लक्षण दोषत्वं न सम्भवतीत्याशयः। अनुद्भूतोऽप्रकाशितः। न व्यभिचारः न दोषः।

(१००) ज्वरप्राप्यात्मिकमिति। ज्वरप्राप्तिः ज्वरप्राप्तः आत्मा यस्य स ज्वरप्राप्त्यात्मा तस्येदं ज्वरप्राप्त्यात्मिकम्। अन्योन्य व्यभिचारं युगपद्देह मनसोः सन्तापाऽभवात्। अन्यतररूपस्य दैहिक मानसिक सन्तापस्य।

(१) यथा गुणवद्द्रव्यमिति। यदोत्पत्तिकालावच्छेदे गुण-

श्रमोऽरति विवर्णत्वं वैरस्यं नयनप्लवः ।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥
जृम्भाङ्गमर्दो गुरुता रोमहर्षोऽरुचिस्तमः ।
अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे ॥

श्रमेत्यादि । श्रमः श्रान्तत्वमिव अरति अनवस्थित चित्तत्वं क्रीडा भावोऽरतिरिति कार्त्तिकः । विवर्णत्वं म्लानगात्रत्वं यत्तु दुष्टाः स्वहेतुभिर्दोषा इत्यारभ्य स्वकालेषु स्वरागमनमभि इद्धिश्च सवर्णत्वञ्च त्वगादिष्विति संप्राप्तौ इह सुश्रुतादि वचनं तदत्यर्थं जृम्भादिवद्विशिष्ट पूर्व्वरूपाभिप्रायेण संप्राप्तावस्थापन्न दोष जन्यत्वात् पूर्व्वरूपस्येति । वैरस्यमिति मुखस्य विकृतरसता नयनप्लवोऽश्रुपूर्णं नेत्रत्वम् । यदुक्तं चरके गौरव नयने शास्ये इत्यादि आदि शब्दान्नव ज्वलनयोरपि अनिश्चितेच्छाद्वेषयोर्ग्रहणं यदुक्तं चरके ज्वलना तपवायम्बु भक्ति, द्वेषावनिश्चिताविति । अन्येतु शैत्योष्ण्यसाधर्म्याज्ज्वलानलौ ग्राहयन्ति आदि शब्दे न तु शयनादिकम् । तमोऽन्धकार प्रविष्टस्येवावस्थितिः अप्रहर्षः प्रीत्यभावः ज्वलनेच्छया शीते सत्य्ये शीतञ्चेति वचनं विशेष शीतबोधार्थं चकारेण वात मद्दपादि ग्रहण

सान्याभाववति द्रव्ये गुणस्यावस्थानाच्चित्वनियमात् तस्य गुणवत्त्व लक्षणं तयात्वाणीतिभावः । असमर्थ्यमिरत्तानम् । भविष्यतिज्वरे इति । भविष्यतिज्वरविषये श्रमादो तद्रूपं पूर्व्वमेव भवतीत्यर्थः ।

सामान्यतो विशेषेण जृम्भात्यर्थं समीरणात् ।
पित्तान्नयनयोर्दाहः कफादन्नारुचिर्भवेत् ॥
रूपैरन्यतराभ्यान्तु संसृष्टे द्वन्द्वजं विदुः ।
सर्वलिङ्गसमावायः सर्वदोषप्रकोपजे ॥ ४ ॥

मित्याहुः [२]उत्पतस्यतीति भविष्यति ज्वरे उत्पतस्यतीति आत्मनेपदानित्यत्वे तच्च चक्षिङ इकारानुदात्तेनात्मनेपदे सिद्धे तदर्थं ङितकरणेन ज्ञापितमिति शाब्दिकाः। गदाधरस्तूत्पत्स्यतीति पठित्वा पदगतादित्यस्यैव समन्तस्य सनिमिमीमादारभलभशकपतपदामित्यादिना इत्तके पूर्ववत् समर[३] इत्यत्र भिन्नवाक्यतया परस्मैपदमिति व्याचष्टे इति॥ वातपित्तकफानां यथा पूर्वं भूरिदारुण विकारकर्तृत्वेन प्राधान्यं यदुक्तं चरके

(२) उत्पतस्यतीति। आत्मनेपदानित्यत्वे सति उत्पतस्यतीति प्रयोगः सिद्धति। तच्च आत्मनेपदानित्यत्वञ्च। इकारेणानुदात्तेन इकारानुदात्तस्वरानुबन्धेन। तदर्थम् आत्मनेपदार्थम्। तथा च चक्षिङ इत्यस्य इकारानुदात्तेन आत्मनेपदे सिद्धे पुनस्तदर्थं ङित् करणेन तस्यानित्यत्वं ज्ञापितमिति शाब्दिका वदन्तीति समुदितार्थः।

(३) पूर्ववत् समर इति। समन्तादृधातोः पूर्वेण प्रकृत्यात्तस्य परस्मैपदमात्मनेपदञ्च इत्यत्रात्मनेपदिसमन्तादात्मनेपदस्य विधेयत्वे सिद्धे परस्मैपदञ्च हि वाक्यभेदाद्भिन्नवाक्यत्वं तेन कदाचित् आत्मनेपदिनः समन्तात् परस्मैपदम् अत एव आत्मनेपदिनः पदगतादित्यस्मात् समन्तात् परस्मैपदमिति गदाधराभिप्रायः।

(४) अशीतिरिति। अशीतिः प्रकाराः। तथाहि। अशीति वातजान् रोगान् नख भेदो विपादिका। पादशूलं पादखञ्जं पादयो-

॥ अशीतिर्वातविकाराश्चत्वारिंशत् पित्तविकाराः विंशति श्लेष्मविकारा इति तथा दारुणाश्च वातविकाराः आक्षेपक पक्षाघातादयः । अतः प्राधान्यात् प्रथमं वातज्वरमाह ॥ ४ ॥

भङ्ग स्तब्धता ।* गुल्फग्रहः पिण्डिकोद्वेष्टजानुभेदविच्युते । ऊरुस्तम्भोरुसादौ च पाङ्गुल्यं गृध्रसी । गुदभ्रंशो गुदार्त्तिः वृषणोत्क्षेपो मुष्कयोरपि । शेफस्तम्भो वंक्षणार्त्तिः श्रोणीभेदोऽथ खञ्जता । उदावर्त्तः खञ्जभेदः कुब्जवामनतातथा त्रिकग्रह पृष्ठो वक्षो वेष्टपार्श्व विमर्दनम् । हृन्मोहो हृद्द्रवश्चैव कम्पशोषौ च वक्षसः । ग्रीवास्तम्भो बाहुशोषो मन्यास्तम्भोऽथ कर्णरुक् । हनुता-म्भौष्ठशोषश्च दन्त शैथिल्य भेदनम् । वाग्ग्रहो मूकता कृच्छ्र मुखस्य च कषायता । अज्ञता रसगन्धानां घ्राणनाशास्य कण्ठरुक् । उच्चैः श्रवस्तु बाधिर्य शब्दग्रहणं तथा । वर्त्मोत्तम्भः काचौ च तिमिरं नेत्र-शून्यता । अक्षिभ्रुवोर्व्युदासश्च भेदः शङ्खललाटयोः । शिरोऽर्त्तिः केशभूस्फोटा अर्दितांशपदस्तकाः एकसर्वाङ्गरोगाश्च भ्रमः पक्षवधः क्रमात् । जृम्भानवस्थितत्वञ्च प्रलापः सप्रवेपथु । विषादो रौक्ष्य पारुष्यं ग्लानिः श्यावारुणास्यता । इति वातजाः । चत्वारिंशत् पित्तजाः स्फुरणा मायोथधूमकः । अम्लिका-वमथु दाहो विदाहः प्रबलोष्णता । अन्तर्दाहो ऽङ्गसादश्चाप्यति स्वेदोऽङ्गगन्धिता । अङ्गैकदेशस्फुरणं लोमांसाद्रजोरपि । त्वग्दाहो रक्तपित्तञ्च दरणं मांस चर्म्मणो । कोठमण्डलविस्फोटा वक्त्रस्य हरिताभता । हारिद्रनी-लिका कावकदलयो च कामला । तिक्तास्यता पूतिमुख्य अविस्रग-न्धास्यतापि च । तमः प्रवेशनं चात्यगुदमेढ्रादि व्यक्तता । हारिद्र मूत्रवर्णत्वं जिह्वादनमत्यता । इति पित्तजाः । विंशतिः श्लेष्म-जा आलस्द्राचाप्यु निद्राङ्ग गौरवम् । आलस्यं मुखमाधुर्यं स्तैमित्यञ्च मुखा-स्रवः । स्वेदाध्मानो मलाधिक्यं शोफ मेधधमनी तथा । तमः कण्ठो-पलेपश्च गलगण्डोति निद्रता । श्वेतामसूत्रविट्कत्व उदर्द शीतता तथा इति कफजाः ॥ धर्म्मेच्छा आतपेच्छा ।

वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम्।
निद्रानाशः क्षवः स्तम्भो गात्राणां रौक्ष्यमेव च ॥

वेपथुरित्यादि। एवमन्यत्रापि विषमो वेग इति वेगो ज्वरस्य प्रवृत्तिर्वृद्धिर्वा तस्य वैषम्यम् अनियतकालत्वम् अङ्गेषु चौष्ण्याद्यनियतत्वं क्षवश्छिक्का हाञ्छीति लोके। स्तम्भो गात्राणां जडिमा रौक्ष्यमपि गात्राणामेवेति। गदाधरादयो व्याचक्षते। तच्चानवधानात् व्याख्यातमिति लक्ष्यते क्षवस्तम्भ क्षवस्तम्भ इत्येक पदतायुज्यते यदाह वाभटः

जृम्भो रोमाञ्चदन्तेषु वेपथुः क्षवथुर्ग्रहः।
भ्रमः प्रलापो घर्म्मोच्छा विलापश्चानिलज्वरे इति।

चरकेणापि निदाने क्षवथूद्गारविनिग्रह इत्येवं पठितं विनिर्ग्रह शब्दस्तु क्षव विरोधार्थ एवाचार्य्येन निर्दिष्टः यथा वातगुल्मनिदाने रूक्षान्नपानं विषमातिमात्रं विचेष्टितं वेगविनिर्ग्रहश्चेति। तथात्यङ्गज्वर लक्षणे दोषवर्च्चोविनिग्रह इत्येवं पठितं एतेन(१) ज्वरमुक्तलक्षणे क्षवस्य

(१) एतेनेति। एतेन क्षवस्य स्तम्भएतद्वर्णकरणेन ज्वरमुक्ति लक्षणे क्षवस्य तस्मात् एतत् क्षवस्तम्भ ज्वरलक्षणं कथम् इति यदाशङ्कितं कार्त्तिककुण्डेन तदपि निरस्तमित्यन्वयः। पादसन्तापादस्य स्पर्शाज्ञता। पिण्डिकोद्वेष्टनं पिण्डिका जान्वोर्मांस पिण्डकाका। उद्वेष्टनं दण्डादिनेव पीडनम्। छर्दकामिता छर्द्यभिलाषः घर्म्मनिरोधः। कीदृशो धान्य विशेषः। अभ्यवहारो भक्षणम्। भिनत्ति विषम समवायारब्धस्य रोगस्य एषां रोगाणां प्रकृतिसम समवेते कार्य्ये रोग इति यावत्। द्वन्द्वसन्निपात लक्षणं मध्यमानामित्यर्थः। शूकशिम्बिधान्यादेर्यवमुद्गादेः। यदुक्तं यवादिकं शूकधान्यं मुद्गाद्यं शिम्बिधान्यकम्। विसृतेष्वा मयक्तं नमिति

शिरोहृद्गात्ररुग्वक्त्रवैरस्यं गाढविट्कता ।
शूलाध्माने जृम्भणञ्च भवत्यनिलजे ज्वरे ॥५॥
वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।

भावात् कथमनं लक्षणत्वमिति यदा शङ्कितं कार्त्तिककुण्डेनापि तदपि निरस्तम् । आध्मानं वायुना सर्वेदनमुदरपूर्णत्वं गात्रग्रहणेन शिरोहृद्ग्रहणेन सिद्धे तदभिधानं विशेषेण शिरसि हृदि वेदनार्थम् एतानि रूपाणि प्रायोभावित्वे निर्दिष्टानि सुश्रुतेन च कारेणान्यान्यपि चरकनिदानोक्तानि बोधव्यानि तान्येव सुश्रुतपाठेनोक्तानि सुख ग्रहणार्थं श्लोकेन निर्दिश्यन्ते ।

भवन्ति विविधावातवेदना पादसुप्तता ।
पिण्डिकोद्वेष्टनं कर्णस्वनो वक्त्रकषायता ॥
उरुसादोऽनुस्तम्भोविश्लेषः सन्धिजानुनोः ।
शुष्ककासोवमिर्लोमदन्तहर्षः श्रमभ्रमौ॥
अरुणं नेत्रमूत्रादि तृट्प्रलापोष्णकामिता ।
न्यणामेतानि लिङ्गानि जानीयाद्वातिके ज्वरे ॥ ५ ॥

वेगस्तीक्ष्ण इत्यादि अतीसारः पित्तस्य द्रवत्वेन मलप्रवृत्ति र्नत्वतीसार एव तस्य ज्वरोपद्रवत्वात् । निद्राल्पत्वम् अल्पनिद्रात्वम् उक्तं हि सुश्रुते निद्रानाशोऽनि-

---

करचरण चपलादिकम् । समानं सभावतः स्वीयं परिमाणं तदपेक्ष्य यस्मै दं है दैर्घ्य रारस्य सन्निपातस्य । द्वादशानामिति सन्निपातानाम् । अवसन्ति निश्चिवन्ति । आदिशेत् निर्दिशेत् । आम न-थौ आनदम मेचते प्रमीलका उद्दर्दिः । बाधते पीड़यति ।

कण्ठोष्ठमुखनासानां पाकः स्वेदश्च जायते ॥
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा ।

त्वात् पित्तादित्यादि । वमिः पित्तस्य कफस्थानगतत्वात् स्वदोषस्थानगमनं प्रायेण सामदोषेण स्रोतसां निरोधात् सर्वज्वरेषु घर्मनिरोधः । अत्र तु पित्तस्य तीक्ष्णत्वात् ज्वरप्रभावाद्वा घर्मसम्भवतीति प्रलापोऽसम्बन्धभाषणं वक्त्रकटुता मुखतिक्तत्वं चरके हि पैत्तिकनानात्मज चत्वारिंशद्विकारमध्ये तिक्तास्यता पाठादस्याभावाच्च कार्त्तिकस्तु रोचके कट्वम्लमुष्णं विरसञ्च पूतिः पित्तेन विद्यात् लवणञ्च वक्त्रमिति वचनं दृष्टान्तमुपन्यस्य कटुमुखत्वमपीच्छतीति तन्न तत्रापि सन्देहाद्यदुक्तं कटुःस्यात् कटुतिक्तयोरिति तथाक्तयोश्च कटुतिक्तवक्त्रः पीतं सरक्तं हरितं वमेद्वा । सदाहचोषज्वरवक्त्रशोषं सा पित्तकोपप्रभवा हि छर्दिरिति सुश्रुतवचनात् कटुमुखत्वमभीष्टव्यमिति । मूर्च्छेति मूर्च्छा रूपाद्यविज्ञानम् । तमःप्रवेशो-विस्मृतिरित्याहुः मदो मत्तत्वमिव यथा पूगकोद्रवधत्तूर-भक्षणादौ । भ्रम इति भ्रमश्चक्रस्थितस्येव भ्रमवद्वस्तु-दर्शनमाहुः । अन्ये तु स देहभ्रमणमाहुः ननु भ्रमस्याशीति वातविकारे पठितस्य वातात्मजत्वात् कथं पित्तविकारे पाठः । उच्यते न रोगोऽस्त्येकदोषज इति वचनात् पैत्तिकेऽपि वातानुबन्धाद्भ्रम इति जेज्जडः समाधानमुक्त-वान् । अथवा दोषदूष्यसंमूर्च्छनप्रभावात् कारणादृष्टस्यापि रूपस्य कार्य्यउपलम्भः यथा वातारब्धातीसारा-

पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ॥६॥
स्तैमित्यं स्तिमितो वेगः आलस्यं मधुरास्यता।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता।
प्रतिश्यायोऽरुचिःकासःकफजेऽक्ष्णोश्च शुक्लता।७

दाविनारुणत्वं हरिद्राचूर्णसंयोग इवलौहित्यं यदुक्तं सुश्रुते रजः पित्तानिलाद्भ्रमइति। तत्रापि वातानुगत-पित्तजत्वमेवबोद्धव्यमन्यथा भ्रमस्य वातिक नानात्मजत्व-मेव नस्यादिति। अपरे तु पित्तदूषित नेत्रत्वेन विपर्यस्त ज्ञानं पीत शङ्ख इत्यादिवत्। चकारः पूर्ववदनुक्त समु-च्चयार्थः तद्यथा तीव्रोष्णता रक्तकोठता शीतेच्छता दाहोरुचिरिति ॥ ६ ॥

स्तैमित्यमित्यादि स्तैमित्य मङ्गस्याद्रपटावगुण्ठितत्व-मिव स्तिमितोवेगोमन्दवेगः आलस्यमिति समर्थस्याप्यनु-त्साहः कर्मण्यालस्य मुच्यते इत्यालस्यलक्षणमाहुः स्त-म्भोऽङ्गसाध्वता तृप्ति तृप्तस्यैवानन्नाभिलाषः। उत्क्लेद उपस्थितवमनत्वमिव अरुचिरन्नमत्यभिलाषे अभ्यवहा-रासामर्थ्यमिति चकारः पूर्ववत्तेन तथाक्ते पीडकाः शीताः प्रसेकश्छर्दि तन्द्रिके। हृदयोपलेप उष्णाभिप्रियता-वह्निमार्दवमिति ॥ ८ ॥

---

(१) मन्या धमनीति। मन्याया जङ्घा पश्चाद्ग्रीवा शि-रामन्या इत्यमरः। तुद्यते व्यथ्यते। दूयते पीड्यते। एतेनापि च विधाः एतद्व्याख्याताः।

तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः॥
पर्व्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः।
स्तैमित्यं पर्व्वणां भेदो निद्रागौरव एव च॥

तृष्णेत्यादि पर्व्वाणि भिद्यन्त इव वेदना पर्व्वभेदः एतानि च लिङ्गानि विकृतिविषमसमवायारब्धस्य बोद्धव्यानि विकृति विषमसमवायारब्धत्वञ्चैषां केवल वातिकपैत्तिक-ज्वरलक्षणानां मध्ये केषाञ्चिदेवनियमेन पाठात्तदतिरिक्त लक्षण पाठात् बोद्धव्यं यथात्र वातपैत्तिकेऽरुचिरोमहर्षौ वक्ष्यमाणा वातश्लेष्मिके सन्ताप इति कार्त्तिकः एवं कफपि-त्तजे लिप्ततिक्तास्यता चनवस्थित शीतदाहौ एवं सन्निपा-तजे सास्रकलुषादि नेत्रत्वं शिरसो लोठनादि प्रकृतिसम समवेते तु वातादि ज्वर लिङ्गान्येव समस्तानि कतिपयानि वा भवन्ति अतएव चिकित्सिते चरकः विकृति विषमसम-वायावद्धानां द्वन्द्वसन्निपातज्वराणां लक्षणानि साक्षात् पठित्वा निदानस्थानोक्त वातादि ज्वरलिङ्गातिदेशेन प्रकृति समवेतानां लक्षण मुक्तवान् यदाह निदाने त्रिविधा प्रो-क्ताया या पृथग्ज्वराकृतिः सांसर्गसन्निपातानां तया चोक्तं स्वलक्षणमिति। एवं वक्ष्यमाण द्वन्द्वसन्निपातलक्षणं व्याख्येयम्। प्रकृतिसम समवायविकृतिविषमसम समवाययोश्चायमर्थः प्रकृत्याहेतुभूतया समः कार-णानुरूपः समवायः कार्य्यकारणभावसम्बन्धः प्रकृति सम समवायः कारणानुरूपं कार्य्यमित्यर्थः यथा शुक्लतन्तु समारब्धस्य पटस्य शुक्लत्वं विकृत्याहेतुभूतयाविषमः का-

शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम् ।
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥८॥
लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा ।
मुहुर्दाहो मुहुः शीतं पित्तश्लेष्मज्वराकृतिः ॥९॥
क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा ।
सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने ॥

रुणा । ननु रूपः समवायो विकृति विषम समवायः । यथा हरिद्राचूर्णसंयोगे लौहित्यमिति । सैमित्यं पर्वणाम्भेद इत्यादि स्वेदाप्रवर्त्तनं स्वेदस्या समन्तात् प्रकारेण प्रवृत्तिः । विकृतिर्विषम समवायारब्धत्वादिति कार्त्तिकः । युक्तञ्चैतत् । यदाह हारीतः । शिरोग्रहः स्वेद भवश्च कासो ज्वरस्य लिङ्गं कफवातजस्येति । स्वेदभवः स्वेदोत्पत्तिः मध्यवेगोनातितीक्ष्णोनातिमृदुरिति॥८॥

लिप्तेत्यादि श्लेष्मणा लिप्तञ्च पित्तेन तिक्तञ्च मुखं यस्तस्यभावो लिप्ततिक्तास्यता तन्द्रा निद्रावत्क्लान्तिः मोहोमूर्च्छा एतानि लिङ्गानि प्रायोभावित्वेनान्यान्यपि चरकोक्तानि बोद्धव्यानि तद्यथा तथा स्तम्भश्च संस्वेदः कफपित्त प्रवर्त्तनमिति ॥ ९ ॥

क्षणे दाह इत्यादि । रुजा शूलम् अस्थ्यादिभिः सम्बध्यते सास्रवे साश्रुणीकलुषे आविलवर्णे निर्भग्ना भुग्नता संकुचितता च ययोस्ते निर्भुग्ने विस्फारिते इत्यर्थः इति जेज्जड़ः अन्तःप्रविष्ट इत्यन्ये अति कुटिले इति चक्रः । शूकैः शूकशिम्बि धान्यादेः परिदग्धा-द्भवत् कृष्णवर्णा खरस्पर्शा गोजिह्वादिवत् कण्टक-

सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः ।
तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः ॥

ष्ठीविः सशब्दावयवता ष्ठीवनं रक्तस्य पित्तस्य वा मुखेन रक्तकोठिरणं शिरसो लोठनमिति । इतस्ततः शिरश्चालनम् । कृशत्वं नातिमात्राणां दोषपूर्णत्वेन प्रततं निरन्तरं कोठोपालक्षितत्वे पठितः तद्यथा वरटीदष्टसंस्थानः कण्डूयमानो लोहितोऽस्त्र कफपित्तात् चाधिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैरिति । मूकत्वं मन्दवचनत्वम् अवचनता वा गुरुत्वमुदरस्य । चिरात्पाकश्च दोषाणामिति चातिसामत्वाद्बहुत्वात् चकारादन्यान्यपि च बोद्धव्यानि यदाह वाग्भटः

तद्वच्छीतं महानिद्रा दिवाजागरणं निशि ।
सदा वा नैव वा निद्रा महान् स्वेदोऽथवा न वा ॥
गीतनर्त्तनहास्यादिविकृतेहाप्रवर्त्तनमिति ।
लिङ्गान्येतानि मुनयः सन्निपातज्वरे विदुः ॥

एतच्च लक्षणं त्रयोदशसु सन्निपातेषु मध्येषु समानात् हीनैर्दोषैस्तुल्यैरारब्धस्य ज्वरस्य चरकेण पठितं हृग्लश्चैकोल्बणादीनाञ्च द्वादशानां लक्षणं बोद्धव्यं तथाच काश्मीरपाठे चरकः ।

भ्रमः पिपासा दाहश्च गौरवं शिरसोऽतिरुक् ।
वातपित्तोल्बणे विद्याल्लिङ्गं मन्दकफे ज्वरे ॥
शैत्यं कासोऽरुचिस्तन्द्रा पिपासा दाहरुग्व्यथाः ।
वातश्लेष्मोल्बणे व्याधौ लिङ्गं पित्तावरे विदुः ॥
छर्दिः शैत्यं मुहुर्दाहस्तृष्णा मोहोऽस्थिवेदना ।

परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गतापरम् ॥
ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ।

मन्दवाते व्यवस्यन्ति लिङ्गं पित्तकफोल्बणे ॥
सन्ध्यस्थिशिरसः शूलं प्रलापो गौरवं भ्रमः ।
वातोल्बणे स्याद्द्व्यनुगे तृष्णा कण्ठास्यशुष्कता ॥
रक्तविण्मूत्रता दाहः स्वेदस्तृष्णाबलक्षयः ।
मूर्च्छा चेति त्रिदोषे स्याल्लिङ्गं पित्ते गरीयसि ॥
आलस्यारुचिहृल्लासदाहवम्यरतिभ्रमैः ।
कफोल्बणं सन्निपातं तन्द्राकासेन चादिशेत् ।
प्रतिश्यायच्छर्दिरालस्यं तन्द्रारुच्यग्निमार्दवम् ॥
हीनवाते पित्तमध्ये लिङ्गं श्लेष्माधिके मतम् ।
हारिद्रमूत्रनेत्रत्वं दाहस्तृष्णाभ्रमोऽरुचिः ॥
हीनवाते मध्यकफे लिङ्गं पित्ताधिके मतम् ॥
शिरोरुग्वेपथुश्वासप्रलापच्छर्द्यरोचकाः ।
हीनपित्ते मध्यकफे लिङ्गं वाताधिके मतम् ॥
शीतकं गौरवं तन्द्रा प्रलापोऽस्थिशिरोऽतिरुक् ।
हीनपित्ते वातमध्ये लिङ्गं श्लेष्माधिके विदुः ॥
वर्च्चोभेदोऽग्निदौर्बल्यं तृष्णादाहोऽरुचिर्भ्रमः ।
कफहीने वातमध्ये लिङ्गं पित्ताधिके विदुः ॥
श्वासः कासः प्रतिश्यायो मुखशोषोऽतिपार्श्वरुक् ।
कफहीने पित्तमध्ये लिङ्गं वाताधिके मतमिति ॥ १२ ॥

विकृतौ नियमो नास्ति तेन विकृतिविषमसमवाया अनेकप्रकारा भवन्ति । अतः सुश्रुतेनाप्येतादृशं सन्निपातं लक्षणं पठितम्

शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा॥
स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः।

नात्युष्णशीतोऽल्पसंज्ञो भ्रान्तप्रेक्षी हतप्रभः।
खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्जितः॥
साश्रुनिर्भुग्ननयनो भक्तद्वेषी हतस्वरः।
श्वसन् निपतितः शेते प्रलापोपद्रवान्वितः॥
अभिन्यासन्तु तं प्राहुर्हतौजसमथापरे।
सन्निपातज्वरं कृच्छ्रमसाध्यमपरे जगुरिति॥

तथा मालुकितन्त्रे द्वन्द्वजादिलक्षणमन्यथा पठितं तद्यथा।

वातपित्ताधिको यस्य सन्निपातं प्रकुप्यति।
तस्य ज्वरोऽङ्गमर्द्दस्तृट्तालुशोषप्रमीलकाः॥
आध्मानतन्द्रारुचयश्वासकासभ्रमश्रमाः।
पित्तश्लेष्माधिको यस्य सन्निपातः प्रकुप्यति॥
अन्तर्दाहो बहिः शीत तस्य तृष्णा विवर्द्धते।
तुद्यते दक्षिणं पार्श्वमुरःशीर्षगलग्रहाः॥
निष्ठीवेत् कफपित्तञ्च तृष्णाकण्ठश्च दूयते।
विड्भेदश्वासहिक्काश्च वाधन्ते च प्रमीलकाः॥
विष्फलग्नू च तौ नाम्ना सन्निपातावुदाहृतौ।
श्लेष्मानिलाधिको यस्य सन्निपातः प्रकुप्यति॥
तस्य शीतज्वरो निद्रा क्षुत्तृष्णापार्श्वसंग्रहः।
शिरोगौरवमालस्यं मन्याश्वासप्रमीलकाः॥
उदरं तुद्यते चास्य कटीवस्तिश्च दूयते।
सन्निपातवनिर्भेदा मकरीति सुदारुणः॥

क्षामत्वं नातिगात्राणां प्रततं कण्ठकूजनम् ।
कोठानां श्यावरक्तानांमण्डलानाञ्च दर्शनम् ॥

वातोल्बणः सन्निपातो यस्य जन्तोः प्रकुप्यति ।
तस्य तृष्णाज्वरग्लानिपार्श्वरुग्गूढविट्संचयाः ॥
पिण्डकोद्वेष्टनं दाहश्च स्वादोबलक्षयः ।
स्वरक्षास्यविभ्रत्वं शूलं निद्राविपर्य्ययः ॥
निर्भिद्यते गुदश्चास्य वस्तिश्च परिकृष्यति ।
आवध्यते भिद्यते च छिद्यते विलपत्यपि ॥
मूर्च्छति ध्मायतेरौति नाम्ना विस्फुरकः स्मृतः ।
पित्तोल्बणः सन्निपातो यस्य जन्तोः प्रकुप्यति ॥
तस्य दाहज्वरोघोरो बहिरन्तश्च वर्द्धते ॥
शीतञ्च सेवमानस्य कुप्यतः कफमारुतौ ॥
ततश्चैनं प्रधावन्ते हिक्काश्वास प्रमीलकाः ।
विसूचिकापर्व्वभेदः प्रलापो गौरवं क्लमः ॥
नातिपार्श्वरुजातस्य स्विन्नस्याशुविवर्द्धते ।
स्विद्यमानस्य रक्तञ्च स्रोतोभ्यः संप्रपद्यते ॥
शूलेन पीड्यमानस्य तृष्णादाहश्च वर्द्धते ।
असाध्य सन्निपातोयं शीघ्रकारीति कथ्यते ॥
नहि जीवत्यहोरात्रमेतेनाविष्टविग्रहः ।
कफोल्बणः सन्निपातो यस्य जन्तोः प्रकुप्यति ॥
तस्य शीतज्वरस्तन्द्रगौरवालस्यतन्मयः ।
छर्द्दिमूर्च्छातृषादाहभ्रमारोचकरुग्दहाः ॥
ष्ठीवनं मुखमाधुर्य्यं श्रोत्रवाग्दृष्टिनिग्रहः ।
सेचयो निग्रहश्चास्य यदा प्रकुरुते भिषक् ॥

मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च ।
चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः ॥ ।

तदात्वस्य भयं पित्तं कुर्य्यात्सोपद्रवं ज्वरम् ।
निरुद्धीते तु पित्ते च भयं वायुः प्रकुप्यति ॥
चिराच्छारस्य कोऽत्यर्थं मेदो मज्जास्थिधावति ।
¹तथात्र स्वातिभुक्ते वा चिरात्रं नहि जीवति ॥
मेदोगतः सन्निपातः कष्टदः समुदाहृतः ।
कामाच्छोकाच्च लोभाच्च भयाच्चायं प्रपद्यते ॥
²मध्यहीनाधिकै र्दोषैः सन्निपातो यदा भवेत् ।
तस्य रोगास्तएवोक्ताः यथा दोषबलाश्रया इत्यादिः ॥

---

(१) भयेति । स्वाति भुक्तेन भजन्तरितिशेषः । चिरात्रं नहि जीवतीति । चमेनातोऽत्यागपि हन्ति । प्रपद्यते उत्पद्यते ।

(२) मध्यहीनेत्यादि । मध्यहीनादिकै र्मध्यहीनवृद्धै र्दोषै र्यदा सन्निपातो भवेत् तदा उक्ताः कथिता एवते रोगाः यथा वेपथु निद्रानाश विजृम्भादयो वातजाः दाहतृष्णोष्णता स्वेदादयः पित्तजाः गौरवाग्नि मान्द्य मुख प्रसेकादयः कफजाः । यथादोषबलाश्रयाः दोषबल मनतिक्रम्य अर्थात् दोषबलमेव आश्रयो येषां ते अर्थात् मध्यदोषे कतिपय रोगाः हीन दोषे अल्परोगाः प्रवृद्धदोषे समुदितरोगास्तस्य सन्निपातस्य अर्थात् तत्सन्निपात समस्ते दनीया भवन्तीत्यर्थः । ननु वृद्धोदोषोरोगं करिष्यति मध्योदोषः समोदोषः इति यावत् कथं रोगं करिष्यति । अतः धातवस्तन्त्रका दोषा नायत्व समाप्तगुम् । समाः स्वकाय विशेषा बलाहोपचयावचंति । उच्यते अल्पदोषोमध्योपि अप्रकृत एव यतो ²प्रकृतितो दोषयोरपेक्षया मध्यत्वेन मध्यः मध्यकुपित इत्यर्थः । एवं हीनः अल्पकुपित इति ।

नमु वातादयः परस्परं विरुद्धगुणा विरुद्धगुणानाम्[८] सम्भूयैककार्य्यारम्भकत्वं नोपलभ्यते परस्परोपघातात् तुहिनदहनयोरिव तत्कथं सान्निपातिकविकारोत्पाद इति अत्र समाधानमुक्तं दृढबलेन विरुद्धैरपि नत्वेते गुणैर्घ्नन्ति परस्परम् । दोषाः सहजसात्म्यत्वाद्घोरं विषमहीनिवेति । एतच्चान्ये दूषयन्ति सहजत्वादित्यनैकान्तिकं[९] यतः सहजानपि धातून् दोषा उपघ्नन्ति । सात्म्यत्वादित्यपि साध्याविशिष्टं[१०] यतः सात्म्यत्वमबाधकत्वं तदेव च दोषाणां परस्परमिह साध्यम् यतोच्यते दोषा नोपघ्नन्तीति कोयमनुपघातः साध्यते विकृतेरकारकत्वम् अविनाशकत्वं वा

---

(८) विरुद्धगुणानामिति । विरुद्धा एकदेशतया ऽविद्यमाना गुणा येषां ते विरुद्धगुणास्तेषां सम्भूय मिलित्वा ऽवस्थितानां मिथ्याकार्य्यम् तावः समानकर्तृत्व नियमात्[?] उपलभ्यते उपपद्यते । विरुद्धैरपीत्यादि । विरुद्धैरपि गुणैर्विरुद्धगुणा विशिष्टा अपि एते दोषा वातपित्तकफाः परस्परं न तु घ्नन्ति कुतः सहजत्वात् सहोत्पन्नत्वात् सात्म्यत्वादबाधकत्वाद्वा यथा घोरं भयङ्करं विषम् अहीन न तु हन्ति तथेति ।

(९) अनैकान्तिकमिति । त्रिविधं साधारणो ऽसाधारणो ऽनुपसंहारिभेदात् अत्र साधारण एव तल्लक्षणन्तु यः सपक्षे विपक्षे च भवेत् साधारणस्स न इति । सपक्षे साध्यवति । विपक्षे साध्याभाववति । तथाच साध्याभाववद्वृत्ति हि हेतुः साधारण इति । एवं सति दोषरूप पक्षे सहजत्व हेतुना सामान्यत उपघातकत्वाभावसाधने सहजत्व हेतुः साधारण एव यत उपघात कर्तृत्वरूपसाध्याभाववान् यो दोषस्तत्र वर्त्तमानत्वादिति । अनेन च व्याप्तिर्बुद्धि प्रतिबन्धः क्रियत इति भावः ।

(१०) साध्याविशिष्टमिति । साध्याविशेषो हेतुसाध्ययोरैक्यता यथावह्निमान् वह्नेरिति ।

११

नाद्यः दोषाणां परस्परं विकृतिकर्तृत्वात् यथोक्तं चरके विशोषयेद्बस्तिगतं स शुक्रं मूत्रं स पित्तं पवनः कफञ्च । यदा तदाश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचना गो-रिति । यथोक्तं वाग्भटेन च श्लेष्मभेदः पवनः शामवत्वं-प्रचितम् । अभिभूयेतरं दोषं मूर्च्छेत् प्रतिपद्यते ॥ सकृद्यस्विनौ मयूर्थान्तः खे घना स्तिमिते यथा तदा समा-तितेनोल्वणौ प्रीतावचेतनौ इति ॥ अविनाशकत्वन्तु विकृत एव धातु दोषयोः११ परस्परस्य दोषाणां सर्वथो-च्छेद प्रतिपादकागमाभावात् सत्यमस्तु. अ दोषाणामपि देहधारणत्वात् तस्मात् सर्वथोच्छेदनिवाशाभिप्राये-णैव इदमुक्तमिति द्रष्टव्यं तत्कृतोऽनैकान्तिकता नचैवं सति विषस्य विषादकर्तृत्वेन दृष्टान्त विकलत्वम् । विषस्य१२ विषादान्तरव्यापारस्य प्राणविनाशकत्वात्तस्य

(११) धातुदोषयोरिति । परस्परमित्यस्य धातुदोषयोरित्यनेन दोषाणामित्यनेन च सम्बन्धस्तेन धातुदोषस्य दोषो धातोश्च न सर्वं नाश्छे-दकस्तथा दोषोऽपि न दोषाणामितिभावः । आगमः शास्त्रम् । तत्कृतो ऽनैकान्तिकतेति । तथाच अविनाशकत्वरूप अनुपपत्ति साध्यस्याभाववति वर्त्तमानत्वाद्व्यभिचार इति । ननु विषस्य विषाद कर्तृत्वमस्ति न विनाशकत्वं यस्मिन्नेव दोषाणां परस्परं विनाशकत्वं यत्र एव तत्कृतो घोरं विषमिति दृष्टान्त सङ्गति इत्याशङ्क्याह न चेति । नचैतस्य दृष्टान्त विकलत्वमिति परेणान्वयः । दृष्टान्तविकलत्वं दृष्टान्तस्या ऽसङ्गतत्वम् ।

(१२) विषस्येति । विषस्य यो विषादायान्तर व्यापारस्तस्य प्राणविनाशकत्वात् तथाच विषस्यापि परम्परा प्राणविनाशकत्वमस्त्ये वेतिभावः । ननु तथापि दृष्टान्त विकलत्वं यतः दृष्टान्तिके साक्षाद्

दोषे विबद्धे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः ।
सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्ततोऽन्यथा ॥

सर्वात्मनाऽदृष्टान्तो भवतीति सात्म्यत्वादित्यस्यायमर्थः सात्म्यत्वेन प्रतीयमानत्वात् दोषाः परस्परं नोपघ्नन्ति अनुपघातत्वेन प्रतीयमानत्वात् यद्यथा।१ प्रतीयते तत्तथा निर्दिश्यते यथाग्निकार्य्यो धूमोऽग्निकार्य्यत्वेनेति कुतः सात्म्याविशिष्टत्वमिति। चक्रदत्तस्तु सहजसात्म्यत्वादित्येकमेव हेतुं व्याख्यातवान् सहजं स्वाभाविकं दोषाणां सात्म्यमिति। दृढबले नोक्तहेतुद्वयानुरोधेन यदा यस्तु हेतुद्वयमुक्तवान्। दैवाद्दोषप्रभावाद्वा दोषाणां साम्निपातिकैः विरुद्धैश्च गुणैः कश्चिन्नोपघातः परस्परमिति सङ्क्षेपः। तस्य सन्निपातज्वरस्यासाध्यलक्षणमाह ॥१०॥

दोषे विबद्धे इत्यादि। दोषोमलं वातादिश्च नेच्छन्ति मलमाह विबद्धे इति वचनात् नष्टाग्नित्वं चाह-

---

विनाशकत्वं दृष्टान्ते च परस्परबाधकत्वं न दृश्यते नाह न वेति। सर्वात्मना सर्वांशेन दृष्टान्तोभवतीति न नियमः एकांशेनापि सम्भवात्। प्रकृतेच विनाशकत्वमुभयोः साम्यमिति।

(११) यद्यदेति। यद्यथा यद् यद्रूपेण प्रतीयते ज्ञायते तत्तथा तद् तद्रूपेण निर्दिश्यत इति सामान्यतोव्याप्तिः हेतुद्वया स्वरूपेणेति। सहजत्व सात्म्यत्वरूप हेतुद्वयस्य स्वरूपेण साधारणैकान्तिकत्वं द्वितीये तु साध्या विशेषत्व मित्य स्वरूपेण हेत्वन्तरमिति। एतादृश हेतुद्वयं परि- त्यज्य अन्यविध हेतुमिति। सन्निपातस्य निवृत्तिमाह भानुमिः। सं- भूता निविडादोषाः पातयन्ति कलेवरम्। ततं निपातनेर्हेतुत्वात् सन्निपातज्वरो मतः।

सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपिवा ।
पुनर्घोरतरोभूत्वा प्रशमं याति हन्ति वा ॥
सप्तमीद्विगुणा चैव नवम्येकादशी तथा ।
एषा त्रिदोषमर्य्यादा मोक्षाय च बधाय च॥"॥
सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः ।
शोथः संजायते तेन कश्चिदेव प्रमुच्यते ॥

रापाकगम्य[14] यदुक्तं चरके अग्निबलवशाच्छेति । अ-साध्य लक्षणाध्याभिधानेन सुखसाध्यो न भवतीति दर्शितम्। उक्त चरके सन्निपातो दुश्चिकित्स्यानामिति । तथा भा-लुकिः मृत्युना सह योद्धव्यं सन्निपातं चिकित्सतेति । सर्व्वसंपूर्णलक्षण इति सर्व्वाणि समग्राणि संपूर्णानि बलीयांसि लक्षणानि यस्य स तथा । सन्निपातज्वरोपद्रव-माह ॥ ११ ॥

सन्निपात्येत्यादि । आगन्तुज्वरानाह । अभिघातो-भिहननं शस्त्रलोष्ट्रमुष्टिलगुड़ादिभिः अभिचारः श्येनादि यागकृतो विपरीतैर्मन्त्रैर्लौहस्रुवाथर्व्वणादि होम इ-त्याद्यः अभिषङ्गःकामादीनां भूतानाञ्च सम्बन्धः । यदुक्तं चरके

कामशोकभयक्रोधैरभिपन्नस्य यो ज्वरः ।
सोभिसंज्ञो ज्वरो ज्ञेयो यश्च भूताभिषङ्गजः ॥

(१४) आहारापाकेति । आहारस्य योऽपाकस्तेन गम्यं ज्ञेय-मित्यर्थः । सन्निपातं चिकित्सतेति दैवेनेत्यर्थात् । अभिपन्नस्य दुःखस्य।

अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः ॥
आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत् ।
श्यावास्यता विषकृते तथातीसार एव च ॥
भक्तारुचिः पिपासा च तोदश्च सहमूर्च्छया ।

अभिशापो ब्राह्मणगुरुवृद्धसिद्धानाम निष्ठाभिशंसनम् । तत्रागन्तुज्वरं यथास्वं दोषैर्जानीयात् ॥ यदुक्तं कामशोकभयाद्वायुरित्यादि । अयञ्च दोषसम्बन्धः पश्चाद्भावी नत्वारम्भक इति संप्राप्त्यवसरे निरूपितं श्यावास्यतेति श्यावः शुक्लानुविद्धः कृष्णोवर्णः शाकवर्ण इत्येके विषकृते स्थावरविषभक्षणकृते अतीसारः तद्विषस्याधोगत्वात् । ओषधिगन्धज इत्यादि तीव्रौषधिघ्राणजे पुष्पेभ्योगन्धरजसी

संग्रहातिरिक्त पाठः ।

त्रयः प्रकुपिता दोषा उरः स्रोतोनुगामिनः ।
आमातिवृद्धा ग्रथिता बुद्धीन्द्रिय मनोगताः ॥
जनयन्ति महाघोरमभिन्यासं ज्वरं दृढम् ।
अतो नेत्रे प्रसुप्तिःस्यान्नचेष्टां काञ्चिदीहते ॥
न च दृष्टिर्भवेत्तस्य समर्था रूप दर्शने ।
न घ्राणं न च संस्पर्शं शब्दं वा नैव बुध्यते ॥
शिरो लोठयतेऽभीक्ष्णमाहारं नाभिनन्दति ।
कूजति तुद्यते चैव परिवर्त्तन मीहते ।
अल्पं प्रभाषते किञ्चिदभिन्यासः स उच्यते ॥
प्रत्याख्यातः स भूयिष्ठः कश्चिदेवात्र सिध्यति ।

ओषधिगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा ॥
कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम् ॥
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः ॥

शोणितभ्रमो यद्वानिलइत्यादिना इह सुश्रुते पठितं तथापुष्पाख्य ज्वरमत्रैवान्तर्भावयन्ति ॥ कामज इति अभिमतकामिन्याद्यप्राप्तिनिमित्ते चित्तविभ्रंशोन्मादिः यदाह वाग्भटः कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षय इत्यादिः ॥ १२ ॥

भयादिति। भयाज्जाते ज्वरे एवं[15] शोकात् कोपादित्यत्र तयो र्वैद्यव्यं शोकाच्च प्रलाप इति सम्बन्धः। विशेष[16]निश्चयो निदानात् निदानमपि कथयां सम्भवति प्रलापश्चात्र वातकार्य्यः तस्य[17] वातपित्तकार्य्यत्वात्। उक्तञ्च कामशोकभयाद्वायुः क्रोधात् पित्तमित्यादि यद्येवं तत्कृतः क्रोधजे वेपथुः तस्य वातकार्य्यत्वात् उच्यते एकः प्रकुपितो दोषः सर्वानेव प्रकोपयेदिति वचनात् पित्तकुपितवातजन्य एवात्र वेपथुः अथवा क्रुद्धश्च वेपमानो

(१५) एवमिति। यथा भयादित्यनन्तरं जाते ज्वरे इति योजनीयं तथा शोकात् कोपात् इत्येतयोः पदयोरनन्तरमपीति बोध्यम्।

(१६) विशेषेति। विशेषनिश्चयश्च शोकादि जाते ज्वरे प्रलापादेः शोकादि कार्य्यत्वनिश्चयः।

(१७) तस्येति। प्रलापस्य वातकोपित पित्तकार्य्यत्वात् वातेन कोपितं पित्तं तत्कार्य्यत्वात् तथाच प्रलापस्य परम्परया वातकार्य्यत्वमिति।

दृश्यते नहि दृष्टोऽनुपपन्नं(१८) नामेति जेज्जटः । क्रोधः पित्तमिव वातञ्च कोपयतीति तदुक्तं गदा हवि देवः

क्रोधशोकौ स्मृतौ वातरक्तपित्तप्रकोपकाविति ।

कोपाच्चेति चकारेण शिरोरुजं समुच्चिनोति यदाह वाग्भटः

क्रोधात् कम्पशिरोऽर्त्ति वक्प्रलापो भयशोकजे इति ॥

---

(१८) अनुपपन्नत्वमप्रकृतिः । तत्राभिचारिकैरित्यादि । तत्र चागन्तुज्वरमध्ये अभिचारिकैर्मन्त्रैर्हूयमानस्य जनस्य पूर्वं चेतस्यार्त्तिस्ततो देहस्य ततो विस्फोटादिविविध सदाहतृष्णोपद्रवस्य तस्य प्रवृद्धं ज्वरो भवतीत्यन्वयः । भूतसामान्यलक्षणा इति प्रयोगश्चा इत्यस्य विशेषणम् । येषां मन्त्राणाम् । यः स्यादित्यादि । यः कालादनवतः अनिश्चितः भिन्न भिन्न कालेऽपि स्यात् तथा शीतोष्णाद्यैरनियतः देहस्य कश्चिच्छैत्यजनकः कश्चिदुष्णता जनकः एवं वेगतः प्रकृतितो विकृतितो वा नतु केवलं नाममात्रतः विषमः भिन्न भिन्न प्रकारः स्यात् सज्वरो विषमः स्मृत इत्यन्वयः । एतत्समुदितं विषमज्वरस्य लक्षणं तेन न वातज्वरे इति प्रसङ्गः । अत्रानियतत्वं सर्वं दिनस्य वातादि षट् कालएव ननु सामान्यतः काल इति तेन तृतीयकादौ न दोषः । सततश्च सन्ततश्च नैरन्तर्य्य रूप समानार्थकौ । कथमेकशेष इति । एकः शिष्यते ऽपरो लुप्यते इत्येकशेषः सद्विविधः सरूपैकशेषः विरूपश्च । एतयोर्व्वार्थयोस्तु समानार्थानां भिन्नार्थानां वा तुल्यरूपाणामेकः शिष्यते समानार्थानां विरूपाणामेकः शिष्यत इति । सरूपैकशेषो यथा वृक्षा पादाश्चारुणश्चि तुर्यांशा इत्यादि । विरूपैकशेषो यथा माता च जननी च मातरौ जनन्यौ वा इत्यादि । यत्र माता च पिता च पितरौ श्वश्रूश्च श्वशुरश्च श्वशुरौ इत्यादि प्रयोगः विभिन्नार्थे सत्यपि सिध्यति तद् विशेष विधान् दृष्टमिति तथा चात्र सन्तत सतत शब्दयोर्विरूपत्वेऽपि संज्ञाशब्दत्वेन समानार्थकत्वाभावात् विशेष विधानाभावाच्च कथमेक शेष इति भावः । अनूर्ध्वं स्यात्तं युक्तमिति भावः । अनुपपन्नं अनुत्पन्नमिति अचिन्तनीयमिति भावः ।

अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते।
भूताभिषङ्गादुद्वेगो हास्यरोदनकम्पनम् ॥१४॥
कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयोऽमलाः।
भूताभिषङ्गात् कुप्यन्ति भूत सामान्यलक्षणाः॥१५॥

आगन्तुत्वाविशेषेऽपि श्रमक्षतादीनां पृथगुपपादो हेतुभेदात्। हेतुभेदाच्च भेदाभिधानं हेतु प्रत्यनीकचिकित्सार्थमिति ॥ १३ ॥

अभिचारेत्यादि। तृष्णाचेति चकारेणाभिचारजे दाहादिकं समुच्चिनोति यदुक्तम्। हारीतदर्शिना वाग्भटेन

तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते।
पूर्वंचेतस्ततो देहस्ततो विस्फोट तृड्भ्रमैः।
सदाहमूर्च्छाग्रस्तस्य प्रत्यहं वर्द्धते ज्वर इति॥

भूताभिषङ्गादिति भूतानि देवग्रहादय उन्मादनिदाने वक्ष्यमाणा तेषामभिषङ्गः सम्बन्धः। उद्वेग उद्विग्नचित्तता। आगन्तुजेषु प्रतिनियत दोषानुबन्धप्रदर्शनार्थमाह ॥ १४ ॥

कामशोकेत्यादि। त्रयो मलाभूताभिषङ्गात् कुप्यन्तीति भूतप्रभावात् यच्च चरकेण निदानस्थानेऽभिषङ्गजः पूर्ववातपित्ताभ्यामित्युक्तं तत्प्रायिकं मन्तव्यमिति जेज्जटः। चक्रस्तु अभिषङ्गज इत्यनेन कामाद्यभिषङ्ग उच्यते नतु भूताभिषङ्ग इति। भूतसामान्य लक्षणा इति यस्य भूतस्य देव यक्षादेरभिषङ्गात् कुप्यन्ति च तस्य यल्लक्षणं रोदनादि तेन सामान्यं सदृशं लक्षणं येषां ते तथा इति व्याचष्टे जेज्जटादयः दोषलक्षणानि भूतलक्षणानि च भवन्तीत्यर्थः। अथ विषमज्वरसंप्राप्तिमाह ॥ १५ ॥

दोषोऽल्पोऽहितसंभूतो ज्वरोत्सृष्टस्य वा पुनः ।
धातुमन्यतमं प्राप्य करोति विषमज्वरम् ॥१६॥
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान् ।
सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ॥

दोषोऽल्प इत्यादि । अल्प इत्यनेनातिबलत्वात् कालविशेषमपेक्ष्याल्पबलो ज्वरयति यस्तु बलवान् स नित्यं ज्वरमेव करोति तु अहितसम्भूत इति अहिताहाराचारादिसंभूतो दुष्टः ज्वरोत्सृष्टस्य सहसा छिन्नज्वरस्य वा शब्देन प्रथमतो विषमज्वरो भवतीति दर्शयति यदुक्तम् आरम्भात् विषमो यस्येत्यादि धातुमन्यतमं रसरक्तादिकं विषमज्वरं तृतीयादिकं विषमज्वरसामान्य लक्षणञ्च भालुकिना पठितम् ।

य: स्यादनियतः कालात् शीतोष्णाभ्यां तथैव च ।
वेगतश्चापि विषमो ज्वरः स विषमः स्मृत इति ॥

सन्ततादि ज्वराणां प्रतिनियतदूष्याण्याह ॥१६॥

सन्ततमित्यादि । सन्तत शब्दः सतत स्योपलक्षणः । तेनैतदुक्तं भवति रसस्थः सन्ततं रक्तस्थः सततमिति यदुक्तं चरके रक्तधात्वाश्रयः प्रायोदोषः सततकं ज्वरमिति प्रायोग्रहणात् सततको रक्तव्यतिरिक्तं रसधातुमाश्रयते रसग्रहणञ्चात्र विशेषपरं सर्वज्वरेषु रसस्यावश्यदूष्यत्वात् । अन्ये तु सतत ग्रहणार्थं सन्ततौ रसरक्तस्थाविति पठन्ति । तन्नातियुक्तम् अत हि सन्ततसतत

मेदोगतस्तृतीयेऽह्नि अस्थिमज्जगतः पुनः ।
कुर्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् ॥१७॥
सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ।
सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते ॥

शब्दौ संज्ञापरौ न तु वा तत्पर्यायवचनौ तेन सन्तत शब्देन सततकस्यानभिधानात् कथमेकशेष इति स इति दोषः । अन्येद्युरिति अन्येद्युष्कं घोरं दुःसहमन्तकं यम मिव मारकत्वात् । रोगसङ्करम् अनेक रोगसंकुलम् ॥ १७ ॥

सप्ताह मित्यादि । एते विकल्पा यथाक्रमं वातपित्तकफोत्थत्वेन ज्ञेयाः । यथोक्तं पित्तकफानिलवृद्ध्या दशदिवस द्वादशाह सप्ताहात् । हन्ति विमुञ्चति वा-युस्त्रिदोषजो धातुमलपाकादिति अयञ्च सन्ततस्त्रिदोषज एव द्वादशाश्रयत्वेन यदुक्तं चरकेण यथा धातूंस्तथा मलं पुरीषाद्यानिलादयः । युगपच्चानुपद्यन्ते[18] नियमात् सन्तते ज्वरे इति । सन्तत्या अविच्छेदेन सप्ताहादीन् व्याप्य अविसर्गी अपरित्यागी अत्यन्तसंयोगे द्वितीया ननु यद्येवं कथमस्य विषमज्वरप्रकरणे पाठः । [19]मुक्तानुबन्धित्वं विषमत्वं तच्चात्र नास्ति

(१८) अनुपद्यन्ते अनुगच्छन्ति आश्रिताभवन्तीति यावत् ।

(१९) मुक्तानुबन्धित्वमिति । आदौ मुक्तः पश्चादन्वी विषवासितादिवत् कर्मधारयस्य कामुता तस्य भावो मुक्तानुबन्धित्वमिति । दीर्घकालम् अनुवर्त्तत इति सन्ततज्वरः प्रकरणवशात् । तद्व्यपदेश कास्य मुक्तानुबन्धित्वस्य व्यपदेश स्यादयमन्द प्रयोगः । अध्यवसारः

अहोरात्रे सततको द्वौ कालावनुवर्त्तते ।
अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते ॥
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥१८॥

नैवम् अस्यापि ज्वराभावात्तथा च तत् लक्षणे चरकः (१९) द्वादशे कल्याद्दिवसे व्यक्तलक्षणः । दुर्लभोपशमः कालं दीर्घमप्यनुवर्त्तते इति यदुक्तं खरनादेन

ज्वराः पूर्वं मयोक्ता ये पञ्चसन्ततकादयः ।
चत्वारः सन्ततं हित्वा ज्ञेया स्ते विषमज्वराः इति ॥

तत्सन्तते मुक्तानुबन्धित्वस्य एकदाभावित्वेनाल्पत्वात् न तद्व्यपदेशः एकतन्तुनाम्बरकारे ऽनशान [illegible] व्यपदेशवत् । न तृतीयकादिवत् बाहुल्यान्मुक्तानुबन्धित्वमस्येत्यभिप्रायेण द्रष्टव्यम् अथवा (२०) या विषमज्वरोक्तेनोक्ता चिकित्सा सा सन्तते सर्व्वे सततादिषु कार्य्येति प्रतिपादनार्थं हरिचन्द्रेणापि कर्म्मसाधारणं जल्पात् । तृतीयक चतुर्थकाविति चरकवचनात् विषमज्वरोक्तचिकित्सा तृतीयकचतुर्थकयोरेव । अन्ये तु दोषप्रत्यनीकचिकित्साकार्य्येति व्याख्यातम् अस्यां हरिचन्द्रव्याख्यायां कर्म्मसाधारणं सर्व्वत्रैव विषमज्वरे कार्य्यं विशे-

---

षवचनम् । द्वादशेऽहनीति । आद्यब्रूपेण वर्त्तमानाहनिः सम्यक् स्थिति-रिति यावत् । तथाच द्वादशाद्या सम्यक् स्थिता । अस्य सन्ततज्वरस्य । दृष्टव्यं खरनादवचनमिति ।

(२०) अथवेति । चरका खरनादवचनम् इति प्रतिपादनार्थं दृष्टमभिमन्यतः । जल्पाद् कल्पाद् इत्यर्थो इत्यापत्या युक्तः ।

केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥ १९ ॥
कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ।
वातपित्ताच्छिरोग्राही द्विविधः स्यात्तृतीयकः ॥

मेवं तृतीयकचतुर्थकयोरपि द्रष्टव्यम् । अन्यथा उक्त तन्त्रान्तरविरोधः । अहोरात्रे सततको द्वौ कालावनुवर्त्तत इति । अह्नि द्वौ कालौ रात्रौ वा अह्नि एककालं रात्रावेककालमेवं वा द्वौ कालावितीशान देवः नियमानभिधानात् तथा दर्शनाच्चानुवर्त्तते वेगं करोति तृतीयेऽह्नि तृतीयक इति वेगदिनापेक्षया तृतीयेऽह्नि यो भवति स तृतीयकः एवं चतुर्थकेऽपि वाच्यम् ॥ १८ ॥

केचिदित्यादि । परवचनमप्रतिषिद्धमनुमतं सुश्रुतेन अतएव विषमज्वरे दैवव्यपाश्रयं बलिहोमादि भूतोचितं युक्तिव्यपाश्रयं कषाय पाचनादि दोषोचितं विधीयते । यदाह चरकः कर्म्मसाधारणं जह्यात् तृतीयकचतुर्थकौ । आगन्तुरनुबन्धो हि प्रायशो विषमज्वर इति अत्र साधारणमिति दैवयुक्तिव्यपाश्रयमिति व्याख्यायते इति । उक्तदोषभेदेन तृतीयकचतुर्थकयो लक्षणान्तरमाह ॥ १९ ॥

कफपित्तादित्यादि । त्रिकग्राहीवेदनया त्रिकव्यापी-त्रिकस्य वातस्थानत्वेन तद्गतौ पित्तकफावन्यस्थानगतत्वेन दुर्बलौ तृतीये दिने वेगं कुरुतः । यदि स्वस्थानस्थितौ स्यातां तदा सततमेव कुर्य्यातामिति जेज्जटः ।

चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ।
जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरोस्तोऽनिलसम्भवः

एवं शिरसि कफस्थाने षष्ठे च पित्तस्थाने बोद्धव्यं षष्ठादिति-ल्यब्लोपे पञ्चमी षष्ठं वेदनया व्याप्नोतीत्यर्थः । नच वाच्यं यदि त्रिकं वातस्थानं तत्कथं तत्र पित्त कफाविति प्रकृतिस्थानां हि दोषाणां स्थाननियमात् न प्रकुपितानां तेषां सर्व्वदेहगत्वात् । यदाह सुश्रुतः

कुपितानां हि दोषाणां शरीरे परिधावताम् ।
यत्र सङ्गः खवैगुण्याद्व्याधिस्तत्रोपजायते इति ॥

एवमन्यस्थानगतत्वेन दोषदौर्बल्यादिति चतुर्थकेपि वाच्यम् । प्रभावं कार्य्यरूपां शक्तिं द्विविधां विदधातीति जङ्घाभ्यां शिरस इति एतच्च पञ्चमीद्वयं पूर्ववत् । पूर्व्वमिति प्रथमं न भुत्वा-त [21] सर्व्वदेहं व्याप्नोति । श्लैष्मिक इति श्लेष्मोल्वणः । सन्ततसततकान्येद्युष्क तृतीयकचतुर्थकानां पञ्चानां सन्निपातजत्वात् । यदुक्तं चरके

प्रायशः सन्निपातेन दृष्टः पञ्चविधो ज्वरः ।
सन्निपाते तु यो भूयान् स दोषः परिकीर्त्तित इति ॥

अथवा प्रायो ग्रहणेन एकजाद्विदोषजा अपि भवन्ति अन्यंत्वाहुः विकृतिविषमसमवायारब्धाः सन्ततादयः सन्निपातजाः तेषां मेवोद्भूतदोषेण व्यपदेशः प्रकृतिसम सम-

(२१) तत्र भूत्वेति । वेदनया इति शेषः । अर्द्ध कायम् वः पूर्वं जङ्घा-दीन्यादि पञ्चमाय मानमर्द्ध तत्प्राप्तिः । भूत्वा नतिमतः प्राप्नोति सम्यक्‌।

विषमज्वर एवान्य श्चातुर्थक विपर्य्ययः ।
मध्येऽह्नी ज्वरयत्यादावन्ते च मुञ्चति ॥२०॥

व्यायामद्वारा वेते एकदोषजा द्विदोषजा अपि भवन्ति इति जेज्जटः । चतुर्थकस्तु पित्तेन न क्रियते एव व्याधिस्वभावात् । पित्तजगलगण्डवत् । नन्वस्ति पैत्तिकोपि चतुर्थकः तथाच हारितो व्याहरति

चतुर्थको नाम महोदारुणो विषमज्वरः ।
शोषणः सर्व्वधातूनां बलवर्णाग्निनाशन स्त्रिदोषजो ॥
विकारः स्यात् अस्थिमज्जगतोऽनिलः ।
कुपितं पित्तमेवन्तु कफश्चैवं स्वकालतः ॥
शीतदाहकरस्तीव्र स्त्रिकालं चानुवर्त्तते ।
स सन्निपातसम्भूतो विषमो विषमज्वरः ॥
ऊर्द्धं कायस्य[२२] स्पृशति यः पूर्व्वं सोऽनिलात्मकः ।
पूर्व्वं स्पृशत्यधःकायं श्लेष्मा पूर्व्वज्वरश्च सः ॥ इति

अत्राङ्कुरशुद्धरूपमत्र पित्तं मत्वारब्धकम् । कथमेषा प्रतीतिरिति चेत् स्थानविशेषानभिधानात् । अत एव हारितेनापि स्थानं नोदाहृतमेव जह्वादिवदिति चरकटीकाकृतो व्याचक्षते किन्त्वेषा व्याख्या तदा संगच्छते यदि पित्तलिङ्गसमुद्भूतं न दृश्यते तेनापि पैत्तिकः पचते ।

---

(२२) ऊर्द्धं कायमित्यादि । यः पूर्व्वं प्रथमं वेदनया ऊर्द्धं कायं प्राप्नोति सोऽनिलात्मकः एवं टीकासम्बन्धः बोद्धव्यः ।

आमाशयस्थः पवनश्छिन्नज्वरतोऽपि वा ।

कुपितः कोपयत्याशु श्लेष्माणं पित्तमेव चेति ॥

किन्तु नागभट्टेनास्य स्थाननियममुक्तमेव ।

अस्थिगतस्तु यः पूर्वं स्पृशति शोणितात्मकः ।

मध्यं कायस्य स्पृशति पूर्वं यस्तु स पित्तजः ॥

पूर्वं स्पृष्ट्वाऽधःकायं स श्लेष्मजः चतुर्थकः । इति

तस्मात् प्रायेण कफवाताभ्यां भवति पैत्तिकचतुर्थक-
ज्वरकादिभि र्नोदाहृतः । प्रायोऽसम्भवाहिति मन्तव्यम् ।
एषाञ्चोत्पत्तिक्रममहदसुश्रुतादयगदव्यः स चराश्च

अहोरात्रादहोरात्रात्[२१] स्थानात् स्थानं प्रपद्यते ।

ततश्चामाशयं प्राप्य करोति विषमज्वरम् ॥

कफस्थानविभागेन यथा संख्यं करोति हि ।

सततान्येद्युष्कत्र्याख्यचतुर्थकान् स प्रलेपकान् ॥ इति

अस्यार्थः आमाशय हृदयकण्ठशिरः सन्धयः पञ्च-
कफस्थानानि एषु स्थिते दोषे यथा संख्यं सततादयः
क्रियन्ते तत्रामाशयस्थिते च दोषे सततकः क्रियते,
द्विकालं तत्रामाशयप्राप्त्याऽन्वर्दा प्रसङ्गः । अहोरात्रेषु
कोपकालापेक्षया ज्वरोत्पत्तेः । हृदयस्थिते च दोषेण
आमाशयागत्यान्येद्युष्कः क्रियते एककालं च ततार-
म्भकदोषापेक्षया तस्य व्यवस्थितत्वात् । कण्ठस्थिते च

---

(२१) अहोरात्रादित्यादि । अहोरात्रादित्यत्र वर्त्तते पञ्चमी दोषा
वस्थितस्य अहोरात्रं व्याप्य स्थानात् स्थानं प्रपद्यते प्राप्नोति ततश्च विषम-
ज्वरम् आमाशयं प्राप्य विषमज्वरं करोति अर्थाद्दोषः इत्यन्वयः ।

दोषेण एकस्मिन् दिने हृदयमागम्यते अपरस्मिन्नामा-शयमागतज्वरं आरभ्यते तृतीयकः। एवं शिरःस्थि-तेन दोषेण कण्ठहृदयामाशयान् त्रीन् त्रिभिर्दिनैः क्रमेण प्राप्य चतुर्थकः क्रियते पुनः स्वस्थानगमनञ्च दोषाणां कृतवेगत्वेन लाघवात् वेगदिन एव भवति। सन्धिस्थितेन प्रलेपकः सन्ध्यश्चामाशयेऽपि सन्तीति सर्व्वदा भवति अयञ्चाविषमोऽपि[२४] विषमज्वरचरितः पठितः कफोत्थानोत्पादानुरोधात् उक्तं हि सुश्रुते प्रले-पकश्च विषमः प्रायः शोषाय शोषिणामिति। विषम-ज्वर एवान्यश्चातुर्थकविपर्य्यय इति अत्र तन्त्रान्तरम् अस्थिमज्जो भयगते चातुर्थक विपर्य्यय इति। मध्येऽह्नो-ज्वरयत्याद्यावन्ते च मुञ्चतीति। आद्यावेकदिनं न भूत्वा पुनर्द्दिनद्वयं भूत्वा अन्ते एकदिनं न भवतीति व्याचक्षते जेज्जडादयः। जज्जडात् मध्ये ज्वरयत्याद्यावन्ते च मुञ्च तीति इति पराशरवचनस्यापि स एवार्थः। जज्जडादिति जज्जडस्त्वादिदिनं विमुञ्चति दिनद्वयं ज्वरयति जज्जडस्त्वन्ते चतुर्थदिने मुञ्चतीति तात्पर्य्यतो व्याचष्टे। हरिचन्द्र स्त्वाह द्वे अहनी निरन्तरं ज्वरयित्वा तृतीयमेक महः पुनर्ज्वरयतीति एष चतुर्थक विपर्य्यय इति आदिदिना माधवोक्तरोगरूपाद्विविशेष्य नधार्य्यः चतुर्थकविपर्य्यय

---

(२४) अयञ्चेति। अयं प्रलेपकोऽविषमोऽपि विषमज्वरचरितः पठितः विषमज्वर समभिव्याहृतत्वेन पठितः। कफकृतानोत्पादानु-रोधात् कफकृतानोत्पत्त्यनुरोधात्। पथ्यावलाः।

सोपलक्षणत्वेन तृतीयकादि विपर्य्ययोऽप्युदाहर्त्तव्यः । तद्यथा मध्ये एकदिनं ज्वरयति चाह्नयो मुञ्चतीति तृतीयकविपर्य्ययः कालद्वये मुञ्चतीति सर्व्वमहोरात्रं ज्वरयतीति सततकविपर्य्ययः । एककालं विमुच्य सर्व्वमहोरात्रं व्याप्नोतीत्यन्येद्युष्कविपर्य्ययः । अत्र दोषविकृतिरेव नानाविधा हेतुरिति ।

कफस्थानेषु वा तिष्ठन् दोषो द्वित्रिचतुर्षु च ।
विपर्य्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनानिति ।

इत्यश्रुतवाक्यं व्याख्याणो जेज्जटः । अन्येद्युष्कतृतीयकचतुर्थकमात्रस्य विपर्य्यय मुदाहरति । तद्यथा-माशय हृदयस्य दोषेण यथोदाहृत एवान्येद्युष्कविपर्य्ययः आमाशय हृदयकण्ठस्थितेन तृतीयकविपर्य्ययः । तत्र एकस्मिन् दिने हृदयस्थो दोष आमाशयमागत्य ततश्चैनं च ज्वरयति तद्दिने कण्ठस्थो हृदयमायाति अपरदिने सोऽप्यामाशयमागत्य ज्वरयति एवं दिनद्वये भूत्वा पश्चादेकदिनेन भवतीति तृतीयकविपर्य्ययः । आमाशय हृदयकण्ठशिरःस्थेन दोषेण चतुर्थकविपर्य्ययः । तत्र यस्मिन् दिने हृदयस्थो दोष आमाशयमागत्य ज्वरयति तस्मिन्नेव कण्ठस्थो हृदयं शिरस्थश्च कण्ठमायाति अपरदिने हृदयस्थ आमाशयमागत्य ज्वरयति कण्ठस्थितश्च हृदयमायाति अपरदिने हृदयस्थ आमाशयमागत्य ज्वरति एवं दिनत्रये भूत्वा पश्चादेकदिनं न भवतीति चतुर्थकविपर्य्यय इति । एते च सर्व्व एव पथ्या न निबद्धाः

नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी॥२१॥

सर्व्वेषामेव मुनिप्रणीतत्वात् यथोक्तं स्मृतिशास्त्रे श्रुतिद्वैधन्तु यत्र स्यात् तत्र धर्म्मावुभौ मताविति इत्यन्ते च नानाविधा विषमज्वराः एष च न्यायः चरकसुश्रुतयोः कुष्ठवैधर्म्म्येण व्याख्यचन्द्रेण दर्शितः। नवा चिकित्साभेदोऽप्येषाम् उक्तः यैव तृतीयकादौ चिकित्सा सैव विपर्य्ययेऽपीति। उक्त[25]सकृत्याप्रलेपकादनुपद्रवत्वे[26] न तत्समधर्म्मिणि वातबलासके वाच्ये प्रतिलोमतन्त्रयुक्त्या वातबलासकमेवाह॥ २०॥

नित्यमित्यादि। वातबलासकाख्यो ज्वरोऽस्यास्तीति वातबलासकी नरस्तेन ज्वरेण शूनकः शोथी सीदत्यवसन्नो भवतीति शोथिनः स उपद्रव इत्यर्थः पुनः कृच्छ्रेण सिध्यतीति पाठान्तरे तेनेति शेषः। वातबलासकमेके कुम्भाह्वय पाण्डुरोगविषयमाहुरिति न यदा सो वातबलास-

---

(२५) उक्तसकृत्येति। उक्तसकृत्वा प्रलेपकोऽविषमोपि विषमज्वरचरितः पठितः कफस्थानोत्पादानुरोधादिति क्वचित् सकृत्वा प्रलेपकात् प्रलेपक कथनानन्तरम् अन्यदिक्शब्दस्यार्थे गम्यमाने पञ्चमी। यथा प्रलेपकः शोषिण उपद्रवो भवति तथा वातबलासकोऽपि शोथिन इत्यनयोरुभयोरुपद्रवत्वात् तद्रूपेण समानधर्म्मित्वं अभिप्रेत्याह।

(२६) उपद्रवत्वं नेति। तत्समानधर्म्मिणि प्रलेपक तुल्यधर्म्मिणि वक्तव्ये तत्रापि कथं प्रलेपकस्य न प्रथमो निर्देशः कुत इत्यत आह प्रतिलोम तन्त्र युक्त्येति। विलोमन्यायेनैव सकृत्वा इत्यर्थः।

प्रलिम्पन्निव गात्राणि घर्मेण गौरवेण वा ।
मन्दज्वरविलेपी च स शीतः स्यात् प्रलेपकः ॥ २२
विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।

कारणत्वाद्वातबलासकः बलासकः श्लेष्मापित्तमध्यस्थोऽव्यं यदुक्तं तन्मान्तरे वायुः प्रकुपितो [२०] दोषावुदीर्य्योभौ विधावति स शिरस्थः शिरः शूलमित्यादि यदुक्तं सुश्रुतेन
प्रलेपकं वातबलासकं वा कफाधिकत्वात् प्रवदन्ति तज्ज्ञा।
ततः श्लेष्मणोर्नित्यानुषक्तत्वेनेति ज्ञेयः । इयत्वं चास्य वातपित्ताभिभूतत्वात् कफस्येहस्य व्याधिप्रभावा-द्वेति ॥ २१ ॥

प्रलिम्प इत्यादि । मन्दज्वरश्चासौ विलेपी चेति मन्द-ज्वरविलेपीविलेपीत्वञ्चास्य यस्मात् घर्म्मगौरवाभ्यां लिम्पति बध्नातीत्यर्थः अयं कफपित्तजः यदुक्तं सुश्रुतेन प्रलेपकं वातबलासकं वेत्यादि यथा यक्ष्मणि ज्वरोदाहो-ऽतीसारश्च पित्तादृक्तस्य चागम इत्युक्तं यक्ष्मणि चायमत-तीति अन्ये तु त्रिदोष यक्ष्म जनितत्वेन त्रिदोषज एवायम् उद्भूतत्वेन तु कफपित्त व्यपदेशः । विषमज्वर विशेष-माह ॥ २२ ॥

---

(२०) दोषाविति। तौ दोषौ पित्तकफौ उदीर्य्य कोपयित्वा तस्मिन् तिष्ठतीति तद्वस्य कफस्यावस्थात् अत्र तस्मात्। तद्गुणचारेण तस्य रसस्य उपचारेण ।

तेनार्द्धं शीतलं देहे चार्द्धञ्चोष्णं प्रजायते॥२३॥
कायेदुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः ।
तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः ॥

विदग्ध इत्यादि । विदग्धेऽन्नरसे दुष्टे आहाररसे तथा दुष्टे पित्ते दुष्टश्लेष्मणि व्यवस्थिते सति तेन हेतुना देहेऽर्द्धं शीतलं कफेनार्द्धं चोष्णं पित्तेन प्रजायते अर्द्धत्व-चार्द्धनारीश्वराकारेण नरसिंहाकारेण वा यथा दोषव्यवस्थानं नियमहेतोरभावादिति ॥ २३ ॥

काय इत्यादि । कायेऽन्तरग्नौ कोष्ठ इति यावत् अन्ते हस्तपादे । उक्तार्थस्य विपर्य्ययेण ज्वरान्तरमाह काये श्लेष्मेत्यादि त्वकस्थावित्यादि त्वक शब्देन त्वकस्थो रस उच्यते तात्स्थ्यात्तदुपचार इति गदाधरः । जेज्जडस्तु त्वचमेवाह एतदभिप्रायेणैव चरकेण ज्वरेऽभ्यङ्गार्थं तैलादीनभिधाय उक्तं तैराशु प्रशमं याति बहिर्म्मार्गगतो ज्वर इति । तयोः श्लेष्मानिलयोः प्रशान्तयोरिति प्रशान्तवेगयो र्नहि विषमेषु दोषस्य शान्ति र्भवति पुनर्व्वेगागमात् । तदाह सुश्रुतः ।

स चापि विषमो देहं न कदाचिद्विमुञ्चति ।
ग्लानिगौरवकार्श्येभ्यः स यस्मान्न विमुच्यते ॥
वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते ।
धात्वन्तरस्थो लीनत्वात् सौक्ष्म्यान्नैवोपलभ्यते इति

इतरौ वातकफौ दाहशीतादीति । एको दाहादिः । अपरः शीतादिः । नन्वेतयोः संप्राप्तौ त्रिदोषजत्व मुक्तं

काये श्लेष्मा यदा दुष्टः पित्तञ्चान्ते व्यवस्थितम् ।
शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः ॥

तत्कथं संसर्गजा वित्युक्तम् । संसर्गो हि द्वयो र्भवति त्रयाणां सन्निपात इति [२८]स्थितिः । उच्यते संसर्गः सम्बन्धः स च द्वयोर्व्बहूनाञ्च भवति अत त्रयाणामुक्तः नचैवं सर्व्वत्र अथवा संसर्गः सौम्याग्नेय दोषकोटिद्वयमेलकः तत्र शीतादौ ज्वरे पित्तमनुबन्धः दाहादौ वात कफावनुबन्धौ अनुबन्ध्यश्च प्राधान्येन चिकित्स्योऽनुबन्धाविरोधेनेति प्रयोजनमेतस्य तयोर्दाहशीतादि ज्वरयोर्मध्ये दाह पूर्व्वो दाहादिः कष्ट इति दुःखप्रदः दाहादेः कष्टसाध्यत्वाभिधाने शीतादेरर्थतः अकष्टत्वमिति उक्त विषमज्वराणाम् उपलक्षणत्वात् अन्येपि विषमज्वरारात्रिज्वरादयो बोद्धव्या इति जेज्जडः उक्तञ्च तन्त्रान्तरे

समौ वातकफौ यस्य हीनपित्तस्य देहिनः ।
प्रायो रात्रौ ज्वरस्तस्य दिवाहीनकफस्य तु ॥ इति

सर्व्वेषु च विषमज्वरेष्वनुगमश्चावायोरनुः । यदाह सुश्रुतः

सर्व्वोऽनिलाद्धि विषमज्वरः समुपजायते ।
कफपित्ते हि निर्दिष्टे चेष्टयत्यनिलः सदा ॥ इति

तथा विदेहेपि पवनोगति वैषम्याद्विषमज्वरकारणमिति । एषाञ्च ज्वराणामन्त्यादि हेतुलक्षणाभावात् ।

---

(२८) स्थितिरिति । स्थितिर्व्यवस्थितिः सौम्याग्नेयेति । सौम्यं सोमकार्य्यं शीतं तस्य दोषः श्लेष्मानिलश्च तथा आग्नेयोऽग्निकार्य्यः दाहस्तस्य दोषः पित्तं एतत् सौम्याग्नेय मध्यस्थ दोष कोटिद्वयो मेलकः वायुः । मेलके मध्ये मध्यस्थानीयमरः । एतस्य संसर्गस्य चेष्टयति इत्यतः व्यवहारयति । अननुकरणात् योजनात् ।

त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च॥
करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः॥

अन्यथा भावोऽपि दृश्यते। तद्यथा सन्ततः स्वरूपं त्यक्त्वा सततादीनामन्यतमत्वं प्रतिपद्यते तथा चतुर्थक तृतीयकादीनां रूपं यदाह चरकः।

> कालप्रकृतिदूष्याणां प्राप्यैवान्यतमाद्बलम् ।
> अन्यतमस्थाने व्यस्तास्तं प्रपद्यते इति ॥

अस्यार्थः। बलाबलादिति कालादि प्रत्येकेन सम्बध्यते। बलस्याबलस्य बलाबलम् अर्थशब्दः प्राकृतवाचीत्यं तं कालं सततकाद्युक्तम्। ज्वरः प्रतिपद्यत इति योजना उदाहरणञ्च कालप्रकृतेः बलाबलाद्यथा यदा निदानोत्पन्नः वातप्राधान्यः चतुर्थको वर्षासमयमाप्नोति तदा तेनर्त्तु माप्यायित बलस्तृतीयकादीनां सततकादीनामन्यतमत्वं प्राप्नोत्युत्कर्षात् एवं वर्षासुसमुत्पन्नः सन्ततः शरदं प्राप्यापकृष्टबलः सततादीनामन्यतमत्वमेवापकर्षात् एवं पित्तकफरोगावपि उत्कर्षापकर्षौ ऋतुकृतौ व्याख्येयौ। अहोरात्रशब्देन कतिपयान्यहोरात्राणि गृह्यन्ते नहि एकस्मिन्नहोरात्रे सन्ततादीना मुत्कर्षापकर्षाभ्यामन्यथाभाव इति लभ्यते किन्तु कतिपयैरेव यदा वर्षाशरद्वसन्तप्रारम्भ ज्वरश्चातुर्थकं वातादय आरभन्ते तदा मध्यानि कतिपयदिनानि अवाप्य स एव तृतीयकपूर्व्वकत्वेन विप-

द्वावेतौ दाहशीतादि ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ॥२५॥

रिणमते उत्कर्षात् । अपकर्षात्तु यदान्यानि दिनान्याप्नोति तदा सन्ततः वातारब्धः प्रावृषः पित्तारब्धः शरदो वसन्तस्य श्लेष्मारब्धः प्रतनुकत्वात् दोषस्य सततादीनामन्यतमत्वेन विपरिणमते इति दोषबलाबलाद्यथा यदा सततादीनामन्यतमकारी दोषः श्लेष्मा मधुरस्निग्धादीन् दिवास्वप्नादींश्च हेतूनाप्नोति तदा सन्ततं करोति एवं वातपित्तयोरप्युदाहार्य्यम् । मनोबलाबलाद्यथा यथा सन्ततज्वरी सत्यगुणोद्रेकात्[28] प्रहर्षावष्टब्ध बहुलो भवति तदा सततादीनामन्यतमत्वं प्राप्नोति यदा चतुर्थक ज्वरी तमोगुणभूयिष्टत्वाद्विषादादिभिरभिभूयते तदा तृतीयकादीनामन्यतमो भवति यतो विषादो रोगवर्द्धनानामित्यागमात् अन्येतु मनःशब्देन बुद्धिमाख्यापयन्तिकारणे कार्य्योपचारात् तस्याश्च बलाबलं यदा चतुर्थको ज्वरी प्रज्ञापराधात् देवतादीनभिभूय अहितान्याचरति तदा तृतीयकं पूर्व्वेषामन्यतमत्वमाप्नोति यदा तु शुद्धसत्वोत्कर्षात् विवेकिन्या बुद्ध्या युक्तः स्यात् तदा शुभानि देवताराधनेष्टिबल्युपहारादीन्याचरति तदा सन्ततज्वरी सततादीनामन्यतमत्वं प्राप्नोति । अर्थवशाद्यथा सन्तत-

(२८) प्रहर्षेति । अवष्टब्धः सम्बद्धः प्रहर्षस्यावष्टब्धः प्रहर्षावष्टब्धः स एव बहुलो यस्य स तथा ।

गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ ।
रसस्थे तु ज्वरे लिङ्गं दैन्यञ्चाप्युपजायते ॥
रक्तनिष्ठीवनं दाहो मोहश्छर्द्दिर्न विभ्रमौ ।
प्रलापः पीडका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥२५॥

ज्वरेणापि यदि चातुर्थिक(१०) वेदनीयं कर्म्म स्यात्तदा सन्ततोऽपि चतुर्थकत्वेन विपरिणमते । अथ चतुर्थकज्वराविष्टस्य यदि तत्कालपाकि कर्म्म बलीयो भवति तदा सन्ततत्वेन परिणमते । एतच्च कर्म्मवशत्वं त्वहोरात्र दोषबलाबलेष्वपि बाह्यं तदन्तर निर्देशादिति । उक्त वातादि ज्वराणां धातुविशेषदूष्यतयाधिकलक्षणानि भवन्ति यदुक्तं

वातपित्तकफोत्थानां ज्वराणां लक्षणं यथा ।
तथा तेषां भिषक् ब्रूयाद्रसादिष्वपि बुद्धिमानिति ॥

एतदभिधानञ्च रसादिधात्वविरोधेन वातादिचिकित्साकरणार्थम् ॥ २४ ॥

ततस्तानाह ।

गुरुतेत्यादि । हृदयोत्क्लेशः हृदयस्थितस्य दोषस्य उपस्थितवमनत्वमिव रसस्य हृदयस्थत्वात् रसस्थ इत्यनेन

तृतीयकादीनामन्यतम इत्यनन्तरान्वयात् पुरणीयम् । तृतीयकपूर्व्वाणामिति । तृतीयकास्यते पूर्व्वे येति तृतीयक पूर्व्वे तेषां पूर्व्वेषां तृतीयकादीनामित्यर्थः ।

(१०) चातुर्थिकवेदनीयमिति । यदि चातुर्थिक ज्वरेण वेदनीयमनुभेयं कर्म्म कर्म्मादीनां फलैरनुमेयत्वात् स्यात् भवेदित्यर्थः तदा तत्कर्म्मवशत एव सन्ततोऽपीति । तत्काल परिपाकीति । चतुर्थकज्वरस्य वर्त्तमानकाले परिपक्वं कर्म्म सन्तत वेदनीय मित्यर्थात् बलीयो बलवद्भवतीति ।

पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता ।
ऊष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे॥
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्दिरेव च ।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ॥
भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च ।
विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ॥
तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा ।
अन्तर्दाहो महाश्वासो मर्मभेदश्च मज्जगे॥२६॥

विशेषेणात्र रसो दूष्यः सर्व्वेषामेव ज्वराणां रसानुगतत्वात्
दैन्यं क्लान्तचित्तत्वम् ॥२५॥

पिण्डिकेत्यादि । पिण्डिका नाम जङ्घामांसपिण्ड-
स्तस्य उद्वेष्टनं दण्डादिना पीडनेनैव वेदना पिण्डिको-
द्वेष्टनमेव मन्यत्रापि सृष्टमूत्रपुरीषता प्रवर्त्तमानमूत्रपु-
रीषता ऊष्मा वह्निः एतच्च विशेषपरं प्रायः सर्व्वज्वरेषु
तथा भावात् ऊष्मान्तर्दाहविक्षेपाविति पाठान्तरे ऊष्मान्त-
श्चान्तर्दाह इत्यर्थः । विक्षेपं हस्तादिचालनम् । भृशं स्वेद
इति घर्म्मस्य मेदोमलत्वात् तद्विकृत्यैव दौर्गन्ध्यञ्च गात्रेष्वस-
हिष्णुता वेदनया असहिष्णुत्वं कोपनत्वमिति कार्त्तिकः ।
भेदोऽस्थ्नामिति भेद इव भेदः भग्नवत् पीडयेत्यर्थः पर-
पदार्थेषु प्रयुज्यमानाः शब्दा वतिमन्तरेणाप्यर्थं गमयन्ति
यथाग्निर्माणवक । एव मन्यत्रापि भेदादौ द्रष्टव्यं कूजनं

मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः॥२७
वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्।

कुन्थन कुन्थनमिति पाठान्तरे, गात्रेण सङ्कोच इत्यर्थः तमः प्रवेशनं अन्धकारप्रविष्टस्येव भ्रान्तिः महाश्वासः श्वासाधिकारे वक्ष्यमाणलक्षणः मर्म्मशब्देन हृदयमुच्यते प्राधान्यादिति कार्त्तिकः तस्य छेद इव मर्म्मच्छेदः ॥२६॥

मरणमित्यादि। शुक्रगतस्य तत्र तेषु रसादिधातुगतज्वरेषु मध्ये शुक्रस्थानगते मरणं प्राप्नुयादिति योज्यं शुक्रस्य तत्स्थानमिति शुक्रस्थानं न तु शुक्रस्य स्थानं शुक्रस्थानं शुक्रस्य सर्व्वदेहगतत्वेन नियतस्थानासम्भवादिति कार्त्तिकः। यदुक्तं यथा पयसि सर्पिस्तु गुडश्चेक्षुरसे यथा शरीरेषु तथा नृणां शुक्रं विद्याद्भिषग्वर इति विशेषत इति पदेन शुक्रस्य बाहुल्येन विसर्गः अन्यस्यापि रक्तादेरिति वदन्ति ॥२७॥

वर्षेत्यादि। वर्षादिषु वाताद्यैः क्रमाद्यो ज्वरः स प्राकृतः वर्षासु वातिकः शरदि पैत्तिकः वसन्ते श्लैष्मिकः अन्यान्योः वैकृतः यथा वर्षासु पैत्तिक इत्यादि स इति वैकृतो दुःसाध्यः अर्थात् सुखसाध्यः प्राकृतः इति यदुक्तं प्राकृतः सुखसाध्यस्तु वसन्तशरदुद्भव इत्यादि। अत्र वाग्भटेन वातजस्य प्राकृतत्व प्रशमनं यत्कृतं तदन्येषामनन्यको दुःसा-

वैकृतोऽन्यः स दुःसाध्यः प्राकृतश्चानिलोद्भवः ॥
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ।

ध्यत्वेन वैकृतादभिन्नत्वात् जतूकर्णेनापृथक् न पठितः । यदाह वसन्तशरदोः प्रायः प्राकृतोऽन्यत्र वैकृत इति । अत्रोच्यते न प्राकृतत्वं सुखसाध्यत्वव्यापनपरा संज्ञा किन्तु कुम्भकारादिवत् यौगिकत्व[11] यतो यथर्तु कुपितो दोषः प्रकृतिरुच्यते । ततो भूतः प्राकृतः तेन प्राकृतत्वेपि दोषप्रभावात् वातिकस्य दुःखसाध्यत्वं वैकृतादभिन्नत्वात् । दुःखसाध्यत्वेन वैकृतसाधर्म्यात् चरकजतूकर्णाभ्यां नोक्तः न तु प्राकृतत्वाभावादित्यभिप्रायो वाभटस्येति । अन्यरोगेषु प्राकृतत्वेन दुःसाध्यत्वं ज्वरस्य तु व्याधिप्रभावात् सुखसाध्यत्वं तन्त्रान्तरं हि ज्वरे तुल्यर्तुदोषत्वं [12]प्रमेहे तुल्यदूष्यता रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणमिति । तेषामेव प्राकृतज्वराणां चिकित्सार्थमुत्पत्तिक्रममाह[11] वर्षास्वित्यादि दुष्ट इति कुपितः ग्रीष्मसञ्चितत्वात् पित्तश्लेष्मान्वित इति तत्कालोचितपित्तकफानुबन्धः । यदुक्तम् ।

---

(११) यत इत्यादि । यस्मादृतुमनतिक्रम्य कुपितो दोषः प्रकृतिरुच्यते ततो भूतप्राकृत इति । तुल्यर्तुदोषत्वमिति । तुल्यऋतुदोषो यस्य तस्य भावस्तुल्यर्तुदोषत्वं तथा च यद्यपि ज्वरस्य दोषो यदि ऋतुदोषः स्यादिति भावः । एवं रोगान्तरेऽपि तुल्यदूष्यता दृष्टव्येति ।

(१२) वर्षास्वसञ्चितत्वेनेति । यदुक्तं वर्षासु सञ्चितं पित्तं प्रायः शरदि कुप्यति ।

कुर्य्यात्पित्तञ्च शरदि तस्य चानुबलः कफः ॥
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ॥३८॥
कफो वसन्ते तमपि वातपित्तं भवेदनु ॥३९॥

भूबाष्पान्मेघनिष्यन्दात् पाकादम्लजलस्य च ।
वर्षास्वग्निबले क्षीणे कुप्यन्ति पवनादय इति ॥

कुर्य्यादिति । क्रुद्धः पित्तस्य शरदीति दुष्टं ज्वरं कुर्य्यादिति पूर्व्वोक्तेन सम्बध्यते । एवं कफो वसन्ते इत्यपि योज्यं पित्तवृद्धिश्च शरदि वर्षासु सञ्चितत्वेन अनुबलोऽनुबन्धः तस्य च हेतु वार्षिक[१४]कालानुवृत्तिरेव । तत्प्रकृत्येति तयोः पित्तश्लेष्मणोः प्रकृत्या स्वभावेन तत्र तयो ज्वरयोर्नानशनात् लङ्घनात् न भयं भवति यदुक्तम् ।

कफपित्ते द्रवे धातू सहेते लङ्घनं महत् ।
[१५]विसर्गाच्च हेतोर्नानशनाद्भयम् ॥

वर्षाशरद्धेमन्ता विसर्गाः तत्रोपचितबलाः प्राणिनो भवन्ति सोमबलत्वात् शिशिरवसन्तग्रीष्मास्त्वादानं तत्रापचितबलाः प्राणिनः सूर्य्यबलत्वादिति व्युत्पादितं शास्त्रे तत्प्रकृत्या विसर्गस्येति पाठान्तरे तत्प्रकृत्या कफपित्त प्रकृत्या विसर्गस्य च प्रकृत्येति योज्यम् ॥३८॥

कफ इत्यादि । तं कफम् अनु वातपित्ते भवतः । अनुबन्ध

---

(१४) वार्षिकेति । वर्षाकालोत्पन्नक्लेदसेवनम् ।

(१५) विसर्गा इति । विसृजति सोमो बलमस्मिन्निति विसर्गः ।

काले यथास्वं सर्व्वेषां प्रवृत्तिर्वृद्धिरेव वा ॥३०॥
निदानोक्तानुपशयो विपरीतोपशायिता ॥३१॥

रूपे भवतः इत्यर्थः हेतुश्चात्र वसन्तस्यादानमध्यत्वेनाग्नेय-
त्वात् वातपित्तप्रकोपत्वम्। यदुक्तं चरके[१६] आदान
मध्ये तस्यापि वातपित्तं भवेदृतु इति अत्र कफपित्तप्रकृत्या-
मनुगमं युक्तमेव किन्त्वादानमध्यत्वेन निर्भयं तत्प्रकार्य्यं
अतएव तत्र नामग्रहणाद्वयमित्ये तस्मात् पूर्व्वमेव पठितम्
अन्यथा सर्व्वशेषे पठितं स्यादिति ॥२९॥

काल इत्यादि। यथास्वं काले यस्य वातादेर्यः प्रको-
पकालः तत्र अन्यस्य ज्वरस्य प्रवृत्तिरुत्पादो वृद्धिर्वा
भवति अथवा प्रवृत्तिर्नित्यज्वरस्य वृद्धिर्विषमज्वरस्येति
कालोऽपि वा ॥३०॥

दोषविशेषस्य लक्षणं तथोपशयानुपशयावपि लक्षण-
मित्याह।

निदानेत्यादि। निदानत्वेन ये उक्ता आहाराचारादयः
[१७] तैरनुपशयो दुःखं निदानोक्तानुपशयोः विपरीतैर्दी-

---

(१६) आदाना इति। रविरादत्ते सर्व्वेषां बलमस्मिन्नित्यादानम्। ऋत्वादिकं विज्ञापितम्। अस्य वह्निवेगस्य।

(१७) अन्नपानेति। अन्नपानक्रियाया यत्साधनं हेतुभूतं तत् अन्नपानसाधनं अस्योपलक्षणत्वात् लङ्घनादिकमपि तद्व्यतिरिक्तं लभ्यमिति। अतएव तन्त्रान्तरे अन्नसाधनं पेयादिपानसाधनं मद्य-मांसादि लङ्घनादिकमपि प्रयुज्यते न्यस्तस्तु मुख्यभेषजत्वमस्यैव

अन्तर्दाहोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः ।
सन्ध्यस्थिशूलमस्वेदो दोषवर्चोविनिग्रहः ॥
अन्तर्वेगस्य लिङ्गानि ज्वरस्यैतानि लक्षयेत् ।
सन्तापोऽभ्यधिको बाह्यस्तृष्णादीनाञ्च मार्दवम् ।
बहिर्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च ॥२२॥
लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः ।

धातुत्पादाहाराचारैरुपशायिता सुखजनकशीलत्वं विपरीतोपशायितेति ।

ज्वराणां मध्ये सम्प्राप्तिवशात् कश्चिदन्तर्वेगो भवति कश्चिद्बहिर्वेगस्तयोर्लक्षणमाह ।

अन्तर्दाह इत्यादि । श्वसनं श्वासः स्रंसनमिति पाठान्तरं तदयुक्तमिति जेज्जडः । यतोऽन्तर्वेग एव सुश्रुते गम्भीराख्यया पठितः तत्र च श्वासः पठित इति विनिग्रहोऽप्रवृत्तिः । तृष्णादीनामित्यादि शब्देनोक्तप्रलापादीनां ग्रहणं मार्दवं स्वल्पत्वम् अस्य सुसाध्यत्वाभिधानेनान्तर्वेगस्य कष्टसाध्यतां सूचयत्यसाध्यतां वा गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्ज्जयेदिति सुश्रुतदर्शनादिति ॥२२॥

चिकित्साविशेषार्थं आमपच्यमानपक्वलक्षणमाह ।

निरोधः । तथा च गुल्मभेषजसम्बन्धो निषिद्धस्तरुणज्वरे । तोयपेयादिसेवाद्यैर्निरोधः तत्र भेषजम् । गुल्मभेषजं काथस्य सम्बन्धः पानम् । कषायं स्वदनं काथोऽयमुक्तिकारसः पाचनान्यविपक्वानां दोषाणां तरुणज्वर इति ।

तन्द्रालस्या विपाकास्य वैरस्यं गुरुगात्रता ॥
क्षुणाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः ।
आमज्वरस्य लिङ्गानि न दद्यात्तत्र भेषजम् ॥
भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम् ।
ज्वरवेगोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः ॥
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥२२॥

लालेत्यादि । ननु न दद्यात्तत्र भेषजमिति विरुद्धं द्विविधं हि भेषजम् । उक्तञ्च चरकेण द्रव्यभूतमद्रव्यभूतञ्चेति तत्र द्रव्यभूतं कषायादि अद्रव्यभूतं लङ्घनस्वेदादि तत्र लंघनादिकं षडङ्गादिश्चतत्र प्रयुज्यते उच्यते भेषजश-ब्देनात्रानुपानसाधनव्यतिरिक्ता कल्पनोच्यते ननु सामान्ये नौषधमात्रं कथमेषा प्रतीतिरिति चेत् [१८] तथा भेषजनि-षेधेऽपि तेषां विधानदर्शनात् एवं पच्यमाने बोद्धव्यं त-त्रापि सामतायाः सद्भावात् ॥२२॥

(१८) तेषां • लङ्घनादीनाम् । ननु षडङ्गादीनां द्रव्यभूतत्वेन कषायत्वात् कथं तेषां विधानं युज्यते यतः सामान्यतः कषायस्य नि-षेधदर्शनात् यदाह न कषायं प्रशंसन्ति नराणां तरुणज्वरे । कषायेणा-कुलीभूता दोषा जन्तोः सुदुस्तरा इति । आकुलीभूताः प्रबद्धाः इति चेत् क्वाथरूपकषायस्य निषेधो न तु सामान्यतः यदुक्तं तन्त्रान्तरे यः कषायः कषायः स्यात् स वर्ज्यस्तरुणज्वरे इति । सः क्वाथरूपकषायः नवज्वरे निषिद्धः अतएव अभियुक्तैरपि क्वाथरूपकषायस्य कषायपुष्टा-त्वदर्शनेन षडङ्गादयो विहिता यथा पादशिष्टः कषायः स्यात् सः सोऽष्टमगुणाम्भसा । कथितोऽतः षडङ्गादि र्न निषिद्धो नवज्वर इति ।

क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्दवम् ।
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ॥
बलवत् स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥३४॥

क्षुदित्यादि । असमासकरणात् क्षुदादयो व्यस्ताः समस्ताश्च अष्टाहश्च पृथक् लक्षणमिति जेज्जटः । हरिचन्द्रस्त्वाह असत्यप्यष्टाहे क्षुदादिभिर्निरामत्वं [३९] दोषप्रवृत्त्या वा क्षुधाद्यभावेऽप्यष्टाहे नैव शिष्यहितैषितया कालं लक्षणञ्च निर्दिष्टवानिति । द्विविधा हि सामता एका रसस्य ज्वरारम्भकस्य रससामता तु मुखवैरस्यादि लक्षणा दोषसामता तरुणत्वरूपा साष्टाहेनापैति अत्र च हरिचन्द्रेण हेतुरुक्तः सप्ताहं नैव पच्यन्ते सप्तधातुगता मलाः । निरामश्चाप्यतः प्रोक्तो ज्वरः प्रायोऽष्टमेऽहनीति । सप्तानां धातूनां धात्वग्निना सप्ताहेनामपाकात् अष्टाहेनैव [४०] नैराम्यमिति रससामताष्टाहात् परतोऽप्यनुवर्त्तते एवमर्थं जेज्जटोऽपीच्छति यदेवं लिखति चरकसुश्रुतटीकायां तरुणसामताष्टाहादपैति रससामता तु परेणापीति एतत् प्रयोजनञ्च तरुणसामतायामौषधञ्चोपयुज्यते रससामतायान्तु पाचनं दीयते अत एवाह चरकः ।

(३९) दोषप्रवृत्त्या वेति । दोषप्रवृत्तिश्च दोषाणां स्वमार्गसञ्चा-रलक्षणैः ।

(४०) अष्टाहे नैराम्यमिति । उक्तञ्च चक्रदत्तेन सप्ताहं नैव पच्यन्ते सप्तधातुगता मलाः । निरामश्च ततः प्रोक्तो ज्वरः प्रायोऽष्टमेऽहनि ।

ज्वरितं षडहेऽतीते लघ्वन्नप्रतिभोजितम् ।
पाचनं शमनीयं वा कषायं पाययेत्तु तमिति ॥

तथा । अष्टौ ज्वरे लघौ देहे प्रचलेषु मलेषु च ।
पक्वं दोषं विजानीयात् ज्वरे दद्यात्तदौषधम् ॥ इत्यभिधायापि । एतत् सुश्रुतेन पठितम् ॥

सप्तरात्रात्परं केचिन्मन्यन्ते देयमौषधम् ।
दशरात्रात्परं सर्व्वे दातव्यमिति निश्चितम् इति ॥

तेनैवं ज्ञापयति, स[illegible]पाचनमपि न दीयते इति कार्त्तिककुण्डेनापि व्याख्यातं, ननु ज्वरितं षडहेऽतीते इति चरकवचनस्य सप्तरात्रात्परमित्यादेः सुश्रुतवचनस्य च विरोधः, यतः षडहेऽतीते इति सप्तदिनं भवति तत्र कषायं विधत्ते इति । उच्यते-षडहेऽतीते सप्तमे लघ्वन्नप्रतिभोजितमष्टमे कषायं पाययेदिति अष्टमपदलोपाद्बोध्यं-रसौदनवदिति चक्रः । भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरमिति दोषश्रुतेः सुश्रुतविरोधाच्च । प्रकारान्तरेण एतमर्थं कार्त्तिककुण्डोऽप्याह तद्यथा षडहेऽतीते इति ज्वरोत्पाददिनं परित्यज्य विगणनादवशिष्टदिनपरिहारेण चारकालगणनावत् । [42]एवं पाययेदातुरं साममौषधं सप्तमे

(४१) नैराम्यमिति । उक्तञ्च चरकेण, सप्तरात्रेण पच्यन्ते सप्तधातुगता मलाः । निरामस्तु ततः प्रोक्तो ज्वरः प्रायोऽष्टमे दिने । षडहेऽतीते इति लङ्घनेन व्यतीत इत्यर्थः ।

(४२) एवं पाययेदिति । सामम् अर्थात् आमदोषयुक्तम् आतुरं सप्तमे दिने औषधं अर्थात् पाचनम् । पाययेत् निरामं दृष्ट्वा शमनौषधं-

दिने। प्रागनेनाथवा दृष्ट्वा निरामं तमुपाचरेदित्येतदपि वचनं व्याख्येयम्। भट्टारहरिचन्द्रेणापि सप्तमदिने कषायपानं यद्व्याख्यातं तस्यायमेवाभिप्रायो गवेषणीयः सुश्रुतादिविरोधात् चन्द्रिकाकारेणापि व्याख्यातम्, अचिरोत्पन्नचतुष्टयवत् ज्वरस्य सप्ताहं सामताकालः, तत्र न पाचनं न वा शमनं न शोधनीयमिति, यत्तु पेयाद्यनन्तरं हारीतेनोक्तम् एतां क्रियां[४३] प्रयुञ्जीत षड्रात्रं सप्तमेऽहनि। पिबेत् कषायसंयोगात् ज्वरघ्नां साधुसाधितामिति तथा इति षड्रात्रिकः प्रोक्तो नवज्वरहितो विधिः। ततः परं पाचनीयं शमनीयं ज्वरे हितम्। हारीतवचनस्य[४४] पूर्ववदष्टाह प्रतिपादकं द्रष्टव्यम्। अथवा पित्तज्वराभिप्रायेणैव तद्वचनद्वयं यदाह सुश्रुतः। सप्तरात्रात् परमित्यारभ्य यावत्।

पैत्तिके[४५] वा ज्वरे देयमल्पकालसमुत्थिते।

गतम् आतुरमुपाचरेत् चिकित्सेदिति। एतदपि वचनमेवं ज्वरोत्पादनदिनं विहाय व्याख्येयम्। गवेषणीयः अन्वेषणीयः।

(४३) एतां क्रियामिति। एतां लङ्घनादिरूपां क्रियां षड्रात्रं प्रयुञ्जीत। सप्तमेऽहनि कषायसंयोगात् अर्थात् कषायेण साधितां ज्वरविनाशिनीं पेयां पिबेत्। कषायसंयोगात् ज्वरघ्नात् साधुसाधितात् इति पाठे तु पेयादीन् इति विशेष्यपदं योज्यम्। इतीत्यादि नवज्वरहितो विधिः नवज्वरे विहितो विधिर्लङ्घनादिः षड्रात्रिकः षड्रात्रे भवः षड्रात्रं व्याप्य कार्य्य इति यावत् इति प्रोक्तस्ततः परं सप्तमेऽहनीत्यर्थः॥

(४४) पूर्ववदिति। ज्वरोत्पादनदिनं परित्यज्य गणनात्, हारीतवचनाद्वचनद्वयस्य अष्टाहप्रतिपादकं द्रष्टव्यमिति योजना॥

(४५) पैत्तिकेवेति। अल्पकालसमुत्थिते पैत्तिके ज्वरे दोषपाकतः

अचिरज्वरितस्यापि भैषज्यं दोषपाकत इति ॥

सप्ताहात् परतोऽपि [४६]यदेतत् पाचनं कषायपानमुक्तं तन्नात्युद्भूतसामतायां द्रष्टव्यं यदाह वाग्भटः ।

सप्ताहादौषधं केचिदाहुरन्ये दशाहतः ।
केचिल्लघ्वन्नभुक्तस्य योज्यमामोल्बणे न तु ॥
तीव्रज्वरपरीतस्य [४७]दोषवेगोदयो यतः ।
दोषेऽथवातिनिचिते तन्द्रास्तैमित्यकारिणि ॥
अपच्यमानं भैषज्यं भूयो ज्वलयति ज्वरमिति ।
अयमर्थोऽभियुक्तैश्च कैश्चिदुक्तश्चिकित्सकैः ॥
[४८]सप्ताहात् परतो स्तब्धे सामे स्यात् पाचनं ज्वरे ।
निरामे शमनं स्तब्धे सामे नौषधमाचरेदिति सङ्क्षेपः ॥

विस्तरस्तु कषायनिर्णयप्रकरणे द्रष्टव्यः । पक्वज्वर-

दोषपाकं दृष्ट्वा भैषज्यं देयं न तु दशरात्रापेक्षा तथा अचिरज्वरित-स्यापि पैत्तिके तरुणज्वरयुक्तस्यापि दोषपाकं दृष्ट्वा भैषज्यं देयमिति ॥

(४६) सप्ताहादित्यादि । लघ्वन्नभुक्तस्य जनस्य किञ्चिदौषधं सप्ताहात् सप्ताहमारभ्य देयमित्याहुरन्ये, केचिद्दशाहतः देयमिति केचिदाहुः इत्यनुद्भूतसामतायां आमोल्बणे अत्युद्भूतसामतायान्तु न देयमिति ॥

(४७) अत्र हेतुमाह तीव्रेति । यतस्तीव्रज्वरेण परीतस्य व्याप्तस्यामौषधदानेन दोषवेगोदयो भवतीति योज्यम् । दोषेऽथवेत्यादि-निचिते सञ्चिते तन्द्रास्तैमित्यकारिणि दोषे भैषज्यम् औषधम् अपच्यमानं सत् भूयो बाहुल्येन ज्वरं ज्वलयति उद्दीपयति इत्यर्थः अभियुक्तैर्निपुणैश्चिकित्सकैः । यस्यामवस्थायां पाचनं शमनञ्च देयं, यस्याञ्च न देयं तदाह ॥

(४८) सप्ताहादित्यादि । स्तब्धे सामे इति वाक्यप्रक्षेपकत्वादि

अनेन जीर्णज्वरलक्षणमपि चिकित्सोद्दिष्टं बोद्धव्यम्। यदुक्तं तन्त्रान्तरे, आसप्तरात्रमित्यादि[४९] अतुकर्णेनाप्युक्तम्। जीर्णस्तु त्रयोदश दिवस इति।

त्रिसप्ताहव्यतीतस्तु ज्वरो यस्तनुतां गतः।
प्लीहाग्निसादं कुरुते स जीर्णज्वर उच्यते॥

इति तु तन्त्रान्तरम् अतिपुराणाभिप्रायेण द्रष्टव्यम्। ज्वरस्तु साध्यलक्षणमाह बलवदिति, बलवत्सु पुरुषेषु साध्यः। यदुक्तं[५०] बलाधिष्ठानमारोग्यमिति॥ अल्पदोषेषु नातिप्रबलदोषेषु, अनुपद्रव इति ज्वरस्योपद्रवा हि कासादयः। यदुक्तं तन्त्रान्तरे।

रसामतालक्षणस्य निवृत्तौ सताम् अर्थात् पाके लघुभावे लघु-भावक्षाद्यवेक्षणन्यायेन स्थितस्य कोष्ठावलेपकामभागस्य पाकार्थं पाचनं देयं निरामे पाचनेन कोष्ठावलेपकस्य पाकाद्व्यक्तनिरामत्वे सति शमनं देयं, तथा च आमे लालाप्रसेक इत्यादि रसामतालक्षणयुक्ते सति औषधं नाचरेदिति।

(४९) आसप्तरात्रमित्यादि। तद्यथा आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः। मध्यं द्वादशरात्रन्तु पुराणमत उत्तरमिति॥ अत्र आ-मर्यादायाम्। रात्रिशब्दो दिवसोपलक्षकः। तेन सप्तादिवसादर्वाक् ज्वरस्तरुण इत्यर्थः। तथा चोक्तं तन्त्रान्तरे। ज्वरे व्यतीते षडहे जीर्ण इत्युच्यते बुधैरिति।

(५०) बलाधिष्ठानमिति। बलाधिष्ठानं बलाश्रयमिति भावप्रकाशे यदाश्रितबलं प्रकाशते तदेवारोग्यमित्यर्थः। वैद्या साधयन्ति प्राप्नुवन्ति। आपादयन्ति उत्पादयन्ति। अधिरोहन्ति प्राप्नुवन्ति। आलाद्य प्राप्य। अवरुध्यते त्यजति। एकौघ विसर्गे इत्यस्य रूपम्। प्रच्यवते चरति। लेपज्वरोपद्रवस्य प्रलेपकज्वरयुक्तस्य। जीवितं जीवनम्॥

हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः ।
ज्वरः प्राणान्तकृद् यश्च शीघ्रमिन्द्रियनाशनः ॥
ज्वरः क्षीणस्य शूनस्य गम्भीरो दैर्घ्यरात्रिकः ।

कासोमूर्च्छारुचिच्छर्दितृष्णातीसारविड्ग्रहाः ।
हिक्काश्वासाङ्गभेदश्च ज्वरस्योपद्रवा दश इति ॥२४॥

ज्वरस्यासाध्यलक्षणमाह ।

हेतुभिरित्यादि । ननु यो हेतुभि र्बलभि र्बहुभि र्जायते स बहुलक्षण एवोत्पद्यते । किं बहुलक्षणवचनेन ? उच्यते, यथा स्वहेतुकुपिता दोषाः सर्व्वस्यैव रोगस्य हेतवो भवन्ति प्राक्तनकर्मापेक्षया तु यदा विशिष्टां सामग्रीं सम्प्राप्तिलक्षणामासादयन्ति तदा ज्वरमापादयन्ति तथा दूष्यादिसहकारिकारणसान्निध्यात् । बहुलक्षणतामल्पलक्षणताञ्च कुर्व्वन्ति तथाहि तन्त्रान्तरम् ।

एकं द्वौ त्रीन् बहून् वापि देहे धात्वादियोगतः ।
दर्शयन्ति विकारांस्तु कुपिताः पवनादय इति ॥

अपिच विकृतिविषमसमवायत्वात् बहुहेतुकोऽप्यल्पलक्षणः अल्पहेतुकोपि बहुलक्षण इति । प्राणान्तकृदिति छेदः । शीघ्रमिन्द्रियनाशन इति उत्पन्नमात्र एव चिकित्स्यमानोऽपि इन्द्रियशक्तिं रूपादिग्रहणलक्षणामुपहन्ति, सोऽप्यसाध्यो नतूपेक्षया अन्येऽपि हि रोगा उपेक्ष्यमाणा इन्द्रियमुपघ्नन्ति असाध्यताञ्चाधिरोहन्ति एवं बहुलक्षणोऽपिचादावेव चिकित्स्यमान एव बोद्धव्यः इन्द्रियाण्यत्र एकदेश बोद्धव्यानि सांख्यसिद्धान्तेन । तथा चरकसुश्रुतनि-

असाध्यो बलवान् यस्य केशसीमन्तकृज्ज्वरः ॥
गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ।
आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च ॥३५॥

द्दिष्टत्वात्, चक्षुःश्रोत्रं घ्राणं रसनं स्पर्शनञ्चेति धीन्द्रियाणि हस्तपादगुदोपस्थजिह्वाकर्मेन्द्रियाणि उभयात्मकं मन एव-मन्यत्रापि द्रष्टव्यम् । ज्वरःक्षीणस्य शूनस्य इति अपरम-साध्यलक्षणं गम्भीरदैर्घरात्रिक इति गम्भीरोऽन्तर्धा-तुस्थः अथवा गम्भीर इव गम्भीर यत्र वातादीनां नि-श्चयो न शक्यते कर्त्तुम् । अन्येत्वाहुः गम्भीरोऽन्तर्वेगः दैर्घरात्रिक इति दीर्घरात्रानुबन्धीतिजेज्झडः दीर्घां मरणरूपां रात्रिमनुवर्त्तते इति दैर्घरात्रिक इति चक्रः, असाध्य इत्यर्थः अत्र पक्षे दैर्घरात्रिक इति पूर्वेण सम्ब-ध्यते असाध्य इति परेण । केशसीमन्तकृदिति अकस्मात् केशेषु सीमन्तान् यः करोति । उक्तं हि तन्त्रान्तरे ।

केशाः सीमन्तिनो यस्य संक्षिप्ते विकृते भ्रुवौ ।
लुनन्ति चाक्षिपक्ष्माणि सोऽचिरात् याति मृत्यवे ॥

गम्भीरार्थादयोऽपि जेज्झडादिभिः व्याख्याताः । तेषु मध्ये गम्भीरोऽन्तर्वेग इत्ययमर्थो माधवकरस्याभिमतः,यत एत-दनन्तरं सोऽस्तुतः गम्भीरलक्षणं लिखति गम्भीर इत्यादि यस्तु चरकेऽन्तर्वेगः पठितः स एव सुश्रुते गम्भीरः पठितः समलक्षणत्वात् पृथक्पाठाभावाच्चेति आनद्धत्वेनचेति विबद्धमलत्वेन ॥३५॥

आरम्भाद्विषमो यस्तु यवादैर्घरात्रिकः ।
क्षीणस्य चातिरूक्षस्य गम्भीरो यस्य हन्ति तम् ॥
विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा ।
शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ॥
यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान् ।
वक्त्रेण चैवोच्छ्वसिति तं ज्वरो हन्ति मानवम् ॥२६॥

आरम्भेत्यादि । आरम्भादुत्पादात् प्रभृति यः विषमज्वरः सोऽसाध्यः यस्य तु नित्यज्वरिणो ज्वरोत्सृष्टस्य वा अपचारादिना विषमः स साध्य एव । एतच्च विषमत्वम्, सततादिरूपं बोद्धव्यं न तु विषमत्वमात्रेण वातिकज्वरेऽपि प्रसङ्गादिति, दैर्घरात्रिकः व्याख्यात एव न चास्य पुनरुक्तत्वं तन्त्रान्तरीयवाक्यत्वात् अधिकार्थप्रतिपादनार्थं तद्वाक्यं लिखितम् एवं गम्भीरेऽपि वाच्यम् । अतिरूक्षस्येत्यत्राक्षिनिमिषाक्षस्येति पाठान्तरे सदा स्फारितनेत्रस्येत्यर्थः । विसंज्ञः विह्वलस्ताम्यते मुह्यति शेते निपतित इति शयिते निपतित एवास्ते नोत्थातुं समर्थः । शीतार्दितोऽन्तरुष्ण इति शीतार्दितो बहिः, अन्तर्दाहवान् । हृष्टरोमा रोमाञ्चितः । हृदि सङ्घातशूलवानिति सङ्घातरूपेण वस्तुना अष्ठीलिकादिनाक्रान्तमिव हृदयं मन्यते यः । अन्ये त्वाहुः नानाप्रकारशूलवानिति वक्त्रेण चैवोच्छ्वसितीत्येव कारेण

हिक्काश्वासतृषायुक्तं मूढं विभ्रान्तलोचनम् ।
सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः॥३७॥

नासिकां व्यवच्छिनत्ति। व्यादितास्यः खरश्वासः इत्यर्थः॥३६॥

हिक्केत्यादि। हिक्कादिभिर्मिलितैरेकेनाप्यतिबलवता-साध्यत्वं, मूढं मोहयुक्तं विभ्रान्तलोचनं भ्रान्तप्रेक्षणं चलितनेत्रं वा सन्ततोच्छ्वासिनं निरन्तरं मुखश्वासिनम् ॥३७॥

हतप्रभेत्यादि। हतप्रभाणि हतशक्तीनि स्वविषयग्राहीणि चक्षुरादीनि यस्य स तथा। अथवा हता प्रभा दीप्तिरिन्द्रियाणि च यस्य स तथा। अरोचकनिपीडितमित्यत्र स्थाने जेज्जड़ः पाठद्वयं पठति दुरात्मानमुपद्रुतमिति व्याचष्टे दुरात्मानं दुष्टान्तःकरणमुपद्रुतमिति श्वासादिभिरुपद्रवैर्दुरात्मभिरुपद्रुतमिति, पाठान्तरे तु राक्षसादिभिर्जुष्टमित्यर्थः। एषामसाध्यलक्षणानामुपलक्षणत्वादन्यान्यपि तन्त्रान्तरेषु द्रष्टव्यानि तद्यथा।

प्रेतैः सह पिवेद्मद्यं स्वप्ने यः कृष्यते शुना।
सघोरज्वरमासाद्य स जीवमपकृष्यते॥
ज्वरः पौर्वाह्णिको यस्य शुष्ककासश्च दारुणः।
बलमांसविहीनस्य यथा प्रेतस्तथैव सः॥
ज्वरो यस्यापराह्णे तु श्लेष्मकासश्च दारुणः।
बलमांसविहीनस्य यथा प्रेतस्तथैव सः॥

हतप्रभेन्द्रियं क्षीणमरोचकनिपीडितम् ।

सहसा ज्वरसन्तापस्तृष्णा मूर्च्छा बलक्षयः ।
विश्लेषणञ्च सन्धीनां मुमूर्षोरुपजायते ॥
गोसर्गे वदनाद्यस्य स्वेदः प्रच्यवते भृशम् ।
लेपज्वरोपतप्तस्य दुर्लभं तस्य जीवितम् ॥

गोसर्गे प्रत्यूषे [५०]मृत्युश्च यस्मिन् बहुपिच्छिलत्वात् । शीतस्य जन्तोः परितः सरत्वात् । स्वेदो ललाटे हिमक-ज्वरस्य शीतार्दितस्येति सुपिच्छलश्च । कण्ठे स्थितो यस्य न याति वक्षो नूनं यमस्येति स हंस-मन्त्रः ।

स्रुत स्वेदो ललाटाद्यः श्लथसन्धानबन्धनः ।
मोहेन व्याध्यमानस्तु* स स्थूलोऽपि न जीवति ॥
यस्य स्वेदोऽतिबहुलः पिच्छिलो याति सर्वतः ।

(५०) मृत्युश्चेत्यादि । यस्मिन् ज्वरे शीतस्य हिमार्तस्य जन्तोर्जीवस्य ललाटे स्वेदः बहुपिच्छिलत्वात् बहुविजिलत्वात् तथा परितः सर-त्वात् सर्वतः प्रसरत्वात् हिमकणिकाभिरविन्दुवद्भवति च पुनः शीता-र्दितस्य शीतार्त्तस्य इति हेतोर्ललाटे सुपिच्छिलो भवति तस्मिन् ज्वरे मृत्युरेव भवति अत्र चकार एवार्थे । कण्ठे स्थितः स्वेदः यस्यौ नरः आधानजन्मनक्षत्रे स्तनचर्मे । वक्षाटार्थम् एकवाक्यार्थम् अनुयाति प्राप्नोति । संक्षोभयन् मन्त्रावयवमित्यर्थः । तरक्षमृगः । बहुरीमञ्जरी । शिखरः अग्रभागः । शिरोधिव्यपगमात् । शिरोध्यपायात्सहमन्त्रम् ॥

* मुह्योऽव्याध्यमानस्तु इति वा पाठः ।

इति सर्वत्रसंग्रहस्य रामतोषणसेनात्मज श्रीकालिदासवैद्यरत्न विरचितायां व्याख्यामधुकोषपञ्जिकायां ज्वरनिदानम् ॥

गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत् ॥

रोगिणः शीतगात्रस्य तदा मरणमादिशेदिति ॥

आधान जन्मनिधनप्रत्यर्थ्याख्ये विपत्करे ।

नक्षत्रे व्याधिरुत्पन्नः क्लेशाय मरणाय वा ॥

ज्वरस्तु जातः षष्ठ्याद्यष्टमीषु निवर्त्तते ।

इत्यादिना ग्रन्थेन नक्षत्रभेदेन ज्वरस्य साध्यत्वासाध्यत्वं बहुभिरुक्तम् तत् हारीत वृद्धवाग्भटयोर्द्रष्टव्यं इह तु विस्तरभयान्न लिखितम् । सन्निपातासाध्यप्रकरणे इत्यादि पित्तकफानिलवृद्ध्या दशदिवस द्वादशसप्ताहात् हन्ति विमुञ्चति वाथ्युग्रदोषो धातुमलपाकादिति सप्ताहाद्वाताधिकः दशाहात्पित्ताधिकः द्वादशाहात्कफाधिकः पित्ताधिकवद्वातपित्ताधिकः कफाधिकवत्तथात् कफवाताधिकः योगवाहित्वाद्वायोः । यदाह चरकः योगवाहः परं वायुः संयोगादुभयार्थकृत् । दाहकृत् तेजसा युक्तः शीतकृत् सोमसंश्रयात् इति । धातुपाकात् हन्ति मलपाकाद्विमुञ्चतीति व्यवस्थितविकल्पः धातुमलपाकविकल्पे च दैवमेव हेतुः । अन्तराभ्ररोगवृद्धिबलहानिभ्यां शुक्रादिधातुक्षय भ्रमादिना च धातुपाको ज्ञेयः । यदुक्तम् ।

निद्रानाशो हृदिस्तम्भो विष्टम्भो गौरवारुची ।

अरतिर्बलहानिश्च धातूनां पाकलक्षणम् ॥

अन्यथा च मलपाकः ।

दोषप्रकृतिवैचित्र्यं लघुता ज्वरदोषयोः ।

इन्द्रियाणाञ्च वैमल्यं दोषाणां पाकलक्षणम् ॥

दाहः स्वेदोऽभ्रमस्तृष्णाकम्पविड्भेदसंज्ञिता ।

---

* ननु तरतमादिभावव्यवस्थित धीमनभ्रमन्दशक्तित्वाद्दो-
षाणां कथं सप्ताहादिनियम इति चेन्न तथा स्वभावाद्-
व्याधेः विभिन्ना हि प्रतिरोगस्वभावाः यथाग्निरोहिणी
रोगे सप्ताहेन हन्ति न तथाऽन्ये रोगा इति । अतः सप्तमी
द्विगुणा-या तु नवम्येकादशी तथा । एषा त्रिदोष मर्य्यादा
मोक्षाय च वधाय च इति हारीतवचनसंवादार्थमेवं व्याख्या-
यते दशमी सप्तम्याः नवमी द्वादशीमत्यायगुण एकादशी
च स्मृतते ततो द्वेतिपदमाहृत्य सर्व्वत्र द्वैगुण्यं कार्य्यम् ।
एवं सप्तमे दिवसे मासे दशमे द्वादशेऽपि वा । पुनर्घोरतरो
भूत्वा प्रशमं याति हन्ति वा इत्यत्र सुश्रुतवाक्ये पुनः शब्देन
द्वैगुण्यं व्याख्यातवान् कार्त्तिककुण्डः । एवं दशद्वादश-
सप्ताहैः पित्तश्लेष्मानिलाधिकः । इत्योऽपया धातुमलान्
हन्त्याशु मुञ्चति वा ज्वरः इत्यधिकशब्दमावर्त्तरक्रियाविशेषणं
कृत्वा द्वैगुण्यं बोध्यम् । तथा वातपित्तकफैः सप्तदशद्वाद-
शवासरान् । प्रायोऽनुयाति मर्य्यादां मोक्षाय च वधाय
चेत्यत्राग्निवेशमते प्रायोपदव्येन द्वैगुण्यमिति । ननु
सप्तमीत्यादौ कथं तर्हि दशविंशतिद्वादश चतुर्विंशतीनां
ग्रहणमिति चेत् उच्यते एकादशीत्यत्र एकेति पदमा-
वर्त्तनीयं तेन नवमी एकेति दशमी लभ्यते एकादशी ए-
काचेति द्वादशी । ततः सर्व्वत्र द्वैगुण्यं तु शब्दः समुच्चये
तेन सप्तमी स्मृतते वा द्विगुणाच एवं नवम्यादिषु बोध्यं

कूजनञ्चास्य वैगन्ध्यमाकृतिर्ज्वरमोक्षणे ॥ २८ ॥
स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च ।

चतुर्विंशत्यधिकस्तु मर्य्यादादिवसो नास्ति तत्प्रतिपादकागमादर्शनात् । ज्वरविमुक्त पूर्व्वरूपमार्ग्ग दाह इत्यादि विड्भेदेति विड्भेदः सम्पदादिपाठात् क्विप् । अचिन्तासंज्ञानाद्यः कूजनं कुन्थनं यदुक्तं ज्वरप्रमोक्षे पुरुषः कूजन् वमति चेष्टत इति । वाभटोप्याह

धातून् संक्षोभयन् दोषो मोक्षकाले बलीयति ।
ततो नरः श्वसन् स्विद्यन् कूजन् वमति चेष्टत इति ॥

वैगन्ध्यं दुर्गन्धिता गात्रे ज्वरमोक्षणे भवति आकृति संक्षयं भवतीति शेषः । ननु दोषक्षयं विनाश व्याधिनिवृत्तिः क्षीणश्च दोषः कथमेवंविधं लक्षणं कुर्य्यात् उच्यते कश्चिद्भावः क्षीणोपि विनाशकाले स्वशक्तिं दर्शयति यथा निर्व्वाणावस्थो दीपो विशेषात् प्रज्वलयति । अथवा दोषाभिभूतानां धातूनां दोषापगमेन क्षोभाद्दाहादयः तरुणतर वानरपरिक्षीयमाण तरुशाखावल्लरीशिखर कम्पवदिति ॥ २८ ॥

ज्वरमुक्तिलक्षणमाह ।

स्वेद इत्यादि । स्वेदो घर्म्मागमनं स्रोतसां स्फुटत्वात् लघुत्वं गात्रस्य शिरसः कण्डूरिति सर्व्वो हि ज्वरः तैजसो विरोधि व्यपगमात् सौम्यः श्लेष्मा लब्धबलः सन् शिरसि स्वस्थानेऽवधारणात्तल्लक्षणं कण्डूं करोति व्याधिर्व्विक्षा

क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम् ॥३८॥

तु नान्यत्र कफस्थाने इति वदन्ति । पाकोमुखस्येति ज्वरोष्मकोपितात् पित्तात् यत्तु पूर्व्वं नाकार्षीदन्यत्र वा तदपि व्याधिमहिम्नैव एतच्च लक्षणं त्रिदोषजेऽन्त्यवेगे ज्वरे भवति न तु सर्व्वत्र यथाच एतदनन्तरं भालुकिः प्राह ॥

त्रिदोषजे ज्वरे ह्येतदन्त्यवेगे च धातुजे ।
लक्षणं मोक्षकाले स्यादन्यस्मिन् स्वेददर्शनमिति ॥

ननु ज्वरस्य प्रत्यक्षत्वात् तस्याभावोपि प्रत्यक्षः तत् किं तल्लक्षणपाठेन तथापि वा पठितव्यं तदा सर्व्वविकारेषु पठ्यताम् । उच्यते विषमज्वरशङ्कानिरासार्थं विषमज्वरे हि निवृत्तोपि ज्वरः पुनरायाति दोषाणां धातुलीनत्वात् एतल्लक्षणे तु निःशेषदोषनिवृत्त्या न पुनरागमः । यत्र चैवंविधा शङ्का तत्रैव लक्षणं पठति न सर्व्वत्र यथा प्रमेहातिसारादिष्वपि सर्व्वं सुस्थम् ॥३८॥

इति वैद्यमहामहोपाध्याय श्रीविजयरक्षितकृतौ
व्याख्यामधुकोषे ज्वरनिदानं समाप्तम् ॥

अथातीसारनिदानम्।

गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः।
विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः॥
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः।

पित्तज्वरेऽतीसारपाठात् तथा ज्वरातीसारयोरन्योन्योपद्रवत्वाच्च ज्वरानन्तरमतीसारमाह।

गुर्वतिस्निग्धेत्यादि। गुरुशब्देनात्र मात्रागुरु इष्यते तथा स्वभावगुरु च माषादि अथवा गुरुतः पाकतश्च अतिशब्दः स्थूलान्तैः सम्बध्यते स्थूलं संहतावयवं यथा शष्कुलपिष्टकादि शीतलं सर्वाहीर्य्यादि। विरुद्धमिति संयोगदेशकालमात्रादिभिर्विरुद्धम्। यथा क्षीरमत्स्यादि तच्च बहुप्रकारं सौश्रुते हिताहितीयेऽध्याये चरके चात्रेय भद्रकाप्यीयाध्याये द्रष्टव्यम्। अध्यशनं पूर्वाहाराजीर्णे भोजनम् उक्तं हि चरके भुक्तं पूर्वान्नशेषे तु पुनरध्यशनं मतमिति एवं सर्वमजीर्णमपक्वमन्नं विषम-कालभोजनादि उक्तं हि सुश्रुते बहुस्तोकमकाले च तज्ज्ञेयं विषमाशनम् इति एवं सर्वत्र विषमैरित्यत्र स्थाने असात्म्यैरिति च पाठान्तरं भोजनैरिति विरुद्धादिभिः सर्वैः सम्बध्यते स्नेहाद्यैरिति स्नेहः स्नेहपानं स्नेह आद्यो येषां

शोकाद्दुष्टाम्बुमद्यातिपानैः सात्म्यर्त्तुपर्य्ययैः॥
जलाभिरमणैर्वेगविघातैः क्रिमिदोषतः।
नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते॥१॥

ते स्नेहाद्याः स्वेदवमनविरेचनानुवासननिरूहाः तैरतियुक्तैरिति अतियोगयुक्तैरेतैश्च यथा योग्यं बोध्यं वमनातियोगस्यातीसारकरणायोगात् मिथ्यायुक्तैरिति हीनयोगयुक्तैर्वमनादि कर्म्मणां मिथ्यायोगाभावात्। हीनयोगात्तु ते दोषानुत्क्लेश्यातिसाराय स्युः। ननु कदाचित् वमनं प्रयुक्तं विरेकं करोति विरेकश्च वमनमिति दर्शनात्तेषां मिथ्यायोगः सम्भवत्येव न हीनयोग एवेति चिन्त्यम्। यदुक्तं चरके।

योगः सम्यक् प्रवृत्तिः स्यादतियोगोऽतिवर्त्तनम्।
अयोगः प्रातिलोम्येन यश्चाल्पं वा प्रवर्त्तनमिति॥

विषं चात्र स्थावरमुच्यते प्रयोगत्वात् कार्त्तिककुण्ड-स्याचविषं दूषीविषं तत्राप्यतीसारपाठात्। दुष्टाम्बुमद्यातिपानैरिति दुष्टं व्यापन्नं दुष्टयोरम्बुमद्ययोरतिपानात् अदुष्टयोर्वातिपानात् तथाच चरकः अदुष्टमद्यपानीयातिपानादिति। सात्म्यर्त्तुपर्य्ययैरिति सात्म्यविपर्य्ययैऋतुविपर्य्ययैश्च सात्म्यविपर्य्ययोऽसात्म्यं ननु पूर्व्वोक्ताऽसात्म्यैरित्यनेन पौनरुक्त्यं द्विविधं हि सात्म्यं प्रकृतिसात्म्यमभ्याससात्म्यञ्च आहाराचारभेदाद्देशपानभेदाद्वा न पौनरुक्त्यमि-

संशम्यापां धातुरग्निं प्रवृद्धः शकृन्मिश्रो वायुनाधः प्रणुन्नः। सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति॥२॥

त्वम्। अर्शोभिरर्शोभिरिति। जलक्रीडादिभिः वेगविघातैरिति मूत्रपुरीषादीनाम्। क्रिमिभिः पक्वाशयवृत्तित्वात् क्रिमिजनितवातादिकोपाद्वा। एतानि च निदानानि यथासम्भवं वातादीनां बोध्यानि। दोषव्याप्तिहेतुत्वख्यापनार्थं पठितानि एवमन्यत्रापि निदानाविशेषपाठे ज्ञातव्यम्॥१॥

सर्वातिसारसाधारणीं सम्प्राप्तिमाह।

संशम्येत्यादि। संशम्य शमयित्वा अन्तर्भूतोऽत्र णिजर्थ इति गदाधरः अग्निं मन्दीकृत्येत्यर्थः प्रवृद्धः प्रकुपितः अपां धातुरित्यनेनाप्समानकर्मेण रसलसीकामूत्रस्वेदमेदःकफपित्तरक्तादयो ग्राह्याः चरकेऽप्युक्तं शोणितादीन् धातून् दूषयन्तीति अधः प्रणुन्नः प्रेरितः सरति गच्छति अतीवेत्यनेन निरुक्तिमुक्तवान् गुदेन बहुद्रवसरणमतीसार इत्यर्थः। निरुक्तिरपि लक्षणं भवति एतेनाधोद्रवमूत्रावि(शे)षेऽपि पक्वाशयादीनां व्यवच्छेदः। वातातिसारेत्यत्रैवं कफमिश्रातिसारापेक्षया न तु पञ्चकापेक्षया इति॥२॥

एकैकशः सर्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः ॥ २ ॥

उक्तं षड्विधत्वं विभजते।

एकैकश इत्यादि। ननु चरकादौ दोषैरेकैकशः सन्निपातश्चेति चत्वारः भयशोकजौ द्वौ एवं षड्विधः अतीसार इति कोऽभिप्रायः उच्यते चरके भयशोकजौ आगन्तुसंज्ञाकार्य-भेदाद्भिन्नावुक्तौ आमं त्वत्र अजीर्णकोऽपि तद्विशेषण-न संव्यतिरेकः। सुश्रुते हेतु प्रत्यनीक चिकित्सार्थं शोक-आमजौ पठितौ वातज सन्निपातज त्वेन सन्निपाते अवयवभेदेऽपि यथा वातादिजत्वाभेदेऽपि सन्निपातजः पाण्डुरोग इति। इति एवं भयशोकजावपि चरके हेतुप्रत्यनीकचिकित्सार्थं पृथक् पठितौ सुश्रुते भयजः केवल वातिकोऽयन्तु मानसत्वात् विधावाद्या शोकजे अव-रुद्ध इति केचित्। ननु षष्ठ आमेन चोक्त इति पृथक् करणमनकृतं यतः सर्वेषामेवातिसाराणां सामग्या आम-शब्दवाच्याजीर्णत्वापक्वशब्दवाच्या अतएव सर्वातिसार-गोचर मुदाहरन्ति आमपक्वकल्पं चिन्तातिसारे क्रिया-यतः अतः सर्वातिसारेषु श्रेयं पक्वामलक्षणानीति नैवं आमेनैवारभ्यत इति आमजाः दोषास्तु संसर्गिणः भेदवि-तारश्चत्वारश्चाः। आमश्च दुष्टान्नकार्य्यः दोषधातु मलव्यतिरिक्तो वातादिसंसृष्टो वातादिप्रेरितो वात-

हृन्नाभिपायूदरकुक्षितोद गात्रावसादाऽनिल सन्निरोधाः। विट्सङ्ग आध्मान मथाविपाको भविष्यत स्तस्य पुरःसराणि ॥४॥

रक्तादिवद्व्याध्यारम्भके इति ते तमनादयः। उत्क्लिश्य प्रकोप्य इति द्वन्द्वजास्त्वतीसाराः प्रकृतिसम समवायारब्धत्वात् पृथक् न गणिताः विकृतिविषमसमवायारब्धास्तु न भवन्त्येव व्याधिस्वभावात् शैलीचेयमाचार्य्याणां प्रायः प्रकृतिसम समवायारब्धं द्वन्द्वं सन्निपातञ्च न गणयन्ति विकृतिविषमसमवायारब्धन्त्ववश्यं लिखन्ति यथा चरके पञ्चगुल्मा इत्यभिधाय संसृष्टरूपानपरांस्तु गुल्मांस्त्रीणादिशेद्दौषधकल्पनार्थमित्युक्तं तथा सुश्रुते पञ्चार्शांसि इत्यभिधाय अर्शः सु हश्यते रूपं यदा वैदोषयो र्द्वयोः। संसर्गं तं विजानीयात् संसर्गः षड्विध स इत्युक्तं ॥२॥

सर्व्वातिसारपूर्व्वरूपमाह।

हृन्नाभीत्यादि। तोदः सर्व्वैर्ह्रदादिभिः सम्बध्यते अत्र कुक्षिशब्द उदरैकदेशवाचीतेन न पौनरुक्त्यम्। अनिल सन्निरोधा इति वायोरप्रवृत्तिः विट्सङ्गः पुरीषाप्रवृत्तिः एतञ्च दोषदूष्य संमूर्च्छनावस्था प्रतिनियतं पूर्व्वरूपं तेन रूपावस्थायां नानुवर्त्तते यद्यनुवर्त्तते तदा तत

अरुणं फेनिलं रुच मल्पमल्पं मुहुर्मुहुः ।
शकृदामं सरुक्शव्दं मारुते नाति सार्य्यते ॥५॥
पित्तात् पीतं हरितं लोहितं वा तृष्णामूर्च्छा
दाह पाकोपपन्नं ॥६॥
शुक्लं सान्द्रं स कफं श्लेष्मनात्तविस्रं शीतं हृष्ट-
रोमा मनुष्यः ॥७॥
वराहस्नेहमांसाम्बुसदृशं सर्व्वरूपिणं । कृच्छ्रसा-
ध्यमतीसारं विद्याद्दोषत्रयोद्भवम् ॥८॥

व्याधिरेव नोत्पद्यते विट्सङ्गातिप्रतिषेधात् पुरःसराणि पूर्व्वरूपाणीति ॥४॥

अरुणमिति । वायोररूपस्यापि दोषदूष्यसंमूर्च्छनात् भवति एवमन्यत्रापि फेणिलं सफेणं फेणादि नच । शकृत् पुरीषं सरुकशव्दमिति सशूलं सशव्दञ्चेति ॥५॥

पैत्तिकमाह । पित्तादित्यादि । दाहपाकोपपन्नमिति दाहः सर्व्वाङ्गे गुदे च पाको गुद एव तन्त्रान्तरं हि तृष्णादाहस्वेदमूर्च्छाविभ्रमसन्तापपाकपरीत इति सभ्रोगुदः। अत्राप्यतिसार्य्यते शकृदित्यनुवर्त्तते एवं श्लैष्मिकोपि ॥६॥

श्लैष्मिकमाह । शुक्लमित्यादिना श्लैष्मिकः विस्रमामगन्धि ॥७।

सान्निपातमाह। वराहस्नेहेत्यादिना सन्निपातजः वराहस्नेहः शूकरस्य मेदोमज्जा वा मांसाम्बु मांसप्रक्षालनोदकं

तैस्तैर्भावैः शोचतोऽल्पाशनस्य बाष्पोष्मा वै वह्निमाविश्य जन्तोः। कोष्ठं गत्वा क्षोभयेत्तस्य रक्तं तच्चाधस्तात् काकणन्तीप्रकाशं॥ निर्गच्छेद्वै विड्विमिश्रं ह्यविड्वा निर्गन्धं वा गन्धवद्वातिसारः। शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥८॥

तैः षड्विधं सर्वरूपिणमिति उक्तं वाताद्यतीसारत्रयवच्च-लक्षणं। एवंविधमतीसारं दोषत्रयोद्भवं विद्यात् तच्च कृच्छ्रसाध्यं त्रिदोषजत्वादेव ॥७॥

शोकजमाह। तैस्तैर्भावैरिति धनबन्धुनाशादिभिः शोचतः शोकं कुर्वतः अल्पाशनस्य[1] शोकादेवाल्पं भुञ्जानस्य एतेन धातुक्षयोऽस्य स्यादित्युक्तं बाष्पो नेत्रनासागलादिगतजलं तत्सहित उष्मा शोकजं देहतेजः बाष्पोष्मा-स कोष्ठं गत्वा वह्निमाविश्य व्याकुलीकृत्य क्षोभयेत्तस्य रक्तं उष्मत्वद्रवत्वाभ्यां समानगुणत्वात् तच्च रक्तं काकणन्ति प्रकाशं गुञ्जाफलसदृशं अधस्तान्निर्गच्छेत् पक्तिमाविश्येति पाठान्तरे स एवार्थः। गदाधरस्तु वह्निशब्देन पित्तमाह तच्च रक्तं विड्विमिश्रं निर्गच्छेत् सविट् अल्पविट् अल्पा-

---

(१) न चेति। कि यस्य दृष्टिविधं सात्म्यम् अतो न पौनरुक्त्यम्। न चेति योजना ख्यापनं ज्ञापनार्थं। अवबद्धः अन्तर्हितः। गोचरो विषयः। शैलोति शीघ्रं रीतिर्वा। मूले मारुतेनातिसार्यते इति। मारुतेन मारुताद्धेतोः प्रकर्षेणातिसार्यते पुरुषेणेतिशेषः एवं परत्रापि।

अन्नाजीर्णात् प्रद्रुताः क्षोभयन्तः कोष्ठं दोषा धातुसङ्घान्मलांश्च। नानावर्णं नैकशः सारयन्ति शूलोपेतं षष्ठमेनं वदन्ति ॥१०॥

घनत्वात् निर्गन्धं गन्धवद्वेति विकल्पः अविट सविटञ्चा-मिति कार्त्तिकः अन्ये तु पित्तस्य पूतित्वात् सवगन्धवत् तस्य नातिदूष्याभिगन्धत्वमिति गन्धश्च विस्रमित्याहुः क्षोभयेत्तस्य रक्तमित्यत्र स्थाने शोषयेत्तस्य भुक्तमिति पाठान्तरमयुक्तं काकनन्ती प्रकाशस्य हेत्वन्तराभावात् तस्मादाद्यपाठोऽस्मायान् व्याख्यातश्च जेज्जटादिभिः सर्वैरेव अयं वातपित्तजः उक्तः। दुश्चिकित्स्योतिमात्रमिति शोका-पनोदं विना केवलेन भेषजेनानुपशमात् अतएवाह कष्ट एष इति वैद्यैर्व्याख्यादिभि र्गदाधरस्त्वाह एष इत्यनेन नैव संप्राप्तिक एव कष्टो नत्वन्य शोकज इति ॥९॥

आमातिसारमाह।

अन्नाजीर्णादिति। अन्नस्य तदजीर्णञ्चेति अन्नाजीर्णं अतएवाह चक्रपाणिः[2] यथा भुक्तमशनमुपविशति इति

---

(२) दारुपाकोपमभिति मूलं। उपपन्नं युक्तं आमानाभिकरस्य सम्बन्धेन तद्विशिष्टमिति यावत्।

यथाभुक्तमशनमिति। यथा भुक्तं भुक्तवदेव अशनं भक्षितं द्रव्यम् उपविशति त्यजति। मूत्रे शकृज्ञाम्बरसङ्काशमित्यादि। पङ्कजाम्बरसङ्काशादि बहुल विशेषणाक्रान्त पुरीषं यस्य भवति तस्यातियुक्तं समविकारेण वर्ज्जयेदिति योजना। शिरस्याद्दीति। तद्यथा॥ शिरसि शिशिरं पिष्टं क्षीरं गुडघृतान्वितं। कष्यामरिचसंयुक्तं वेसवारमिति स्मृतः।

संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्ववसीदति ।
पुरीषं भृशदुर्गन्धि पिच्छिलञ्चामसंज्ञितं ॥
एतान्येव तु लिङ्गानि विपरीतानि यस्य वै ।
लाघवञ्च विशेषेण तस्य पक्वं विनिर्द्दिशेत् ॥११॥

प्रद्रुताविमार्गगाः क्षोभयन्तोदूषयन्तः धातुसङ्घान् रक्तादीन् मलान् पुरीषादीन् नैकशो बहुशः ॥१०॥

सर्वातिसाराणां चिकित्सोपयोगित्वेनामलक्षणं पक्वलक्षणञ्चाह ।

संसृष्टमित्यादि । संसृष्टं सम्बन्धं एभिर्दोषैः दुष्टैर्भिः उक्तवाताद्यतीसारलिङ्गैः दुष्टत्वात् यथा सम्भवं व्यस्तसमस्ता बोध्याः । तेन सर्वातिसाराणां न सान्निपातिकत्वप्रसङ्गः । न्यस्तमप्सु जले क्षिप्तं अवसीदति निमज्जति आमस्य गौरवात् । भृशशब्दः पिच्छिलेनापि सम्बध्यते दुर्गन्धित्वं पिच्छिलत्व आमसम्बन्धात् । एतानीति जलनिमज्जनादीनि लाघवं कोष्ठस्य शरीरस्य च चकारेण कफदुष्ट्यादिकं विना लक्षणमिति समुच्चीयते यदुक्तं ।

मज्जत्यामा गुरुत्वाद्विट्पक्वा तूत्प्लवते जले ।
विनातिद्रवसङ्घातशैत्यश्लेष्मप्रदूषणादिति ॥

अथवामलिङ्ग वैपरीत नैव लाघवे सिद्धे पुनर्लाघवकरणं तत्कफदुष्ट्यादिव्यतिरेकं बोधयति ॥११॥

पक्वजाम्बवसङ्काशं यकृत्पिण्डनिभं तनु। घृततै-लवसामज्जवेसवारपयोदधि॥ मांसधावनतो-याभं कृष्णंनीलारुणप्रभं। मेचकं स्निग्धकर्वुरं चन्द्रकोपगतं घनं कुणपं मस्तुलुङ्गाभं सुगन्धि-कुथितं बहु। तृष्णादाहतमः श्वासहिक्कापार्श्वा-स्थिशूलिनं॥ संमूर्च्छारतिसंमोहयुक्तं पक्ववली-गुदं। प्रलापयुक्तञ्च भिषग्वर्ज्जयेदतिसारिणं॥ असंवृतगुदं क्षीणं दुराध्मातमुपद्रुतम्। गुदे पक्वे

असाध्यलक्षणान्याह।

पक्वेत्यादि। पक्वजाम्बवसङ्काशं पक्वजाम्बुफलसदृशवर्णं स्निग्धकृष्णमित्यर्थः। यकृत्पिण्डनिभं कृष्णलोहितं तनु स्वच्छं घृतादीनां मांसधावनतोयान्तानामिवाभा प्रतिभा यो यस्य स तथा वेसवारो निरस्थिपिशितं पिष्टमित्यादि परिभाषितमांसप्रकारः। कृष्णमञ्जनप्रख्यं एतच्च कृष्णत्वादिकं पित्तातीसारवर्ज्जं बोध्यं तत्र रूपत्वेन पठितत्वात् नीलारुणं चासपक्षिपक्षप्रमितं मेचकं मर्द्दनाञ्जनपीण्डवदीषत् कृष्णवर्णं कर्वुरं नानावर्णं तत् स्निग्धं चरत्वात्। तत्स्नेह-योगात् चन्द्रकोपगतं मयूरपिच्छचन्द्रकैरिव धातुभिरुप-गतम् उक्तं हि करणो वाचार्य्येण चन्द्रकैः शिखिपिच्छाभैर्नी-लपीतादिरागिभिः। आहृतं वेसवाराद्युक्तमचीरोपमं

गतोष्माणमतिसारकिणं त्यजेत् ॥ श्वासशूल
पिपासार्त्तं क्षीणं ज्वरनिपीड़ितं विशेषेण नरं
वृद्धमतीसारो विनाशयेत् ॥१२॥
पित्तकृन्ति यदात्यर्थं द्रव्याण्यश्नातिपैत्तिके ।
तदोपजायतेऽभीक्ष्णं रक्तातिसार उल्बणः ॥१३॥

स्त्रवेदिति तदेव घनं धात्ववयवव्यामिश्रत्वात् कुणपं शवदुर्गन्धि मस्तुलुङ्गाभं मस्तुलुङ्गं मस्तकाभ्यन्तरस्नेहः घृतकेतिख्यात तत्सदृशं कुथितम् पूतिं । तृष्णेत्यादि । तृष्णादीनां पार्श्वास्थिशूलान्तानां द्वन्द्वं कृत्वा मत्वर्थीयः तृष्णादियुक्तमित्यर्थः । अत्र संमूर्छा मनोमोहः सम्मोह इन्द्रियमोह इत्यपौनरुक्त्यं चकारात् चरकोक्तः सबलोपरतातीसारश्वासाक्षोशोथः पक्वबलीगुदं पक्वावल्योर्गुदे यस्य तं पक्वबलीगुदम् असंवृतगुदं गुदसंवरणाक्षमं तमेव क्षीणं बलोपचयरहितं दूरामतिआध्मानयुक्तं तस्य विवेकसाध्यत्वेनातीसारविरुद्धोपक्रमत्वं दुराधानमिति पाठान्तरे दुष्टान्तःकरणमजितेन्द्रियमिति जेज्जटः उपद्रुतम् अतीसारोपद्रवैः शोथादिभिः युक्तं यदुक्तम् ।

शोथं शूलं ज्वरं तृष्णां श्वासं कासमरोचकं ।
छर्दिं मूर्छां च हिक्कां च दृष्ट्वातीसारिणं त्यजेत् ॥

गुदे पक्वे गतोष्माणमिति गुदपाकारम्भक पित्ते वर्तमानेऽपि गतोष्माणं शीतगात्रं नष्टाग्निं वा अतीसारकिणं

वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य । प्रवाहतोऽल्पं बहुशो मलाक्तं प्रवा-

---

अतीसारयुक्तं वातातीसाराभ्यां कुर्यात् विशेषेणेति वचनाद्बालस्याप्यसाध्यत्वं बोधयति सुश्रुतः यदाह स एव चिकित्सायां कृच्छ्रश्चायं बालवृद्धयोस्त्वसाध्य इति एतच्चावस्थाने सति बोद्धव्यम् ॥१२॥

ननु रक्तजोऽप्यतीसारोऽस्ति तस्य सप्तमत्वापत्तेरुक्त षट्कं
विरुध्यत इत्याशङ्क्य पैत्तिकस्यैवायमवस्था-
विशेष इत्याह ।

पित्तेत्यादि । पैत्तिकेऽतीसारे विद्यमाने भविष्यति वा पित्तकृन्ति पित्तकारकाणि द्रव्याणि अत्यर्थं प्रभूतम् अभीक्ष्णं निरन्तरमश्नाति तदा रक्तातीसारं उल्बणं महान्तमुपजायते इति सम्बन्धः अत्र चारुणाक्षणपाण्डुत्वादिना वातादयो दूषका बोद्धव्याः यदुक्तं दोषलिङ्गेन मतिमान् संसर्गं तत्र लक्षयेदिति एवं स्नेहाजीर्णविसूचिकाविषाकृमिप्रभृतिजन्येष्वतीसारेषु षट्कातिरिक्तत्वं प्रतिषिद्धं बोध्यं अव्यभिचरितदोषनिमित्तत्वादिति जेज्जटः ॥१३॥

अतिद्रवसरणादामपक्वलक्षणयोगात् प्रवाहिका-
तीसारयोः साधर्म्यं ततोऽतीसाराधिकारे
प्रवाहिकासंप्राप्तिमाह ।

वायुरित्यादि । अतीसारे नानाविधद्रवधातु सरणं प्रवाहिकायान्तु कफमात्रसरणमिति भेदः । निचितं

हिकां तां प्रवदन्ति तज्ज्ञाः ॥१४॥
प्रवाहिका वातकृता सशूला पित्तात् सदाहा सकफा कफाच्च । सशोणिता शोणितसम्भवाच्च ताः स्नेहरूक्षप्रभवा मतास्तु । तासामतीसारवदादिशेच्च लिङ्गं क्रमञ्चामविपक्वताञ्च ॥१५॥

बलाशमहिताशनस्य सञ्चितं कफं मलाक्तं पुरीषसहितं अधस्तान्नुदति गुदेन पातयति प्रवाहतः प्रवाहकृच्छ्रनं कुर्वतः। भोजादौ त्वियं विस्रंसीतिनाम्ना पठ्यते पराशरेत्वन्त-र्ग्रन्थिरिति हारीतस्तु निःसारकाख्यामेतां पठति यदाह प्रवाहिकेति सा ज्ञेया कैश्चिन्निःसारकस्तु स इति ॥१५॥

अस्या वातादिभेदेन रूपमाह ।

प्रवाहिकेत्यादि । ननु वायुः प्रदुष्टो निचितं बलाश-मित्युक्तं तत् कथं वातकृतेति उच्यते आधिक्येन व्यपदेशात् ननु तथापि पित्तरक्तसम्भवा कुतः। उच्यते अहिताशनस्ये-त्युक्तं आहारो हि विरुद्धस्तस्यामवस्थायां पित्तं रक्तञ्च कोपयति ते च पश्चाद्वातस्यानुबले स्वलिङ्गं यदा दर्शयत-स्तदा ताभ्यां व्यपदेशः। स्नेहरूक्षप्रभवा इति स्नेहप्रभवा कफजा रूक्षप्रभवा वातजा तु शब्दाच्च तीक्ष्णोष्णप्रभवा पित्तजा रक्तजा च लिङ्गं शूलादिभेदेन क्रमं यथाक्रममामपक्व-भेदेन चिकित्साक्रममिति ॥१५॥

यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।
दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः ॥१६॥

इत्यतीसारनिदानम् ।

अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ।

वातविष्टम्भादुदावर्त्तोद्वा मलाप्रवृत्तावतीसारनिवृत्तिरिति शङ्कानिरासार्थमतीसारनिवृत्तिलक्षणमाह ।

यस्येत्यादि । उच्चारं विना यस्य मूत्रं प्रवर्त्तते सम्यगिति सम्यक् प्रवृत्त्या न क्षीणयोगेनेत्यर्थः वायुश्च गच्छति गुदेनेतिशेषः स्थितो निवृत्तगतिः[४] उदरामयोऽतीसारः प्रकरणात् एतेन संप्राप्तिभङ्ग उक्तः अतीसारे हि संप्राप्तिरियं यन्मूत्रोऽपितोऽपि द्रवधातुर्गुदेनैव प्रवर्त्तते सर्वस्यैवाव्याप्तो गुदप्रवृत्तत्वात् यदा तु मूत्रं मूत्रमार्गेण प्रवर्त्तते तदपि पुरीषप्रवृत्तिसमकालमिति ॥१६॥

अतीसारनिदानं समाप्तम् ।

अथ ग्रहणीनिदानम् ।

द्रवसारणसाधर्म्यात् परस्परानुबन्धित्वाच्चातीसारानन्तरं ग्रहणी तस्याः संप्राप्तिमाह ।

अतीसार इत्यादि । अपिशब्दादजातातीसारस्यापि

---

(४) मूले हस्तपादेत्यादि । अतिसारिण अतिसारयुक्तस्य हस्तपादाकुञ्चितप्रपाकादयो मरणाय अर्गाङ्कवन्तीत्यर्थः । अन्यत् सुगमम् ।

इति व्याख्यामधुकोषपरिशिष्टाका अतिसार निदानम् ॥

भूयः संदूषितो वह्निर्ग्रहणीमभिदूषयेत् ॥१॥
एकैकशः सर्व्वशश्च दोषैरत्यर्थमूर्च्छितैः ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥

स्वहेतोर्ग्रहणीरोगः स्यादिति बोधयति अन्येत्वपिशब्दादनिवृत्तेऽप्यतीसार इति व्याचक्षते मन्दाग्नेरित्यनेन दीप्ताग्ने रक्षिताशनमपि न विकारकारीति बोधयति उक्तं हि दीप्ताग्नेर्विरुद्धं वितथं[1] भवेदिति भूय इति पुनरत्यर्थं वा संदूषितः पूर्व्वमतीसारेऽपि दूषितत्वात् अभिदूषयेत् समन्ताद्दूषयेत् एतेन निवृत्तातीसारेणाहिताहारपरिहारः करणीयः आवह्निबललाभादित्युक्तं भवति अतएवाह सुश्रुतः ।

तस्मात् कार्य्यः [2]परीहारोऽप्यतीसारे विरिक्तवत् ।
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथेति ॥१॥

तस्याः संप्राप्तिपूर्व्वकं सामान्यलक्षणमाह ।

एकैकश इत्यादि । मूर्च्छितैरतिवृद्धैः मूर्च्छामोहसमुच्छ्रा-

---

(१) वितथमिति । वितथं मिथ्याव्यर्थमिति यावत् ।

(२) तस्मात् कार्य्य इत्यादि । अतीसारे अतीसाररोगे यावत्तद्रोगी दोषतः वायुपित्तकफैः प्राणतः बलेन च प्रकृतिस्थः स्वभावस्थो न भवेत्तावत्तेन रोगिणा सुष्ठु विरिक्तवत् कृतविरेचनेनेव परीहारः अहिताहारस्य त्यागः कार्य्यः करणीयः । एतेन अतीसारे रोगनिवृत्तिमात्रमेव यथेष्टाहारो न कर्त्तव्य इति सूचितम् ।

पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम्।
ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः ॥२॥

यथोरिति धात्वर्थात् उच्छ्रितेरिति पाठान्तरे स एवार्थः सा ग्रहणी दोषैर्दुष्टा सती भुक्तमाहारमाममपक्वमेव पक्वं वा विमुञ्चति वा शब्दस्यार्थे एवकारः समुच्चीयमानावधारणे[१] यथा नरश्च नारायणश्चैव चोभौ स्वतः सुतौ द्यौजनयाम्बभूवतुः। अथवा एवकार एव विकल्पार्थः। निपातानामनेकार्थत्वादिति। सरुजं सशूलं पूति दुर्गन्धि वातेन मुहुर्बद्धं पित्तेन मुहुर्द्रवं ग्रहणीरोगमिति ग्रहण्या रोगः ग्रहणीरोगः। ग्रहणी चाग्न्यधिष्ठानं धमनी यदाह चरकः।

अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता।
नाभेरुपरि सा ह्यग्निबलोपस्तम्भबृंहिता।
अपक्वं धारयत्यन्नं पक्वं सृजति पार्श्वतः इति॥

सुश्रुतेऽप्येतदुक्तं।

षष्ठी पित्तधरा नाम या कलापरिकीर्तिता।
पक्वामाशयमध्यस्था ग्रहणी सा प्रकल्पिता इति॥

कलाधात्वन्तरमर्य्यादा पक्वामाशयमध्यस्था पच्यमानाशय इत्यर्थः। तृष्णा पिपासा विदाहोऽन्नस्याग्निमान्द्ये-

---

(१) समुच्चीयमानेति। समुच्चीयमाने आमपक्वे तयोरवधारणमित्यर्थः। अन्नाधिष्ठानम् अन्नाश्रयभूता। सा ग्रहणी। अग्निबलोपस्तम्भबृंहिता अग्निबलसम्बन्धेन वर्द्धिता। मूले कुहते यदाश्रितत्वं यस्येति शेषः एवं इत्यनुमानमपि च।

पूर्ब्बरूपन्तु तस्येदं तृष्णालस्यं बलक्षयः ।
विदाहोऽन्नस्य पाकश्च चिरात् कायस्य गौरवं॥३॥
कटुतिक्तकषायातिरूक्ष संदुष्टभोजनैः ।
प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः॥
मारुतः कुपितो वह्निं संछाद्य कुरुते गदान्॥४॥
तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ।
कण्ठास्यशोषक्षुत्तृष्णा तिमिरं कर्णयोः स्वनः ।
पार्श्वोरुवंक्षणग्रीवारुगभीक्ष्णं विसूचिका॥
हृत्पीड़ाकार्श्यं दौर्ब्बल्यं वैरस्यं परिकर्त्तिका ।
गृद्धि सर्व्वरसानाञ्च मनसः सदनन्तथा॥

आहारस्य विदग्धत्वम् अतएव चिरात् पाकश्चान्नस्यैव कायस्य गौरवं आमत्वादिति ।२।

वातिकग्रहण्यानिदानपूर्ब्बकं रूपमाह ।

कटुतिक्तेत्यादि । संदुष्टभोजनं संयोगादिविरुद्धं संदुष्टभोजनैरित्यत्र शीतादिभोजनैरिति पाठान्तरं प्रमितमल्पभोजनं प्रकृतेति पाठान्तरे अतीतकालभोजनं बोध्यम् अनशनमुपवासः एतैः कारणैः कुपितोमारुतः वह्निं संछाद्य संदुष्यगदान् करोति॥४॥

कान्गदान् करोति इत्याह ।

तस्यान्नं पच्यते दुःखमित्यादि । शुक्तपाकं अम्लपाकं

जीर्णे जीर्यति चाध्मानं भुङ्क्ते स्वास्थ्यं समुपैति च।
स वातगुल्महृद्रोगप्लीहाशङ्की च मानवः।
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत्।
पुनःपुनः सृजेद्वर्च्चः कासश्वासार्द्दितोऽनिलात्॥५॥
कट्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्बणम्।
आप्लावयद्धन्त्यनलं जलन्तप्तमिवानलम्॥६॥

एतस्याग्निमान्द्यजनिताम्लविदाहाद्भवति खराङ्गताकर्कशाङ्गतावातेन त्वग्गतस्नेहशोषात् तिमिरं मन्ददृष्टिता कर्णपीड़ा सा च पार्श्वादिभिः सम्बध्यते विसूचिका ऊर्द्धमधश्चामन्नप्रवृत्तिः वैरस्यं विरसास्यता परिकर्त्तिका गुदे कर्त्तनवत् पीड़ाहृद्धिःकाङ्क्षा सर्व्वरसानां मधुरादीनां कर्षणि षष्ठी एतश्च वातदूषितान्तःकरणत्वेन व्याधिमहिम्ना वा सदनमवसादः आध्मानं जीर्णे जीर्यति च भुङ्क्ते इति शेषः स वातगुल्महृद्रोगप्लीहाशङ्कीति वातगुल्मादिपीड़ायुक्तत्वात् तत शङ्की।, द्रवं शुष्कं कदाचित् द्रवं कदाचित् शुष्कं तनु अल्पमिति॥५॥

विदाहि विदाहजनकं वंशकरीरादि क्षारोऽपामार्गादिक्षतश्च क्षारोदकसाधितं व्यञ्जनमम्लन्ति कामरूपादौ तथा क्षारो यवक्षारादिः तथा सक्षारञ्च द्रव्यं आद्यग्रहणाद्धवातीक्ष्णोष्णानां ग्रहणं दुष्टं पित्तमनलं प्लावयत् अभिभवत् तं हन्ति। ननु पित्तमाग्नेयमग्निरेव

सोऽजीर्णं[4] नीलपीताभं पीताभः सार्य्यते द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्दितः ॥७॥
गुर्व्वतिस्निग्धशीतादिभोजनादतिभोजनात् ।
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपितः कफः ॥८॥
तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचकाः ।
आस्योपदेहमाधुर्य्यकासष्ठीवनपीनसाः ॥

वा ततश्च वृद्धिमेवाप्नोति कथं हन्त्यत आह जलं तप्तमि-वानलमिति यथा उष्णगुणयुक्तमपि जलमनलं हन्ति तथा द्रवात्मकं पित्तं उष्णरूपमग्निं हन्त्येवेति । स पीताभः पुरुषः सार्य्यते वर्च्च इत्यनुवर्त्तते ॥६॥७॥

गुर्व्वित्यादि[5] । आदिशब्दात् पिच्छिलमधुरादीनाञ्च ग्रहणम् अतिभोजनादतिमात्रभोजनात् ननु भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निमिति विरुद्धं स्वप्नेन दिवास्वापो ग्राह्यः ।

---

(४) सोऽजीर्णमित्यादि मूलम् । यस्य च अजीर्णं द्रवं नीलपीताभं वर्च्चः पित्तेन सार्य्यते स पीताभः पुरुषः पूत्यम्लोद्गारादिभिरर्दितश्च भवतीति योजना ।

(५) गुर्व्वतीत्यादि मूलं । गुर्व्वतिस्निग्धशीतादितः कफः कुपितः सन् अग्निं हन्ति अर्थात् यस्य तस्यान्नं दुःखं यथा स्यात्तथा पच्यते अग्निर्नितरामेव । कासं यथेष्टं । अन्यत् सुगमम् । दिवास्वापश्चेति । निद्रावस्थायां स्रोतसां नाडीनां स्वस्थीभूतत्वात्तत् संमीलनेन संघर्ष-णेति यावत् ।

हृदयं मन्यते स्थानमुदरं स्तिमितं गुरु ।
दुष्टो मधुर उद्गारः सदनं स्त्रीष्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्ट गुरुवर्च्चः प्रवर्त्तनं ।
अकृशस्यापि दौर्ब्बल्य मालस्यञ्च कफात्मके ॥९॥
पृथग्वातादि निर्द्दिष्ट हेतु लिङ्गसमागमे ।
त्रिदोषं निर्द्दिशे देवं तेषां वक्ष्यामि भेषजम् ॥१०
अन्त्रकूजनमालस्यं दौर्ब्बल्यं सदनस्तथा ।

रात्रिस्वापस्य स्वास्थ्यहेतुत्वात् दिवास्वापश्च श्लेष्मा प्रशमनेन जठरानलं सन्धुक्षयति अतएवाह अतीसारिणाम-जीर्णिनाञ्च दिवास्वापोविहितः इति उक्ते भुक्तवतां दिवास्वापोऽत्यन्तकफदस्त्वाग्निं हन्ति अभुक्तवतस्तु सन्धुक्ष-यति यदुक्तं नराग्निरग्नानकामं दिवास्वापयेदिति आस्यो-पदेहमाधुर्य्येति मुखस्य लिप्तत्वं मधुरत्वञ्च श्लेष्मस्थान-कृतद्रवा पूरितमिव स्तैमित्यं विबन्धं निश्चलं दुष्टोविरतः स्त्रीष्वहर्षणं स्त्रीरिरंसाया अभावः भिन्नञ्च तत् आमश्ले-ष्मभ्यां संसृष्टञ्चेति समासार्थः दौर्ब्बल्यमसामर्थ्यमिति ॥८॥९॥

शिष्यहितेषि तया प्रकृतिसम समवेतत्वेन सुगमात्वा अपि त्रिदोषज ग्रहण्या अतिदेशेन लक्षणमाह ।

पृथगित्यादि । संपूर्णश्लोकानुरोधात् तेषां वक्ष्यामि भैषजमिति लिखितं ग्रहणीदूष्याग्रहण्याश्रितवक्त्रैरपि

द्रवं घनं शीतं स्निग्धं स कटीवेदनं शकृतम्॥
दिवा प्रकोपो भवति रात्रौ शान्तिं व्रजेच्च सा।
आमं बहुपैच्छिल्यं स शब्दं मन्दवेदनम्।
पक्षान्मासाद्दशाहाद्वा नित्यं वाप्यथ मुञ्चति॥
दुर्विज्ञेयादुश्चिकित्स्या चिरकालानुबर्द्धिनी॥
साभवेदामवातेन संग्रह ग्रहणीमता॥११॥

इति ग्रहणीनिदानम्।

अथार्शोनिदानम्।

पृथग्दोषैः समस्तैश्च शोणितत् सहजानि च।

दुष्टेरग्निमान्द्यादयोपि ग्रहणीरोगा उच्यन्ते यदुक्तं चरके।
यथाग्निः पूर्व्वमुद्दिष्टो रोगानीके चतुर्व्विधः।
तं चापि ग्रहणीरोगं समवर्ज्जं प्रचक्षत इति॥१०॥११॥
इति ग्रहणीरोगनिदानम्।

अथार्शोनिदानम्।

अतीसारग्रहण्यर्शसां परस्परसम्बन्धात् अतीसारग्रह-ण्यनन्तरम् अर्श उच्यते अरिवत् प्रणोति हिनस्तीत्यर्श

इति व्याख्या मधुकोषपञ्जिकायां ग्रहणीनिदानम्।

अर्शांसि षट् प्रकाराणि विद्याद्गुदवलि त्रये॥२॥

इति पृषोदरादि पाठान्निरुक्तिमाहुः सहजानीति सहशरीरेण जातानि गुदवल्यारम्भकबीजभागस्य दोष दूषितत्वात् अत इन्द्रजानि प्रकृतिसम समवायारब्धत्वान्न गणितानि उक्तं हि सुश्रुते ।

अर्शः सृजश्च ते रूपं यदा वै दोषयोर्द्वयोः ।
संसर्गं तद्विजानीयात् संसर्गः षड्विधश्च स इति ॥

षड्विधत्वञ्चास्य संसर्गस्य वातादिभिर्युग्मै स्त्रयः संसर्गा स्तैरेव रक्तयोगादपरे त्रय इति सन्निपातजन्तु एकैकदोषजेषु[1] न दृष्टस्यासाध्यत्वस्य योगात् विकृतिविषमवायारब्धत्वमिति संख्यायां पृथक्गणितम् । गुदवलीत्रय इति । सार्द्धपञ्चाङ्गुलमान गुदं तस्यावयवभूतास्तिस्त्रोवलय उपर्य्युपरिव्यवस्थिताः शङ्खावर्त्तनिभाः प्रवाहणी-विसर्ज्जनीसम्वरणीनामिका स्तत्र गुदोष्टमर्द्धाङ्गुलं तदूर्द्ध्वमङ्गुलमाना प्रममावली सुश्रुतेन निर्द्दिष्टाभोजेऽप्युक्तम् ।

रोमान्तेभ्यो यवार्द्धश्च गुदौष्ठं परिचक्षते ।

---

(१) एकैक दोषजेष्विति सम पृथक्दोषजे। प्रकृति समवायारब्धेष्विति यावत् तथाच सन्निपातजन्तु एकैक दोषजेषु अदृष्टस्या साध्यत्वस्य योगात् विकृति विषम समवायारब्धम् अतो न सङ्ख्यायां पृथक्गणितमिति भावः। यवाध्यर्द्धम् अङ्गुल्यर्द्धम्। उपादानादुपलक्षणात्। तेषु नासादिजाधिमांसेषु। उपात्तत्वादुक्तत्वात्। परसम्मतौ देशः स चरक एव। अनुपन्नम असङ्गतम् ।

दोषास्त्वङ्मांस मेदांसि संदुष्य विविधाकृतीन् ।
मांसाङ्कुरानपानादौ कुर्व्वन्त्यर्शांसितान् जगुः ॥२॥
कषायकटुतिक्तानि रूक्षशीतलघूनि च ।
प्रमिताल्पाशनं तीक्ष्णं मद्यं मैथुनसेवनम् ॥

गुदौष्ठादङ्गुलिस्त्वैव प्रथमां तां वलीं विदूरिति ॥
सार्द्धाङ्गुलमाना द्वितीया तृतीया चेति ॥१॥
संप्राप्तिपूर्व्वकमर्शः स्वरूपमाह ।

दोषा इत्यादि । त्वङ्मांसग्रहणेन त्वङ्मांसाश्रितं रक्तमपि गृह्यते चिकित्सायां रक्तस्रावेनोपदेशात् अपानं गुदम् आदिशब्देन नासिकादीनां ग्रहणं कायचिकित्सास्तु गुदजस्यैवार्शस्त्वमिच्छन्ति नासादिजानां त्वधिमांसत्वं तेषु पश्चात्मामारुत इत्यादि संप्राप्तेः । विष्टम्भपूर्व्वरूपस्य चासम्भवात् । यदाह चरकः शिश्नेत्यारभ्ययावदधिमांस-व्यपदेश एव इति सुश्रुते नतु मांसाङ्कुरत्व साधर्म्यात् शस्त्रक्षाराग्निसाध्यत्वाच्च तेष्वर्शः शब्दप्रयोगःकृतः सार्ष-पादि स्नेहेतैल व्यपदेशवत् । सुश्रुतार्थवादिनो वाभट-स्याप्ययमेवाभिप्राय इति ॥२॥

प्रमितमल्पतमम् अल्पं मात्राहीनमशनम् । जज्जड़-स्त्वाह प्रमितमतीतकालभोजनं प्रशस्तेति पाठे तु नष्ट-शक्तिकं धान्यादिकमाह: प्रमिताशनमेकरसाभ्यास इत्येके तन्नातियुक्तम् एकरसस्याभ्यास किं वातप्रकोपस्य कट्वादे-

लङ्घनं देशकालौ च शीतौ व्यायामकर्म्म च ।
शोकोवातातपस्पर्शो हेतुर्व्वातार्शसां मतः॥३॥
कट्वम्ललवणोष्णानि व्यायामाग्न्यातपप्रभाः ।
देशकालावशिशिरौ ¹क्रोधोमद्यमसूयनम् ॥
विदाहि तीक्ष्णमुष्णञ्च सर्व्वं पानान्न भेषजम् ।
पित्तोल्वानानां विज्ञेयः प्रकोपे हेतुरर्शसाम्॥४॥
मधुरस्निग्धशीतानि लवणाम्ल गुरूणि च ।

मधुरादेर्व्वानाद्यः कफादेरत्रैवोपत्तित्वात् मधुरादीनाञ्चाभ्यासः वातशमक एव एकरसाभ्यासाच्च दौर्व्वल्यमुक्तं न तु वातवृद्धिरिति चिन्त्यमेतत् । तीक्ष्णमिति ॥३॥

देशकालावशिशिराविति उष्णोदेशो मरुः उष्णकालः शरद्ग्रीष्मश्चासूयनं परसम्पत्तौ द्वेषः सक्रोधविशेष एव पित्तोल्वणानामित्यनेन सर्व्वेषामर्शसां त्रिदोषजत्वं अधिकेन तु व्यपदेश इति दर्शितञ्चरकेण । यदाह स एव ।

अर्शांसिनाम जायन्तेन सन्निपातितैस्त्रिभिः ।
दोषै र्दोषविशेषात्तु विशेषः कथ्यतेऽर्शसामिति ॥४॥

शय्यासनसुखैरतिरिति सुखशय्यासने रतिरा-

---

(२) मद्य विशेषणं पैष्टिकादि मृदुमद्यस्य वातशमकत्वपाठात् शीतोदेशोऽनुपः कालो हेमन्तादिः । आतपस्य उष्णगुणस्यापि उद्भूत रौक्ष्याद्वातप्रकोपत्वमिति ।

अव्यायाम दिवास्वप्न शय्यासन सुखे रति ॥
प्राग्वातसेवाशीतौ च देशकालाद्यचिन्तनम् ।
श्लैष्मिकानां समुद्दिष्ट मेतत्कारणमर्शसाम् ॥५॥
हेतु लक्षणसंसर्गाद्विद्याद्द्वन्द्वोल्वनानि च ।

सक्तिः प्राग्वातसेवा पुरोवातसेवनम् । अचिन्तनं निश्चिन्तता ॥५॥

हेतु लक्षण संसर्गादिति दोषद्वयस्य निदानमेलकेन लक्षणमेलकेन च द्वन्द्वोल्वणानि द्वन्द्वजानि विद्यात् । सर्व्वोहेतुरिति एकैकशोवाताद्यर्शसां य उक्तः स त्रिदोषजानां भवति त्रयोदोषाजनकत्वेनैषां सन्तीति त्रिदोषाणि। सहजै र्लक्षणं सममिति तेषां लक्षणं सहजैरर्शोभिः सह समं सदृशं सहजानां यल्लक्षणं तत्त्रिदोषजानामित्यर्थः सहजै र्लक्षणैः सममिति पाठान्तरे सहजैः सहजार्शोभवै र्लक्षणैः समं सर्व्वोहेतु स्त्रिदोषाणामिति योऽयं सहजार्शो लक्षणश्चात्र संग्रहेणोक्तं तन्त्रेऽनुसर्त्तव्यं यदाह सुश्रुते दुर्दर्शनानि परुषाणि पाण्डूनि दारुणान्तर्मुखादिति कृपद्रुतः कृशोभुक शिरासन्ततगात्रोऽल्पप्रजः क्षीणरेताश्च भवतीति चरके च कानिचिदित्यादिना प्रभूततरं लक्षणमुक्तं ननु त्रिदोषजामिति विशेषाभिधानमनुपपन्नं सर्व्वेषामेव रोगाणां त्रिदोषजत्वात् यदुक्तम् ।

द्रव्यमेकरसं नास्ति न रोगोप्येक दोषजः ।

सर्व्वहेतु त्रिदोषाणां सहजै र्लक्षणैः समम् ॥६॥
विष्टम्भोऽन्नस्य दौर्ब्बल्यं कुक्षेराटोप एव च ।
कार्श्यमुद्गार बाहुल्यं स क्थिसादोऽल्पविट्कता॥

योऽधिकस्तेन निर्द्देशा क्रियते रसदोषयोः इति ॥

नैवं सर्व्वदेहचरास्तु वातपित्तश्लेष्माणां इति वचनात् एकस्मिन् धात्वादौ दोषेण दूषिते तद्गतेतर दोषेऽप्यवश्यं भाविनी काचिद्दुष्टिः दुष्ट दोषसम्बन्धात् किञ्च स्वकारणात् रुक्षोवायुः शैत्यात् शीतस्य श्लेष्मणो बलमादधाति लाघवात्तेजोरूपस्य पित्तस्य। पित्तञ्च कटुत्वाद्वातस्य द्रवत्वात् श्लेष्मणः कफः शैत्यात् वायोर्द्रवत्वात् पित्तस्येति मत उक्तं न रोगोऽप्येकदोषज इति अनेनैवाभिप्रायेणोक्तम् एकः प्रकुपितो दोषः सर्व्वानेव प्रकोपयेदिति यत्र तु स्वकारणात् त्रयोऽपि कुपिता स्तत्र त्रिदोषव्यपदेश इति सिद्धान्तः एवं सर्व्वत्र ॥६॥

पूर्व्वरूपमाह ।

विष्टम्भ इत्यादि। विष्टम्भोऽन्नस्येति विष्टम्भोऽन्नस्याजीर्णतागमनम् आहाराविष्टब्धः आमाशय एवावतिष्ठते वातवैगुण्यात्। दौर्ब्बल्य क्षीणशक्तिताविष्टम्भोऽङ्गस्येति पाठान्तरे विष्टम्भोमलस्याङ्गस्य दौर्ब्बल्यम्। यद्यपि निदानान्तरं पूर्व्वरूपं वक्तव्यं भवति तथापि निदानलक्षणान्तरमत्र पूर्व्वरूपं निदानलिङ्गयोश्चिकित्साङ्गतमत्व-

ग्रहणीदोष पाण्डुर्त्तें रायङ्का चोदरस्य च।
एवं रूपाणि निर्दिष्टान्यर्शसामभिवृद्धये ॥७॥

गुदाङ्कुरा बह्वनिलाः शुष्काश्चिमचिमान्विताः।

प्रतिपादनार्थं तयोः पूर्व्वमभिधानम् अथवा अन्यस्य वक्तव्यानां कामचारादभिधानमिति एवमन्यत्रापि व्यतिक्रमे द्रष्टव्यम्। कुक्षेराटोपः गुडगुडाशब्द इति चक्रः। तन्नतन्नमिति गुणाकरः शब्दापूर्व्वकः क्षोभ इति गदाधरः पुरीष वृद्धिलक्षणं च आटोपमाध्मानमिति[१] विवृतवान्। एतच्च न सर्व्वत्र गुल्म पूर्व्वरूपे आटोपमाध्मानयोरपि पाठात् उद्गारबाहुल्यम् अधोनिरुद्धस्य वायोरूर्द्ध्वगत्वात् सक्थिसादो अङ्गावसादः ग्रहणीदोष पाण्डुर्त्तैः ग्रहणीदोषयुक्त पाण्डुरोगस्य उदररोगस्य चाशङ्का तेषां लक्षणदर्शनात्। ग्रहणीदोषपाण्डुर्त्तिरितिपाठान्तरे ग्रहणीदोषस्य पाण्डोः पाण्डुरोगस्यचार्त्तिः पीड़ास्यात्। अभिवृद्धये उत्पत्त्यर्थमिति ॥७॥

पूर्व्वं निदानमुक्तं संप्रति वातादिभेदेनार्शसां लक्षणमाह।

गुदेत्यादि। गुदाङ्कुरा गुदे अङ्कुराकाराः मांसप्र-

(१) आटोपमाध्मानमिति। आटोपम् आध्मानादिकम् इति व्याख्या कृतवान्। एषु विकल्पेषु गुल्मा इत्यादिना। भिन्न भिन्न प्रकारेण कल्पनात्।

म्लानाः श्यावारुणाः स्तब्धा विषदाः परुषाः खराः॥
मिथोविसदृशा वक्रा तीक्ष्णा विस्फुटिताननाः ।
बिम्बीखर्जूरकर्कन्धुकार्पासीफलसन्निभाः ॥
केचित् कदम्बपुष्पाभाः केचित् सिद्धार्थकोपमाः।
शिरः पार्श्वांस[4] कट्यूरुवंक्षणाद्यधिकव्यथाः ॥
क्षवथूद्गार विष्टम्भ हृद्ग्रहारोचक प्रदाः ।
कास श्वासाग्निवैषम्य कर्णनाद भ्रमावहाः ॥
तैरार्त्तो[5] ग्रथितं स्तोकं सशब्दं सप्रवाहिकम् ।

रौढा अर्शांसि वक्ष्यन्ति वातोल्बणाः शुष्काः स्रावरहिताः चिमिचिमावेदनाविशेषः म्लाना अनुपचिताः स्तब्धाः काठिन्यात् विषदाः अपिच्छिलाः धूलिस्पर्शवत् परुषाः कर्कशाः गोजिह्वास्पर्शवत् खराः कर्कोटफलवत् सूक्ष्मा अनेककण्टकचितात्वक्षु विकल्पेषु वक्ष्यमाणं केचिदिति पदं सम्बन्धीयं मिथो विसदृशाः परस्पर विभिन्नरूपाः तीक्ष्णाः सूक्ष्माग्राः फलसन्निभा इति विम्बादिभिः सम्बध्यते विम्बादिसन्निभत्वस्याकृत्याज्ञेयं विम्बीओष्ठोपमफला

(४) शिरःपार्श्वां इत्यादि मूलम् । शिरःपार्श्वादीन् अधिकं व्यथयन्तीति ।

(५) तैरार्त्त इत्यादि । तैः पूर्वोक्त मर्शोभिरार्त्तः पीड़ितो नरः ग्रथितानुपपन्नं वर्चः उपवेश्यते त्यज्यते वा तेनेत्यर्थात् अत्र णौ र्णिरित्यत्र ज्ञानार्थत्वेऽपि ओपहृगान्तापकात् अत्रान्न कर्त्तुरार्त्तस्य कर्म्मत्वं भूतमेनं पौरुषं त्याजयतीत्यादिवत् । एवं मुख्यत्वेन प्रकृतम् ।

शकृत्फेणं पिच्छानुगतं विबद्धमुपवेश्यते ॥
कृष्णत्वङ्नखविण्मूत्र नेत्र वक्त्रश्च जायते ॥८॥
गुल्मप्लीहोदराष्ठीला सम्भव स्तत एवच ॥९॥
(१)पित्तोत्तरा नीलमुखा रक्तपीतासित प्रभाः ।
तन्व्यस्रस्राविणो विस्रा स्तनवो मृदवः श्लथाः ॥
शुकजिह्वा यकृत्खण्ड जलौका वक्त्रसन्निभाः ।
दाहपाकज्वरस्वेद तृण्मूर्च्छारुचिमोहदाः ॥
सोष्माणो द्रवनीलोष्णपीतरक्तामवर्चसः ।

बिम्बीति लोके ख्याता तेलाकुचकमित्यन्ये कार्पासी वनकार्पासीकदम्बपुष्पाभाः स्थूला अनेकसूक्ष्माग्रखराः सिद्धार्थकोपमाः सूक्ष्मापीडकारूपा हृदयं गृहीतमिवेति वेदना हृद्ग्रहः ग्रथितं ग्रन्थिलं पाषाणवत् शकृत्मूलं पिच्छापिच्छिलो द्रवभागः उपवेश्यते वर्च्चश्च यज्यते । कृष्णशब्दस्त्वगादिभिर्व्यक्तान्तैः प्रत्येकं सम्बध्यते ॥८॥

अस्योपद्रवमाह ।

गुल्मेत्यादि । अष्ठिला वातरोगविशेषः ॥९॥

नीलमुखाः नीलाग्राः तन्वस्रम् तनु अघनम् अस्रं रक्तं स्रवन्तीति तन्वस्रस्राविणः विस्रा आमगन्धिनः तनवः अल्पा मृदवः कोमलाः श्लथा लम्बनशीला यवमध्याः यवावयववत् मध्ये स्थूलाः हरित्पत्रवर्णं पीतं हरितालाभं

---

(१) पित्तोत्तरा इति पित्तोल्वणाः ।

यवमध्या हरित्पीत[७] हारिद्रत्वङ्नखादयः ॥१०॥
श्लेष्मोल्बणा महामूला घना मन्दरुजः सिताः ।
उत्सन्नोपचिताः स्निग्धाः स्तब्धवृत्ता गुरुस्थिराः ॥
पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः ।
करीरपनसास्थ्याभास्तथा गोस्तनसन्निभाः ॥
वङ्क्षणानाहिनः पायुवस्तिनाभिविकर्षिणः ।
सश्वासकासहृल्लासप्रसेकारुचिपीनसाः ॥

हारिद्रं हरिद्रावर्णम् आदिशब्दात् विण्मूत्रनेत्राणां ग्रहणम् ॥१०॥

श्लेष्मोल्बणा इत्यादौ गुदाङ्कुराऽनुवर्त्तते महामूला-दूरवास्तवेगाहिनः[८] । घना निबिडावयवा उत्सन्ना दैर्घ्य-त्वोन्नताः उपचितापरिणाहेन स्थूलाः स्तब्धा अनम्राः वृत्तापरिणाहेन वर्त्तुला गुरवः गुरुद्रव्याक्रान्तमिव गुदं कुर्वन्ते स्थिरा अचञ्चलाः श्लक्ष्णामसृणाः कण्ड्वाढ्याः कण्डूबहुलाः । कण्डू व्यपगमनार्थं स्पृश्यमानाः प्रीणय-न्त्यर्शांसीति स्पर्शनप्रियाः । करीरो मरुजद्रुमः पनसः कण्टकिफलं तयोरस्थ्याभाः अथवा करीराग्राङ्कुरास्तेन

---

(७) हरितपीतेत्यादि । हरिच्च पीतञ्च हारिद्रञ्च तत्तथाभूतं त्वङ्नखादि येषां ते तथा श्लेष्मयुक्तपित्तजत्वेन अर्शः सम्भवन्ति न इत्यर्थः । एवं श्लेष्मजाश्च पाण्डुस्निग्धत्वगादयः ।

(८) दूरवास्तीति । वास्तु वसतिस्थानं परिणाहेन विशालत्वेन ।

मेढ्रवङ्क्षशिरोजाश्च शिशिरज्वरकारिणः ।
क्लैव्याग्निमार्द्दवः च्छर्द्दिरामप्राय विकारदाः ॥
वसामसकफ प्राज्य पुरीषाः सप्रवाहिकाः ।
न स्रवन्ति नभिद्यन्ते पाण्डुस्निग्धत्वगादयः॥११॥
सर्वैःसर्वात्मकान्याहु र्लक्षणैः सहजानि च॥१२॥
रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः।

करीराभाः पनसास्थ्याभा इत्यर्थः वङ्क्षणौ आनद्धं वद्ध-मिवशीलं तेषां ते तता गुदमन्त्यास्थ्यावङ्क्षणायाः मेढ्र-णाद्यसामर्थ्यकारिण इत्यर्थः पायुवस्तिनाभि विकर्षिणः पाय्वादिष्वाकर्षवत् पीड़ाकारिणः प्रसेकोमुखस्य गुदस्य वा कच्छमूत्रकृच्छ्रं शिरोजाड्यं शिरस्तिमिता शिशिर ज्वरकारिणः शीत ज्वरकारिणः क्लैव्यं स्त्रीष्वनुत्साह आमप्राय विकारदाः आम बहुला ये रोगाः अतीसार प्रवाहिकादय स्तत्प्रदाः प्रायस्थाने प्राज्य इति पाठान्तरे सएवार्थः प्रायः प्राज्य शब्दयोः प्रचुरार्थत्वात् वसाभञ्च स कफञ्च प्राज्यञ्च पुरीषं तेषां ते तथा न स्रवन्ति क्लेद-वक्तादिकमिति शेषः न भिद्यन्ते गाढ़विटक प्रपीड़िता अपि न विदीर्य्य इति ॥११॥

सर्वै वातजाद्यर्शोभवैर्लक्षणैः सर्वात्मकानि त्रिदोष-जानि तथा तैरेव लक्षणैः सहजान्यप्याहुः ॥ तेषामपि त्रिदोषजत्वात् ॥१२॥

वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥
तेऽत्यर्थं दुष्टमुष्णञ्च गाढविट्कप्रपीडिताः ।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥
भेकाभः पीड्यते दुःखैः शोणितक्षत सम्भवैः ।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ॥
विट्श्यावं (८)कठिनं रूक्ष मधोवायु र्न वर्त्तते ॥१२॥

गुदेकीलाः अर्शांसि इनदन्तात् समस्याः संज्ञाया-मित्यलुक्समासः पित्ताकृतिसमन्विताः पैत्तिकार्शोलक्षण-युक्ताः विद्रुमः प्रवाल मणिः लोहित इत्यर्थः। ते गाढविट्-कप्रपीडिताः कठिनपुरीषयन्त्रिताः दुष्टं रक्तमुष्णञ्च स्रवन्ति तस्येति वक्तव्य । अतिप्रवृत्तितःक्षयात् भेकाभः प्राहभेक भेकाभवत् पीतच्छविः पुरुषइति शेषः दुःखैः रोगैः शोणि-तक्षयसम्भवैः इति त्वक्पारुष्यातीसाराङ्गशीतत्व मार्थना शिरा शैथिल्यैः सुश्रुतोक्तैर्वलं स्थौल्यमुत्साहोहर्षः हतौजा हतशक्तिः कलुषेन्द्रिय आविलचक्षु व्याकुल सर्वेन्द्रियो वा विट्श्यावमिति विट्शब्दोऽत्र पुंसकोऽप्यस्ति एतन्निर्देशा-देव काश्मीरास्तु चरके विट्श्यावा कठिनारूक्षेत्येव पठन्ति अधोवायु र्न वर्त्तते गुदेन प्रतिलोमगत्वात् ।।१२ ।

---

(८) शोषयन्त्यर्शं समिति अर्शरोगिणामित्यर्थः । विट्श्यावमि-त्यादि मूलम् । श्यावं कठिनं रूक्षं विट् अधोवायुर्न वर्त्तते तस्येति शेषः ।

तनुचारुणवर्णञ्च फेनिलञ्चासृगर्शसाम् ।
कट्यूरुगुदशूलञ्च दौर्ब्बल्यं यदि चाधिकम् ॥
तत्रानुबन्धोवातस्य हेतुर्यदि च रूक्षणम् ॥१४॥
शिथिलं श्वेतपीतञ्च विट्स्निग्धं गुरुशीतलम् ।
यद्यर्शसां घनञ्चासृक् तन्तुमत्पाण्डुपिच्छिलम्॥
गुदं सपिच्छं स्तिमितं गुरुस्निग्धञ्च कारणम् ॥
श्लेष्मानुबन्धो विज्ञेय स्तत्र रक्तार्शसां बुधैः ॥१५॥
पञ्चात्मामारुत पित्तं कफोगुदवलीत्रयम् ।
सर्व्व एव प्रकुप्यन्ति गुदजानां समुद्भवे ॥
तस्मादर्शांसि दुःखानि बहुव्याधि कराणि च ।
सर्व्वदेहोपतापीनि प्रायः कृच्छ्रतमानि च ॥
बाह्यायान्तु वलौ जातान्येकदोषोल्वनानि च ।

इदानीं तस्यैव रक्तार्शसोनिदानस्य वातादिभेदेन लक्षणमाह तन्वित्यादि वातादि दुष्टस्यैव रक्तस्यारम्भकत्वात् नतु केवलस्य दोषजत्वा भावात् ॥१४॥

शिथिलमित्यादिना कफानुबन्धस्य ननु पित्तानुबन्धः कुतोनोक्त इति चेत् उच्यते रक्तपित्तयोः प्रायः समानलिङ्गत्वात् उक्तञ्च पूर्व्वं रक्तोल्वण गुदेकीलाः पित्ताकृतिसमन्विता इति ॥१५॥

ननु गुददेश दुष्ट्या गुदजं स्यात् गुदस्योपादानात्

अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च॥

कथं सर्व्वदेहव्यापकत्व कृष्णत्व रूपादृष्टिरिति अत आह पञ्चात्मेत्यादि पञ्चात्मा पञ्चस्वरूपः [10] प्राणापानसमानोदानव्यान भेदात् एवं लिङ्गविपरिमाणात् पञ्चात्मकत्वञ्च पित्तस्यापि योज्यं [11] पित्तं हि आलोचकरञ्जकसाधकपाचक-

(१०) प्राणापानेत्यादि । हृदयादि स्थान कर्म्मभेदेन प्राणादेर्भेदात् । यदुक्तं हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थः । उदानः कण्ठदेशस्थो व्यानः सर्व्वशरीरगः । योऽनिलो वक्त्रसञ्चारी स प्राणोनाम देहधृक् । सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते । प्रायशः कुरुते दुष्टो हिक्का श्वासादिकान् गदान् । उदानो नामयस्तूर्द्ध्वमुपैति पवनोत्तमः । तेन भाषित गीतादि प्रवृत्तिः कुपितस्तु सः । ऊर्द्ध्वजत्रुगतान् रोगान् विदधाति विशेषतः । आमपक्वाशय चरः समानोऽग्नि सहायवान् । सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि । तज्जान् अन्नजान् मलमूत्र रसादीन् विविनक्ति पृथक् करोतीत्यर्थः । सदुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि । पक्वाशयाश्रयोऽपानः काले कर्षति चाप्ययम् । समीरणः शकृन्मूत्र शुक्रगर्भार्त्तवान्यधः । क्रुद्धश्च कुरुते रोगान् घोरान् बस्तिगुदाश्रयान् । शुक्रदोष प्रमेहांश्च व्यानापान प्रकोपजान् । कृत्स्नदेहचरो व्यानो रससंवाहनो यतः । स्वेदासृक् स्रावणश्चापि पञ्चधा चेष्टयत्यपि । प्रस्यन्दनोद्वहनं पूरणञ्च विरेचनम् । धारणञ्चेति पञ्चैता चेष्टाः परिज्ञानमत्र इति पित्तं हीति।

(११) अत्रापि स्थान कर्म्मभेदेन भिन्नमिति यदाह । आमाशये यकृत्प्लीह्नोर्हृदये लोचनद्वये । त्वचि सर्व्वशरीरेऽपि पित्तं निवसति क्रमात् । अथ तेषां कर्म्माणि । पित्तं पञ्चात्मकं तत्र पक्वामाशय-मध्यगम् । पञ्चभूतात्मकत्वेऽपि यत्तैजसगुणोदयात् । त्यक्तद्रवत्वं पाकादि कर्म्मणानल शब्दितम् । पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ।

द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितानि च ।
कृच्छ्रसाध्यानि तान्याहुः परिसम्वत्सराणि च ॥

भाजकभेदाद्भिन्न एवं कफोऽपि पञ्चात्मा हृदयामाशयजिह्वाशिरःसन्धिषु क्रमेणावलम्बक क्लेदक बोधक तर्पक-श्लेषक भेदात् यदाह गौतमः ।

[12]श्लेष्मा च पञ्चधास्थः श्लेषकादिस्वकर्म्मणा ।
कफधाम्नाञ्च सर्व्वेषां यत्करोत्यवलम्बनम् ॥
अतोऽवलम्बकः श्लेष्मा यस्त्वामाशयसंश्रितः ।
क्लेदकः सोऽन्नम् क्लेदाद्बोधको रसबोधनात् ॥
रसनास्थः शिरःसंस्थोऽक्षि तर्पणात्तु तर्पकः ।
सन्धिसंश्लेषणादेव श्लेषकः सन्धिषु स्थित इति ॥

गुदवलीत्रयस्य च प्रकोपाविकृतित्वं प्रवाहणादिषु कर्म्मसु कार्य्याकर्तृत्वञ्च । गुदवलीत्रये इति पाठान्तरं

तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् । करोति बलदानेन पाचकं नाम तत्स्मृतम् । आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात् । बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् । साधकं हृद्गतं पित्तं रूपालोचनतः स्मृतम् । दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात् त्वचः ।

(१२) श्लेष्मा च पञ्चधास्थ इति श्लेष्मा च पञ्चधा व्यवस्था । वस्तु च तथाविधः । श्लेषकादि स्वकर्म्मणा श्लेषणादि स्वीयक्रियाभेदेन ननु यदि वाह्यादि वलिभेदेन अर्शांसि सुखसाध्य कृच्छ्रसाध्यासाध्यानि एवं एकद्वित्रिदोषभेदेनापि तर्हि सहजानि त्रिदोषाणि च वाह्यादि वलिभेदेन एवं अभ्यन्तर वलिजातानि एकद्वित्रिदोषभेदेन च किं स्युरित्याह ।

सहजानि त्रिदोषाणि यानि चाभ्यन्तरे वलिम् ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्दिशेत् ॥११॥

मे युक्तं तत्र प्राणोदानयोः सन्निधानत्वस्याप्यभावात् वलीदुष्टेरप्राप्तेश्च । सर्व्वत्र चेति उक्त मारुतादय एवेति कष्टव्याधिकरत्वानीति जठराग्निमान्द्याद्युपद्रवकराणि प्रायः कष्टतमानीति प्रायोग्रहणादसाध्यानि न सुखसाध्यान्यपि न चिरोत्पन्नतानीति अनतिक्रान्तसंवत्सराणि परिसंवत्सराणीति परिगतोऽतिक्रान्तः संवत्सरो यैस्तानि तथा यानि तु बाह्यवलिजातानि द्विदोषलक्षणानि तानि कृच्छ्राणि त्रिदोषजानि याप्यानीत्युक्तम् एवं द्वितीयायामेक दोषोल्वणानि कृच्छ्राणि द्विदोषोल्वणानि याप्यानि त्रिदोषोल्वणानि असाध्यानि एवं तृतीयायामेक दोषोल्वणानि याप्यानि शेषाण्यसाध्यानि यद्वयात्वं [12]प्रत्याख्येयं वातदोष बलिभेदेऽप्य साध्यमेव यदुक्तं चरकेन ।

नासाध्यः साध्यतां याति साध्यो याति त्वसाध्यतामिति ॥१६॥

(१२) यद्वाप्यमित्यादि । याप्यं वक्ष्यमाण चतुष्पदादि सम्पन्नं सहजं त्रिदोषम् अभ्यन्तर वलिजातञ्च तत् तदसम्पन्नं सहजादिकं प्रत्याख्येयं तद्वा दोषभेदेन यथा अभ्यन्तर वलिजातं एकादित्रिदोषभेदेन वलिभेदेन यथा सहजं त्रिदोषजं वा बाह्यादि वलिभेदेन याप्यासाध्यमेव । शेषत्वादायुष इत्यादि मूलम् । शरीर जीवयोर्योगो जीवनं तेनावच्छिन्नः काल आयुस्तस्य शेषत्वात् दीप्तकायाग्नेः अर्शोरोगिणः चतुष्पादे समन्विते पादचतुष्टय मिलितेऽर्शोरोगिणि यद्वा चतुष्पादस्य सम्पन्ने मिलने जातानि अर्शांसि याप्यन्ते । पादचतुष्टयं यथा भिषग्द्रव्याण्युपस्थाता रोगी पादचतुष्टयम् । गुणवत् कारणं ज्ञेयं विकारव्युपशान्तये ।

शेषत्वादायुषस्तानि चतुष्पादसमन्विते ।
याप्यन्ते दीप्तकायाग्नेः प्रत्याख्येयान्यतोऽन्यथा ॥१७॥
हस्ते पादे मुखे नाभ्यां गुदे वृषणयोस्तथा ।
शोथो हृत्पार्श्वशूलञ्च यस्यासाध्योऽर्शसो हि सः ॥
हृत्पार्श्वशूलं संमोहश्छर्दिरङ्गस्य रुग्ज्वरः ।
तृष्णा गुदस्य पाकश्च निहन्युर्गुदजातुरम् ॥
तृष्णारोचकशूलार्त्तमति प्रस्रुतशोणितम् ।
शोथातिसारसंयुक्तमर्शांसि क्षपयन्ति हि ॥
मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि च ।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च ॥१८॥

असाध्यो[१४] द्विधा याप्यप्रत्याख्येयभेदात् तत्र यद्यायुःशेषोऽस्ति चतुष्पादसंपत्तिश्च तदा याप्यत्वमन्यथा प्रत्याख्येयत्वमित्याह शेषत्वादित्यादि चतुष्पादसमन्विते-ऽर्शोरोगिणीति शेषः । समन्वित इति भावे क्तः तेन चतुष्पादसमन्वये सतीति चक्रः ॥१७॥

उपद्रवादसाध्यत्वमाह हस्ते इत्यादि । हस्तपादादिशोथो भिन्नतोऽसाध्यलक्षणम् । हृत्पार्श्वशूलसंमोहादिव्यस्तं समस्तञ्च । मेढ्रादिष्वपि वक्ष्यन्ते यथास्वमित्यनेन छेदः । तेन नासार्शः इत्यादिव्यपदेशः गण्डूपदास्यरूपाणि किञ्चुलकमुखसदृशानि ॥१८॥

(१४) असाध्योऽर्श मरति । कोऽसौ सः अर्शरोगो असाध्यः याप्यप्रत्याख्येयभेदात् ।

इति माधवः मधुकोषमञ्जिकायां अर्शोनिदानम् ।

व्यानोगृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः ।
कीलोपमं स्थिरं खरं चर्मकीलन्तु तद्विदुः ॥
वातेनतोदपारुष्यं पित्तादसितवक्त्रता ।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ॥१८॥
इत्यर्शोनिदानं ।

चर्मकीलसंप्राप्ति माह व्यान इत्यादि व्यानोवायुः एतच्च गुदोष्ठ देश एव नास्त्येवेति कार्त्तिक कुण्डादय स्तस्यैव वातादि भेदेन लक्षण माह वातेनेत्यादि सवर्ण- नागाच्च सवर्णता ॥ १८ ॥

इति अर्शोनिदानम् ।

अथाग्निमान्द्याजीर्णविसूचिकालसकविलम्बिका निदानं ।

मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः ।
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः ॥१

अर्शःकार्य्यत्वादग्निमान्द्यादेस्तान्याह ।

मन्द इत्यादि मन्दस्य दुर्ज्ञेयत्वात् प्रागभिधानं कफ पित्तानिलाधिक्यादिति यथाक्रमं मन्दादिषु योज्यं तत्- साम्यादिति तेषां कफादीनां साम्यात् समः अविकृतः

विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान्
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥२
समा समाग्नेरशिता मात्रा सम्यग्विपच्यते ।
स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ॥

धातुसाम्यहेतुरित्यर्थः । एतस्य विकारस्यापि विकारप्रस्तावेऽभिधानं प्रकृतिज्ञानान्तरीयं विकृतिज्ञानमिति बोधनार्थं जठर इति धात्वग्निभूताग्निव्यवच्छेदार्थम् ॥१॥

प्रतिलोमतन्त्रयुक्त्या तेषां स्वरूपमाह ।

विषम इत्यादि । वातजान् रोगानिति वातनानात्मजानामशीतेरन्यतमान् सामान्यजांश्च ज्वरातीसारादीन् । एवं पित्तनानात्मजानामोषप्लोषादीनां चत्वारिंशतोऽन्यतमान् एवं कफनानात्मजानां विंशतेश्चालस्यादीनामशीतेरन्यतमान् । एते च विकाराश्चरके महारोगाध्याय एव द्रष्टव्याः ॥२॥

समेत्यादि । समा उचिता मात्रा आहारस्य सम्यक् यस्य विपच्यते स समाग्निः तीक्ष्णाग्निरिति तं विद्यादिति शेषः [1]मात्रातिमात्रेत्युपलक्षणं तेनाजीर्णभोजनादिकमपि लक्षणीयं यदुक्तमन्यत्र

(१) अतिमात्रमित्यादि । अतिमात्रमतिप्रमाणमजीर्णे अपरिपक्वेऽपि गुरुपाकमन्नं भुञ्जानस्य तत्रादिवाक्यपतितस्य येनाग्निना पच्यते तस्य सत्पथोऽग्निरित्यर्थः । नरेऽतीव कफ इत्यादि । क्षीणकफे नरे मारुतानुगं पित्तं कुपितं सत्पाचकस्थाने स्वोष्मणा स्वबलात् अग्नेर्बलं प्रयच्छति अर्थात् यदा तदात्यन्तबलः सानिलोऽनलः देह

कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते।
मात्रातिमात्राप्यशिता सुखं यस्य विपच्यते ।
तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते२

अति मात्रमजीर्णेऽपि गुरु चान्नं यथाश्नतः ।
दिवापि स्वपतो यस्य पच्यते सोऽग्निरुत्तमः इति ॥

तीक्ष्णग्रहणेन भस्मकस्यावरोधः अत्यन्त तीक्ष्णाग्निरेव हि भस्मक इत्युच्यते । यदुक्तं चरके

नरे क्षीणे कफे पित्तं कुपितं मारुतानुगम् ।
स्वोष्मणा पावकस्थाने बलमग्नेः प्रयच्छति ॥
तदा लब्धबलो देहं विरूक्षेत् सानिलोऽनलः ।
अभिभूय पचत्यन्नं तैक्ष्ण्यादाशु मुहुर्मुहुः ॥
पक्त्वान्नं सततं धातून् शोणितादीन् पचत्यपि ।
ततो दौर्बल्यमातङ्कान् मृत्युञ्चोपनयेन्नरम् ॥
भुक्तेऽन्ने लभते शान्तिं जीर्णमात्रे प्रताम्यति ।
तृट्कासदाहमूर्च्छाः स्युर्व्याधयोऽत्यग्निसम्भवाः इति॥२॥

अग्निमान्द्याजीर्णयोः परस्परकारणत्वादजीर्णान्याह ।

विरूक्षेत् । अन्नमभिभूय तैक्ष्ण्यादाशु मुहुर्मुहुः पचतीत्यर्थः । ततोऽनन्तरं अन्नं पक्त्वा शोणितादीन् धातूनपि पचति तत आतङ्काद्रोगाद्दौर्बल्यं मृत्युञ्च नरम् उपनयेत् प्रापयेदिति । अन्ने भुक्ते नरः शान्तिं लभते जीर्णमात्रेव प्रताम्यति मुह्यति तस्या तृड़ादयः स्युः एते व्याधयोऽत्यग्निसम्भवाः इत्यन्वयः इति । इत्यग्नेरनुरूपत्वं चतुर्णामैक्यभावे रसानुकूल्येन परिणतावशिष्टाहार इत्यवगम्यते ।

आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः ।
अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः ॥४॥

आममित्यादि । त्रिभिरिति कफादिभिरेकैकशो यथासंख्येन रसशेषत इति रसावशेषो रसशेषः । प्रकृतिविकारभावे चतुर्थी यथा यूपाय दारु अथवा रसशब्देन रसवानाहारोऽनिरभिमतो लक्षणः लक्षणया तेन रसशब्देन रसवानाहारोऽभिधीयते तस्य शेषोऽपरिणतलक्षणो रसशेष इति जेज्जडः । ननु यद्येवं तदा मविदग्धविष्टब्धानामन्यतमरूपस्यावश्यम्भावित्वात् न तेभ्यो भेदः । किञ्चैतल्लिङ्गैरम्लोद्गारादिभिर्भवितव्यं तथाच सति उद्गारशुद्धौ रसशेषाजीर्णलक्षणस्यानुदयः प्रसङ्गः । उक्तं हि सुश्रुते

[२]उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य ।
रसावशेषेण तु स प्रसेकं चतुर्थमेतत् प्रवदन्त्यजीर्णमिति ॥

आरोग्यमञ्जर्यां नागार्जुनोऽप्याह ।

उद्गारेऽपि[१] विशुद्धतामुपगते काङ्क्षा न भक्तादिषु ।
स्निग्धत्वं वदनस्य सन्धिषु रुजाऽऽलस्यं शिरोगौरवम् ॥

---

(२) उद्गारशुद्धावपीत्यादि । यस्योद्गारशुद्धावपि भक्तकांक्षा अभिलाषा न जायते हृद्गुरुता च भवति रसावशेषेण सप्रसेकमेतदजीर्णं चतुर्थं प्रवदन्ति आचार्या इति ।

(१) उद्गारेऽपीत्यादि । उद्गारे विशुद्धताम् उपगते प्राप्ते सत्यपि यस्यापि भक्तो निवृत्ते भक्तादिषु काङ्क्षा न जायते एवं वदनस्य स्निग्धत्वं सन्धिषु रुजा तथा शिरोगौरवञ्च भवेत् मन्दाजीर्णरसे रसशेषाजीर्णे इदं लक्षणं तत्तु मन्दाजीर्णरसे अतिशये पुनर्ग्रासादिव अशीमन

मन्दाजीर्णे रसे तु लक्षणमिदं तत्रातिरुद्धे पुनः ।
हृच्छ्वासज्वरमूर्च्छनादि च भवेत् सर्व्वामयश्चोभयमिति ॥

नैवम् अत्यल्पाग्निविदग्धादिरूपस्यात्याहारशेषस्या-त्यल्पत्वेन न तदनुरञ्जितोद्गारोदय प्रसङ्गः अकालबुभुक्षा-यामिव यदाह सुश्रुतः

स्वल्पं यदा दोषविबद्धमामं लीनं न तेजः पथमावृणोति ।
भवत्यजीर्णेऽपि तदा बुभुक्षा या मन्दबुद्धिं विषवन्निहन्तीति

तत्रान्तरे त्वाहारपाकजं रसशेषलक्षणमुक्तम् ।
आमं विदग्धं विष्टब्धं रसशेषं तथापि च ।
चतुर्विधमजीर्णञ्च आहारापरिपाकतः इति ॥

गदाधरस्त्वाह रसं शेषो रसशेषः आहारजनिते रसे शेष आहारावयवोऽनुप्रविष्टोऽलक्ष्यमाणः क्षीरे नीरमिव रसशेषः तेन विदग्धादिकार्य्याम्लोद्गारादिभिर्न भूयते उक्तञ्च उद्गारशुद्धावपि भक्तकाङ्क्षा न जायते हृद्गुरुता च यस्य रसावशेषेण तु स प्रसेकं चतुर्थमेतत् प्रवदन्त्यजीर्ण-मिति । ननु आमाजीर्णादिभ्यो रसशेषस्य को भेदः उच्यते आमादित्रयमन्नजं रसशेषस्त्वाहाररसजः वाति-कादि व्यपदेशश्चात्र न कृतः अल्पत्वाद्दाहादि लिङ्गानां हेतुलक्षणचिकित्साभेदाच्चास्य भेदः इति । अजीर्णमिति

शोभनं सर्व्वरोगस्य सञ्जननमुत्पत्तिजननमिति यावत् भवेदित्यर्थः अकाल बुभुक्षायामिति अकाले अजीर्णसमये बुभुक्षा तस्याम् । आहा-रावयव आहारैकदेशः आहारस्याऽपरिणतांश इति यावत् । अनु प्रविष्टः सूक्ष्मरूपेण प्रविष्टः । आहाररसज इति आहारीय रसज-इत्यर्थः तथाचाहारस्य विद्यमानत्वमनुद्भूतत्वेन तद्वत्ता व्यपदेशात् रसजत्व व्यपदेश इति भावः ।

अजीर्णं पञ्चमं केचिन्निर्दोषं दिनपाकि च ॥५॥
वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् ॥६॥

तद्विरोधेन जीर्णं पक्वं तद्विरुद्धमजीर्णञ्च यथास्थितं सर्व्वमजीर्णं त्रिदोषजम् एकदोषव्यपदेश उत्कटैकदोषलिङ्गत्वेनोक्त इति व्याख्यानयन्ति यत स्त्रैदोषिकमेवाजीर्णकारणमुक्तम् अत्यम्बुपानादित्यादि अजीर्णादपि दोषत्रय प्रकोपो भवति यदुक्तं सुश्रुते अजीर्णात् पवनादीनां विभ्रमो बलवान्मत इति ॥४॥

अजीर्णं पञ्चमम् ।

केचिदित्यादि । निर्द्दोषम् अध्मान दुष्टरकारकं दिनपाकि चेति अहोरात्रेणाहारः पच्यते इत्युत्सर्गं यत्र तु मात्राकाला सात्म्यादि दोषादपरदिने पच्यते तद्दिनपाकिकाल व्यतिक्रमेण पच्यमानमपि अध्मानादिकं न करोति इतिपूर्व्वेभ्यो भेदः एतदभिधानस्य तु प्रयोजनं पाककालप्रतीक्षणं नैशाजीर्णे भोजननिषेधात् ॥५॥

प्राकृतं प्रतिवासरमिति प्राकृतमवैकारिकं प्रतिवासरं प्रतिदिने क्रियमाणम् अयमभिसन्धिः अद्यैव भुक्तमन्नं किं जीर्णमजीर्णं वा नतावत् जीर्णं क्षुत्पिपासामलोत्सर्गादिजीर्णलक्षणस्यानुदयात् तस्मादजीर्णं तच्चाध्मानादिकं न करोतीति पूर्व्वेभ्यो भिन्नं तस्य चाभिधानप्रयोजनं पाकार्थं वामपार्श्वशयनाद्याचारसेवा । उक्तं हि सुश्रुते

भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत् ।
शब्दरूपरसस्पर्शगन्धांश्च मनसः प्रियान् ।

अत्यम्बुपानाद्विषमाशनाच्च संधारणात् स्वप्न-
विपर्ययाच्च। कालेऽपि सात्म्यं लघु चापि भुक्त-
मन्नं न पाकं भजते नरस्य ॥७॥
तत्रामे गुरुतोत्क्लेदः शोथो गण्डाक्षिकूटगः।
उद्गारश्च यथा भुक्तमविदग्धः प्रवर्त्तते ॥

भुक्तवान् उपवेशेत, तेनान्नं साधु तिष्ठतीति ॥

नचात्राजीर्णस्य निरूपणस्य शास्त्रेण विहितत्वात्। चरके तु तस्य विकृतमजीर्णमित्यादिना योगमध्यविषयत्वेन अन्नविषाख्यमजीर्णं पठितं तच्च पित्तादिसंसृष्टरसशेषाजीर्णमेवेति व्याख्यायते तेन रसशेष एव तस्यान्तर्भाव इति न पृथक् पठितः ॥६॥

अजीर्णकारणमाह।

अत्यम्बुपानादित्यादि। सन्धारणादिति वेगानां, स्वप्नविपर्यय 'या दिवास्वप्नादि' लघु चापीत्यपि शब्देन स्निग्धोष्णादिगुणयुक्तमपि बोध्यम्। केचिदीर्ष्याभयक्रोधपरिक्षतेनेत्यादि श्लोकं पठन्ति। स च मानसदोषाजीर्णविषये बोद्धव्य इति ॥७॥

उद्दिष्टानामामाजीर्णादीनां लक्षणमाह।

तत्रेत्यादि। तत्रेति तेषु मध्ये, गण्डः कपोलः, अक्षिकूटः अक्षिगोलकः, तद्गतः शोथो भवति प्रभावात्, उद्गारश्च

वातादिनिदानानाम् आमाद्यजीर्णानाम्। अस्य रसशेषाजीर्णस्य।
अमितमिति। मितं युक्तं तद्भिन्नं अधिकमित्यर्थः। विभ्रमः कोपः। न तावत् जीर्णं नैव जीर्णमित्यर्थः।

विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः ।
मलवाताप्रवृत्तिश्च स्तम्भो मोहोऽङ्गपीडनम् ॥
विदग्धे भ्रमतृण्मूर्च्छाः पित्ताच्च विविधा रुजः ।
उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते ॥
रसशेषेऽन्नविद्वेषो हृदयाशुद्धिगौरवे ॥८॥
मूर्च्छा प्रलापो वमथुः प्रसेकः सदनं भ्रमः ।
उपद्रवा भवन्त्येते मरणं वाप्यजीर्णतः ॥९॥
अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः ।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥१०॥

यथा भुक्तमिति मधुरादिरूपः, अविदग्धोऽन्नः द्वितीयपाके हि आहारस्य अम्लता दर्शिता; विविधा वातवेदनातोदभेदादिरूपा, अङ्गपीडनं सामवातवेदनादि । पित्ताच्च विविधा रुज इति ओषचोषादयः । सधूमाम्ल इति धूमोद्गारोऽम्लोद्गारश्च ॥८॥

उपद्रवानाह ।

मूर्च्छेत्यादि । अति प्रवृद्धाजीर्णेऽपि मरणम् ॥९॥

अजीर्णकारणेभ्योऽतिमात्रभोजनस्य विशेष-
कारणत्वमाह ।

अनात्मवन्त इत्यादि । अनात्मवन्तो दुष्टमनोयुक्ता लोभित्वेन तदात्वसुखाकाङ्क्षिण इति अतएवोक्तं पशुवदिति रोगानीकस्य रोगसमूहस्य विसूच्यादेर्मूलं कारणम् ॥१०॥

**अजीर्णमामं विष्टब्धं विदग्धञ्च यदीरितम् ।
विसूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥११॥
सूचीभिरिव[५] गात्राणि तुदन् सन्तिष्ठतेऽनिलः ।
यस्याजीर्णेन सा वैद्यैर्विसूचीति निगद्यते ॥**

अजीर्णसम्भवत्वात् विसूच्यादीनामजीर्णान्तरं
विसूच्यादीन्याह ।

अजीर्णमित्यादि । आमविष्टब्धविदग्धेषु त्रिषु विसूच्यलसविलम्बिका यथासङ्ख्यं भवन्तीति कार्त्तिककुण्डः । तन्न इति बकुलकरः । यथा संख्ये हि सति विदग्धा विलम्बिकां प्राप्नोति ताञ्च कफवाताभ्यां पठिष्यति तस्मात् त्रिविधाजीर्णात् यथासम्भवं विसूच्यादीनामुत्पाद इति युक्तम् । उक्तं हि अजीर्णात् पवनादीनां विभ्रमो बलवान् मत इति ॥११॥

विसूच्या निरुक्तिमाह ।

सूचीभिरित्यादि । बाहुल्याद्वायुः सूचीभिरिव तुदतीति विसूचीनिरुक्तिः । पाण्डुरोगवत् सूचीभिरिव तोदनं विहाय अन्येऽपि वेदनाभेदा भवन्त्येव यदुक्तं तन्त्रान्तरे ।

---

(५) सूचीभिरिवेत्यादि मूलम् । यस्य येनाजीर्णेन सूचीभिरिव गात्राणि तुदन् सन् अनिलः सन्तिष्ठते तस्य सा विसूचीति वैद्यैर्निगद्यते इत्यन्वयः । अत्र ऊर्द्ध्वगा विसूची भवति तथा अधोगापीति । ननु सुश्रुतादौ अधोगाया आमातीसारेण ऊर्द्ध्वगायाश्च छर्द्यां ग्रहणात् न पृथगुक्तिः चरके कथं विसूच्युक्तिरित्यत आह चरके आमातिसारस्येत्यादि ।

न तां परिमिताहारा लभन्ते विदितागमाः।
मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥१२॥

मूर्च्छातिसारो वमथुः पिपासा शूलो भ्रमोद्वेष्टनजृम्भदाहाः। वैवर्ण्यकम्पौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः ॥१३॥

विविधैर्वेदनाभेदैर्वाय्वादिभृशकोपतः।
सूचीभिरिव गात्राणि भिनत्तीति विसूचिका॥

विदितागमा विदितायुर्वेदा मूढा भक्ष्याभक्ष्यानभिज्ञा अजितात्मानो अजितेन्द्रियाः अशनलोलुपाः पशुवदप्रमाणभोजिनः ॥१२॥

विसूचीलक्षणमाह।

मूर्च्छेत्यादि। वमथुर्वान्तिः शिरसश्च भेदः शिरःशूलम् अत्र च वमनातिसारौ मिलितौ लक्षणमिति बोध्यताः, सुश्रुते तु अधोगाया आमातिसारेण ग्रहणादूर्ध्वगायाश्छर्द्याश्च। चरके तु पठ्यते।

ऊर्ध्वञ्चाधश्च प्रवृत्तामदोषां यथोक्तरूपां विसूचीं विद्यादिति।

(१) कर्णेत्यादि मूलम्। यस्य कर्णावनस्यते यश्च प्रताम्येत् परिकूजति च तस्याऽलसकमिति परेणान्वयः। पीडितं मारुतेनान्न-मित्यादि। मारुतेन पीडितम् अन्नम् अन्तराभध्ये श्लेष्मणा रुद्धम् अत्यर्थं संस्थितं दोषैः शोभितं रोगकरत्वार्थं स्थापितम् अलसम् अलसकमिति नाम्नाख्यातं शास्त्रकारैः इत्यर्थः सम्बन्धः।

कुक्षिरानह्यतेऽत्यर्थं प्रताम्येत्परिकूजति ।
निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥
वातवर्च्चोनिरोधश्च यस्यात्यर्थं भवेदपि ।
तस्यालसकमाचष्टे तृष्णोद्गारौ च यस्य च ॥१४॥
दुष्टन्तु भुक्तं कफमारुताभ्यां प्रवर्त्तते नोर्द्ध्वमधश्च यस्य । विलम्बिकां तां भृशदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः ॥१५॥

अत्रोर्द्ध्वगा विसूची भवति तथाधोगापि । चरके चामातिसारस्य अपठितत्वात् चकारादुभयगापि चेति व्याचक्षते ऊर्द्ध्वगायाश्च अपक्वाहारवमनेन विदोषजच्छर्द्द्यो भेद इति मन्तव्यम् ॥१३॥

अलसकमाह कुक्षिरित्यादि । आनह्यते आध्मायते मलविष्टम्भस्य वक्ष्यमाणत्वात् प्रताम्येत् मुह्यति पुरुषः- परिकूजति, आर्त्तनादं करोति, निरुद्ध इति अधोनिरोधः- प्रतिरुद्धगतिः कुक्षौ तेनोपरि धावति ऊर्द्ध्वं हृदयकण्ठादिकं गच्छति अलसक इति दोषस्थिरत्वनिमित्ता संज्ञा यदुक्तं तन्त्रान्तरे ।

प्रयाति नोर्द्ध्वं नाधस्तादाहारो न विपच्यते ।
आमाशयेऽलसीभूतस्तेनासौ अलसकः स्मृतः ॥१४॥

विलम्बिकामाह ।

दुष्टमित्यादि । भुक्तमन्नं कफमारुताभ्यां दुष्टमिति सम्बन्धः भृशं दुश्चिकित्स्याम् अत्यर्थं दुश्चिकित्स्यां मत्वाऽत्ये-

यत्रस्थमामं विरुजेत्तमेव देशं विशेषेण विकारजातैः। दोषेण येनावततं शरीरं तल्लक्षणैरामसमुद्भवैश्च ॥१६॥

यामनाचरणीयामित्यर्थः। ननु चलसकफविलम्बिकयोरुभयोरपि वातकफप्रबलयोरूर्द्धाधोऽप्रवर्त्तनशीलयोस्तुल्यत्वात् को भेदः। उच्यतेऽलसके तीव्राः शूलादयो भवन्ति यदुक्तम्।

पीड़ितं मारुतेनान्नं श्लेष्मणा रुद्धमन्तरा।
अलसं क्षोभितं दोषैः शल्यत्वेनैव संस्थितम् ॥
शूलादीन् कुरुते तीव्रान् छर्द्यतीसारवर्ज्जितान् इति ॥१५॥

अजीर्णजन्यान् विसूच्यादीनभिधायाजीर्णजन्यस्यामस्य कार्य्यान्तरमाह।

यत्रस्थमित्यादि। आमं कर्त्त यत्रस्थं तमेव देशं विशेषेण रुजेत् एतेनान्यदेशेऽपि काञ्चिद्रुजां करोतीति बोधयति यत्रेति सर्व्वनामशब्देन कुपितवातादीनामिवानियतमेव स्थानमामस्येति दर्शितम्। कैरुजेदित्याह विकारजातैर्विकारसमूहैः विंभूतैरित्याह दोषेण येन स्वकारणोपचितेन वातादिनावततं व्याप्तं शरीरं तल्लक्षणैः तल्लिङ्गैस्तोददाहगौरवादिभिर्न केवलं तैरामसमुद्भवैर्विकारजातैरपाकालसकादिभिरपि अनेनैव श्लोकेन तन्त्रान्तरोक्तामवाताख्यं रोगं स्वीकृतवान् सुश्रुतलक्षणस्य समानत्वादित्याहुः ॥१६॥

यः श्यावदन्तौष्ठनखोऽल्पसंज्ञो वम्यर्दितोऽभ्यन्तरयातनेत्रः। क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय ॥१७॥

उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः।
लघुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ॥१८॥

इति मन्दाग्न्यादिनिदानं समाप्तम्।

विलम्बिकालसकयोरसाध्यलक्षणमाह।

य इत्यादि। विलम्बिकायाः स्वरूपेणैवासाध्यत्वमिति जेज्जटः। अल्पसंज्ञो मोहयुक्तः अभ्यन्तरयातनेत्रः कोटराक्षः सर्वविमुक्तसन्धिः सर्वपर्वशिथिलसन्धिः अपुनरागमाय मरणाय ॥१७॥

अजीर्णप्रतियोगितया जीर्णाहारलक्षणमाह।

उद्गारेत्यादि। उद्गारशुद्धिः धूमादिरहितत्वम्। उत्साहः शरीरमनसोर्बलम् उत्सर्गो मलमूत्रप्रवृत्तिः वेगसहित उत्सर्गो वेगोत्सर्गः उचितः अनुरूपः लघुता देहस्य विशेषेण कोष्ठस्येति ॥१८॥

इति मन्दाग्न्यादिनिदानं समाप्तम्।

इति व्याख्या मधुकोषपञ्जिकायाम् अजीर्णविषूचिकालसका विलम्बिका निदानम्।

अथ क्रिमिनिदानं।

क्रिमयस्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः।
बहिर्मलकफासृग्विट्जन्मभेदाच्चतुर्विधाः॥
नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः॥

अजीर्णात् क्रिमिसम्भव इत्यतोऽजीर्णानन्तरं क्रिमिनिदानम्। द्विधा बाह्याभ्यन्तरभेदत इति। अत्र बाह्यास्त्वगुपलेपकबाह्यमलसम्भवाः अभ्यन्तरा आमाशयादिसम्भवा अत एव देशभेदात् द्वैविध्येनोक्ताः कारणभेदाच्चतुर्द्धा भवन्तीत्याह बहिर्मलेति, बहिर्मलो गात्रोपलेपी स्वेदादिरुक्त एव बहिर्मलादिषु चतुर्षु जन्म बहिर्मलादिजन्म तद्भेदात्तत एव चतुर्द्धा नामभेदेन विंशति विधा भवन्ति, विंशत्यतिरिक्तास्त्वतिसूक्ष्मा सहजा चरकेणोक्ताः तेचावैकारिकत्वेन रोगाधिकारे नोच्यते विंशतिविधास्तु क्रिमयो दोषप्रकोपसद्वारेण

क्रिमिनिदानं सुगमत्वादुपेक्षितम्।

(1) स्नायोर्व्यादि सूत्रम्। मध्ये पाण्डुरोगेषु यः क्रिमिकोष्ठः स स्नायवादिविशेषणाक्रान्तः सन् व्यञ्जक कफान्वितं मलम् अतिसार्यते अत्र धातूनामनेकार्थत्वात् व्यजत इत्यर्थः वायुनेति शेषः यतः मूलकारेण वायुनाधः प्रणुन्न इत्यादिना संप्राप्तौ तस्यैव बहिःसरणानुकूल व्यापारवत् स्वपकर्तृत्वमुक्तम् अत्रापि चोत्पत्तिगुणाभावात् अन्तर्गतकर्तुः क्रिमिकोष्ठस्य कर्मत्वम् अथवा अन्तात् अतिपूर्वं सर्तेः पुनर्ज्ञापितं सिद्धम् अन्तर्गतकर्तुः कर्मत्वं पूर्ववत् इति सर्वोभिर्विभाव्यम् एवं परत्रापि ज्ञेयम्। कोष्ठाधीतानि पक्वत्वेनानन्तरं तस्येति पूरणीयम्।

बहुपादाश्च सूक्ष्माश्च यूकालिख्याश्च नामतः।
द्विधाते कोठपीड़काः कण्डूगण्डान् प्रकुर्व्वते ॥१॥
अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्ट-
गुडोपभोक्ता। व्यायामवर्ज्जी च दिवाशयानो-
विरुद्धभुक् संजमतेक्रिमींस्तु ॥ २ ॥
माषपिष्टाम्ललवणगुडशाकैः पुरीषजाः ॥१॥
मांसमत्स्यगुडक्षीरदधिशुक्तैः कफोद्भवाः ॥१॥
विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि॥१॥
ज्वरोविवर्णता शूलं हृद्रोगः सदनं भ्रमः।
भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम् ॥२॥

शूलादि रोगान् जनयन्तीति रोगा उच्यन्ते। उक्तान-
वाह्यान् विंशतिविधा तत्र मलोद्भवा इति तिस्राना-
मिव प्रमाणं परिमाणं संस्थानमाकृतिः। वर्णश्च श्वेतः
कृष्णो वा येषां यूकारूपाणां ते तथा केशाम्बराश्रया
इति अम्बरं वस्त्रं बहुपादा इति यूकाः सूक्ष्मा इति
लिख्याः ॥१॥

तेषां निदानमाह।

अजीर्णेत्यादि। अजीर्णे भजनशीलोऽजीर्णभोजी मधु-
राम्लनित्यः सतत मधुराम्लभोजी विरुद्धं क्षीरमत्स्यादि ॥२॥

क्रिमिविशेषे निदानविशेषमाह।

माषेत्यादि। अभ्यन्तरक्रिमिलक्षणमाह ज्वरा इ-
त्यादि ॥२॥

कफादामाशये जाता वृद्धाः सर्पन्ति सर्व्वतः ।
पृथुब्रध्ननिभाः केचित् केचिद्गण्डूपदोपमाः ॥
रूढ़धान्याङ्कुराकारा स्तनुदीर्घा स्तथा नवः ।
श्वेतास्ताम्रावभासाश्च नामतः सप्तधातुते ॥४॥
अन्त्रादा उदरावेष्टा हृदयादा महागुदाः ।
चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्व्वते ॥
हृल्लासमास्यस्रवणमविपाक मरोचकम् ।
मूर्च्छाछर्द्दिज्वरानाह कार्श्यक्षवथुपीनसान् ॥५॥
रक्तवाहिशिराख्यान रक्तजाजन्तवो नवः ।
अपादावृत्ताताम्राश्च सौक्ष्मात् केचिददर्शनाः ॥

कफादित्यादि । कफनिमित्ताः क्रिमयः आमाशये जायन्ते ते च वृद्धाः सन्तः सर्व्वतः ऊर्द्धमधश्च सर्पन्ति एवं पुरीषजादिषु द्रष्टव्यं ब्रध्नवर्म्मीनता नध्नीति लोके प्रसिद्धाः रूढं प्ररूढं तनवः परिणाहेन दीर्घा आयामेन अणवः उभाभ्यामपि अल्पाः ते इति कफजाः ॥४॥

सप्तनामानि विवृणोति ।

अन्त्रादा इत्यादि । एतेच नामविशेषाः । केचित् सान्वयाः केचित् निरन्वयाः व्यवहारार्थं पूर्व्वाचार्य्यैः प्रणीताः एवं वक्ष्यमाणेषु बोध्यमिति ॥५॥

रक्तजानाह ।

रक्तेत्यादि । रक्तवाहिशिरास्थानाच ते रक्तजाश्चेति

केशादा रोमविध्वंसा रोमद्वीपा उदुम्बराः ।
षट् ते कुष्ठैककर्म्माणः सहसौरसमातरः ॥६॥
पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ।
वृद्धास्ते स्युर्भवेयुश्च ते यदामाशयोन्मुखाः ॥
तदास्योद्गारनिश्वासविड्गन्धानुविधायिनः ।
पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः ॥
ते पञ्चनाम्ना क्रिमयः ककेरुकमकेरुकाः ।
सौसुरादाः सशूलाख्या लेलिहा जनयन्ति हि ॥
विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः ।
रोमहर्षाग्निसदनं गुदकण्डुर्विमार्गगाः ॥७॥

इति क्रिमिनिदानम् ।

रक्तवाहिशिरास्थाना रक्तजाः । अथवा रक्तवाहिशिरास्थानं यद्रक्तं तज्जाः नामभेदात् षट् तेऽत्र केशादादयश्चत्वारः । सह सौरसनाम मातृणामभ्यां वर्त्तन्ते इति सहसौरसमातरः एव षड्भवन्ति । कुष्ठैककर्म्माण इति कुष्ठमेकं कार्य्यं येषां ते तथा कुष्ठजनका इति यावत् उक्तं हि सुश्रुते सर्व्वाणि कुष्ठानि सवातानि सपित्तानि सश्लेष्माणि सक्रिमीणि चोपदिश्यन्ते इति ॥६॥

पुरीषजानाह ।

पक्वाशये इत्यादि । अधोविसर्पिण इति गुदनिःसरणशीलाः ते यदाभिवृद्धाः सन्तः आमाशयोन्मुखा भवेयु

अथ पाण्डुरोगकामलाकुम्भकामला-हलीमकनिदानम् ।

पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः ।
चतुर्थः सन्निपातेन पञ्चमो भक्षणान्मृदः ॥१॥

तदाश्रयरोगिणः उद्गारनिश्वासविड्गन्धानुविधायिनः स्युः पुरीषगन्धयुक्ता भवन्तीति योज्यं शेषं सुबोधम् ॥७॥

इति क्रिमिनिदानम् ।

पुरीषजाः क्रिमयः पाण्डुतां जनयन्त्यतः क्रिमे-रनन्तरं पाण्डुरोगमाह ।

पाण्डुरोगा इत्यादि । पाण्डुत्वेनोपलक्षितो रोगः पाण्डुरोगः चरके त्रिशोथीयाध्याये पञ्चपाण्डुरोगा इत्यभिधायापि पाण्डुरोगाः स्मृताः पञ्चेति यदेतत् पुनश्चरकवचनं तेन पञ्चानामपि साध्यत्वं बोधयति ननु पञ्चोन्वद्देष्विव : सान्निपातिकस्यासाध्यत्वमिति जेज्जड़ः न्यूनसंख्या व्यवच्छेदार्थमिति चक्रः सुश्रुते हि मृत्तिकाजो न पठितः ननु मृत्तिकापि दोषप्रकोपद्वारेणैव पाण्डुरोगं जनयति यदुक्तं कषायामारुतं पित्तमूषरामधुराकफमिति निदानभेदाच्च रोगभेदे रोगानन्त्यप्रसङ्गः वातजस्यापि रूक्षशीतादनेकवातनिदानकुपितवातजन्यत्वात् । उच्यते दोषजत्वाविशेषेऽपि विशिष्टरूपचिकित्साप्रतिपादनार्थं पृथ-

व्यायाममम्लं लवणानि मद्यं मृदं दिवास्वप्नमतीव-
तीक्ष्णम्। निषेव्यमानस्य प्रदूष्य रक्तं दोषास्त्वचं
पाण्डुरतां नयन्ति॥२॥

त्वक्स्फोटन ष्ठीवनगात्रसाद मृद्भक्षणप्रेक्षणकू-
टशोथाः। विण्मूत्रपीतत्वमथाविपाको भविष्यत
स्तस्य पुरःसराणि॥३॥

त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणाभताः।
वातपाण्ड्वामयेतोद कम्पानाह भ्रमादयः॥४॥
पीतमूत्र शकृन्नेत्रो दाहतृष्णाज्वरान्वितः।

नाभिधानं मूत्रान्तर्हितवत् सुश्रुतेन तु पराधिकारेषु न विस्तारोक्तिरित्यभिप्रायेण न पृथक्कृतः चिकित्सा तु दोषचिकित्सयाऽपि भवतीति॥१॥

रक्तमित्युपलक्षणं त्वङ्मांसमपि दूष्यत्वेन दृढबलेन पठितं हारीतेन रसोऽपीति॥२॥

त्वक्स्फोटनं त्वचः किञ्चिद्विदारणं मृद्भक्षणं मृद्भक्षणे चाप्रेक्षण कूटशोथः अक्षिगोलके शोथः अविपाक आहारस्य पुरःसराणि पूर्वरूपाणि॥३॥

कृष्णारुणाभेति। अत्र न पाण्डुतामतिक्रामति अन्यथा पाण्डुरोगत्वाभावं उक्तञ्च सुश्रुते सर्वेषु चैतेष्विह पाण्डुभावो यतोऽधिकोऽतः खलु पाण्डुरोग इति आदिशब्देन भेद शूलादीनां ग्रहणम्॥४॥

ननु पित्त पाण्ड्वामयीति न युक्तं पाण्डुरोगस्य

भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः ॥५॥

कफप्रसेकश्वयथुतन्द्रालस्यातिगौरवैः ।

पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥६॥

ज्वरारोचकहृल्लासच्छर्दितृष्णाक्लमान्वितः ।

पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥७॥

मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः ।

कषाया मारुतं पित्तं ऊषरा मधुरा कफं ॥

पित्तकार्य्यत्वादेव उच्यते इतरदोषसंश्लिष्ट प्रबलपित्तजन्यत्वेन पैत्तिकाभिधानं यथा पैत्तिकं रक्तपित्तमिति ॥५॥

कफप्रसेकेत्यादि । कफाद्यः पाण्डुरोगी स शुक्लैस्त्वङ्मूत्रनयनाननैरुपलक्षित इति योज्यम् ॥६॥

सान्निपातिकस्तु प्रकृतिसमसमवेतत्वेन उक्तवातजादिलक्षणैरेव बोद्धव्यः उक्तं हि चरके ।

सर्व्वान्नसेविनः सर्व्वे दुष्टदोषास्त्रिदोषजम् ।

त्रिलिङ्गं संप्रकुर्व्वन्ति पाण्डुरोगं सुदुःसहमिति ॥७॥

तस्यैव सोपद्रवस्यासाध्यत्वमाह ।

ज्वरारोचक इत्यादि । हतेन्द्रियः स्वविषयाग्राहकेन्द्रियः ॥७॥

अन्यतमोमलोवातादि ऊषरा सक्षारा रसादीन् च दूषयेत् भुक्तमिति शेषं रौक्ष्यात् प्राकृतिकोऽपि रौक्ष्यगुणात् । अविपक्वैव न कोष्ठाग्नि धात्वग्निभिः पाकं ग-

कोपयेन्मृन्मसादींश्च रौक्ष्याद्भुक्तञ्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि निरुणद्ध्यपि ॥
इन्द्रियाणां बलं हत्वा तेजोवीर्य्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥८॥
शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः ।
क्रिमिकोष्ठोऽतिसार्य्येत मलं सासृक्कफान्वितम् ॥९॥
पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति ।

रुणद्धि स्रोतांसि रसवहादीनि पूरयति रुणद्धि च इन्द्रि-
याणां बलं स्वविषयग्रहणशक्तिं तेजोदीप्तिरिति जेज्जटः ।
ऊष्मेति चक्रः वीर्य्यं शक्तिः ओजः सर्व्वधातुसारः पराभि-
मतेश्चेति जेज्जटः ॥८॥

शूनाक्षीत्यादि । सर्व्वपाण्डुरोगेषु क्रिमिकोष्ठता यदा
स्यात्तदा एतल्लक्षणमिति जेज्जटः मृत्तिकाजानन्तर पठि-
तत्वेन तस्यैव लक्षणमित्यन्ये विदेहे तु पठ्यते ॥

रूक्षणाद्भवेत् पाण्डुर्मन्दाग्निश्च निपीडितः ।
स श्वासकासशोषार्त्तः मदाकर्षसमन्वितः ॥
शूनपादाननकरः कृशाङ्गः कृशपायकः इति ॥९॥

असाध्यलक्षणमाह ।

पाण्डुरोग इत्यादि । पाण्डुरोगश्चिरोत्पन्नः काल-
प्रकर्षात् खरीभूतो जठरतां गतो न सिध्यति अचिरो-
त्पन्नोऽपि शूनानां मध्ये योऽसौ तानि पश्यति स पाण्डु-
रोगो न सिध्यत्यपरमसाध्य लक्षणमिति जेज्जटस्य योजना ।

कालप्रकर्षाच्छूनानां यो वाप तानि पश्यति ॥१०॥
बह्वाल्पविट्सहरितं सकफं योऽतिसार्य्यते ॥११॥
दीनः श्वेतादि दिग्धाङ्गश्छर्दिमूर्च्छार्तिडर्दितः।
स नास्त्यसृक्क्षयाद्यश्च पाण्डुश्वेतत्वमाप्नुयात् ॥
पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत्।
पाण्डुसङ्घातदर्शी च पाण्डुरोगी विनश्यति ॥१२॥

चक्षुष्याहविरोत्पन्नः खर्वीभूतोत्यर्थं कृषितसर्व्वधातु र्न सिध्यति तथा कालप्रकर्षेत्यादिना परमसाध्यलक्षणमिति अत्र शूनानां शोथवतां मध्ये यो वा पीतानि पश्यतीति सन् सिद्धतीति। शूनोना इति पाठान्तरं सुगमं नापुरुषः शूनाङ्गयो वापी तानि पश्यतीति पाठान्तरं सुगमतरम् ॥१०॥

अपरमसाध्यलक्षणमाह।

बह्वित्यादि। अत्र सकफत्वेऽपि बहुत्वाल्पत्व हरितत्वानि व्याधिप्रभावात् बह्वाल्पस्थाने बद्धमिति पाठान्तरं सुगमं विट्शब्दो नपुंसकोऽप्यस्ति एतन्निर्द्देशानुमेयमित्याहुः ॥११॥

अपरमसाध्यलक्षणः दीन इत्यादि दीनोक्रान्तः श्वेतादिदिग्धाङ्ग इति श्वेतवर्णलिप्ताङ्ग इवेत्यर्थः। स नास्ति नष्ट इव असाध्य इत्यर्थः। अपरमाह असृगित्यादि। अपरमसाध्यलक्षणं पाण्डुदन्तेत्यादि श्लोकेन पाण्डुसंघातदर्शीति नयनपश्चिमहरितं बहिर्निर्गतं पित्तं संपिण्डितं पश्यति ॥१२॥

अन्तेषु शूनं[2] परिहीनमध्यं म्लानं तथान्तेषु च मध्यशूनम्। गुदे च शेफस्यथ मुष्कयोश्च शूनं प्रताम्यन्तमसञ्ज्ञकल्पम्॥ विवर्जयेत् पाण्डुकिनं यशोर्थी तथातिसारज्वरपीडितञ्च ॥१३॥

अपरमसाध्यलक्षणं अन्तेष्विति अन्तेषु शाखाजत्रुशिरःसु परिहीनमध्यं दुर्बलमध्यदेशम्। एतद्वैपरीत्येनापरमसाध्यलक्षणमाह।

म्लानमित्यादि। म्लानं दुर्बलं असञ्ज्ञकल्पं हतप्रायं एवंविधं पाण्डुकिनं पाण्डुरोगिणं यशोर्थी यो वर्जयेदिति अत्र सौश्रुतश्लोके पाण्डुकिनमित्यत्र पानकिनमिति पाठान्तरं युक्तञ्चैतत् एवं हि पच्यमानपाण्डुरोगावस्थाविशेषस्य पानकिनो लक्षणमपि कृतं स्यात् उक्तं हि सुश्रुते स कामलापानकि पाण्डुरोगः कुम्भाह्वयो लाघरकालसाख्य इत्यनेनैवाभिप्राये न कश्चिदभियुक्तो लिखितवान्। अन्ते शूनं कृशो मध्येऽन्यथा च गुदशेफसि शूनो ज्वरातिसाराद्यैर्मृतकल्पस्तु पानकीति पानकी ॥१३॥

---

(२) अन्तेषु शूनमित्यादि। अन्तेषु शाखाजत्रुशिरःसु शूनं शोथविशिष्टं कर्त्तरि क्तप्रत्ययात् तथा च अन्तेषु यः शोथस्तद्विशिष्टमित्यर्थः। ननु पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेश इति नियमात् कथं शाखादिषु शूनपदार्थैकदेशस्य शोथस्यान्वय इति चेत् नैवं फलानुरोधित्वात् कल्पनायाः अभियुक्तैरपि घटशून्यं सुन्दर राजपुरुष इत्यादौ पदार्थैकदेशेऽभेदे राजनिष्ठान्वय बुद्धेः स्वीकारात्॥

पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ॥१४॥
हारिद्रनेत्रः[१] स भृशं हारिद्रत्वङ्नखाननः ।
रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः ॥
दाहाविपाकदौर्बल्यसदनारुचिकर्षितः ।
कामला बहुपित्तैषा कोष्ठशाखाश्रया मता ॥१५।
कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला ॥१५॥
कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः ।
सरक्ताक्षिमुखच्छर्दिर्विण्मूत्रो यश्च ताम्यति ॥११॥

पाण्डुरोगावस्थायां कामलामाह ।

पाण्डुरोगीत्यादि । दग्ध्वा संदूष्य रोगाय कामलारूपाय ॥१४॥

भेकवर्णः माण्डूक्यभेकवर्णः । कोष्ठशाखाश्रयेति एका कोष्ठाश्रया अपरा शाखाश्रया शाखा रक्तादयो धातवः । स्वतन्त्रापि कामला भवति यथा राजयक्ष्मा स्वतन्त्रः उपेक्षितेष्वपि कासेषु भवतीत्याहुः । तस्या अवस्थान्तरं कुम्भकामला* कोष्ठाश्रयेत्यर्थः ॥१५॥

(१) हारिद्रनेत्रेत्यादि । यथा हारिद्रनेत्रादियुक्तो नरः स्यात् तथा कामला बहुपित्ता कोष्ठशाखाश्रया मता ज्ञेयेत्यर्थः ।

* महाकालान्तरादित्यादि खरीभूतेति पूर्वं मृदुरूपेयं कृच्छ्रा कृच्छ्रसाध्या कुम्भः कोष्ठः उदरः शुषिरत्वधर्म्यात् तद्गता कामला कुम्भकामला ।

दाहारुचितृडानाहतन्द्रामोहसमन्वितः ।
नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान्विपद्यते ॥१७॥
छर्द्यरोचकहृल्लासज्वरक्लमनिपीडितः ।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली ॥१८॥
यदा तु पाण्डोर्वर्णः स्याद्धरितः श्यावपीतकः ।
बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः ॥
स्त्रीष्वहर्षोऽङ्गमर्दश्च दाहस्तृष्णाऽरुचिर्भ्रमः ।
हलीमकं तदा तस्य विद्यादनिलपित्ततः ॥१९॥

इति पाण्डुरोगादिनिदानम् ।

कृष्णेत्यादिना(४) ताम्यतीत्यन्तेन एकमसाध्यलक्षणं ताम्यतिमुह्यति ॥१६॥

दाहेत्यादिना विपद्यत इत्यन्ते नापरमसाध्यलक्षणमिति जेज्जडः ॥१७॥

कुम्भकामलासाध्यलक्षणमाह । छर्दीत्यादि ॥१८॥

पाण्डुरोगावस्थायां हलीमकमाह ।

यदेत्यादि । लाघवकालसकादीनां पाण्डुरोगावस्थाविशेषाणां लक्षणं सुश्रुतादिषु द्रष्टव्यमिति ॥१९॥

इति पाण्डुरोगनिदानम् ।

---

(४) कृष्णपीतेत्यादि । कृष्णपीतनखमूत्राद्युपेतः सन् यस्ताम्यति मुह्यति स कामलावान् विपद्यत इत्युत्तरेणान्वयः ॥

इति व्याख्या मधुकोषपञ्जिकायां पाण्डुकामलाहलीमकनिदानम् ।

अथ रक्तपित्तनिदानम् ।

घर्म्मव्यायामशोकाध्व व्यवायैरतिसेवितैः ।
तीक्ष्णोष्णक्षारलवणैरम्लैः कटुभिरेव च ॥
पित्तं विदग्धं स्वगुणैर्व्विदहत्याशु शोणितम् ।
ततः प्रवर्त्तते रक्तमूर्द्धञ्चाधोद्विधापि वा ॥

पाण्डुरोगवद्रक्तपित्तस्यापि पित्तजन्यत्वात्तद-
नन्तरं रक्तपित्तमाह ।

घर्म्मेत्यादि । घर्म्म आतपस्तीक्ष्णशीर्य्यं मरिचादि उष्णो-ग्नितापः क्षारो यवक्षारादि षण्टापारल्यादि क्षतश्च विदग्धं कुपितं स्वगुणैरिति पित्तं तीक्ष्ण पूतीत्यादिभिर्विदहति कोपयति स्वगुणैरेव[1] विदाहश्चास्य[2] रक्तस्य पित्तवदित्युक्ते ततः प्रवर्त्तते निःसरति पित्तं रक्तञ्च धातुरूपं नतु केवलं रक्तं रक्तपित्तमिति व्यपदेशानुपपत्तेः अथ पित्तेन दुष्टं रक्तमित्युच्यते तदापि पित्तरक्तमिति व्यपदेशःस्यात् एतेन रक्तस्य पित्तस्येति द्वन्द्वसमासाश्च-

(१) स्वगुणैरेवेति । स्वगुणैः पित्तस्य स्वगुणैरेव स्वगदस्य कर्त्तृ-मादानुगामित्वात् तथाच स्वगुणैर्विदग्धं पित्तं स्वगुणैः शोणितमपि विदहतीतिभावः ॥

(२) विदाहश्चास्येति । विदाहः कोपः अस्य रक्तस्य ॥

(३) मूले द्विधापिवेति युगपदूर्द्धमधोवापीति । रक्तमिति किं राग-मात्र मेत्याह धातुरूपम् ॥ अथ पदोक्तर्थं ॥

ऊर्द्ध्वं नासाक्षिकर्णास्यैर्मेढ्रयोनिगुदैरधः।
कुपितं रोमकूपैश्च समस्तैस्तत् प्रवर्त्तते ॥१॥
सदनं शीतकामित्वं कण्ठधूमायनं वमिः।

वह्निरुक्ता सुश्रुतेन। ननु चरके रागपरिमाणं पित्तं रक्तपित्तमित्युक्तं तेन रक्तञ्च तत्पित्तञ्चेति कर्म्मधारय समासे निरुक्तिरुक्ता अत्र च कारणत्रयमुक्तं यदाह।

[४]संयोगाद्दूषणात्तत्तु सामान्याद्गन्धवर्णयोः।
रक्तस्य पित्तमाख्यातं रक्तपित्तं मनीषिभिरिति॥

तत् कथं न विरोधः नैवमत्रापि रक्तप्रदत्वे दृष्टं हि रक्तं पित्ते रागमादधत्तत्संसर्गि रक्तं स्वयमपि प्रवर्त्तते इति पूर्ब्बक एवार्थः तेन रक्तञ्च पित्तञ्चेत्युभयथा निरुक्तावदोषः ॥१॥

---

(४) संयोगादित्यादि। संयोगात् उभयोः पित्तरक्तयोः निकटसम्बन्धात् दूषणात् दुष्टेः रक्तस्यापि पित्तवत् दुष्टिसम्भवात् विदाहस्यास्य पित्तवदित्युक्तेः। गन्धवर्णयोः सामान्यात् साधारण्यात् आख्यातमित्यत्र भावे क्तः आख्यानमित्यर्थः रक्तस्य पित्तमाख्यानं रक्ताभिन्नं पित्तमिति तात्पर्य्यार्थः। तत्र रक्ताभिन्नं पित्तं मनीषिभिः रक्तपित्तं कथ्यत इति शेषः। अत्रापीति॥ अत्रापि रागपरिमाणं पित्तं रक्तपित्तमित्युक्त लक्षणेऽपि रक्तप्रदत्वेः रक्तनिःसरणात् तत् कथमित्याह दृष्टं हीत्यादि। आदधत् ददत् तत् संसर्गि पित्तसंसर्गि प्रवर्त्तते निःसरति इतिपूर्ब्बकः दृष्टं हि रक्तमित्यादि व्याख्यानं पूर्ब्बं यस्य स इति पूर्ब्बकः। स एव अर्थः स च प्रागुक्तस्य रागपरिमाणं पित्तं रक्तपित्तमित्यादे रेवेति। तथा तच्चेति। तस्य रक्तपित्तस्य॥

लोहगन्धिश्च निश्वासो भवत्यस्मिन् भविष्यति॥२॥
सान्द्रं सपाण्डु सस्नेहं पिच्छिलञ्च कफान्वितम्॥१॥
श्यावारुणं सफेनञ्च तनु रूक्षञ्च वातिकम् ॥२॥
रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभम् ।
मेचकागारधूमाभ मञ्जनाभञ्च पैत्तिकम् ॥१॥३॥
संसृष्टलिङ्गं संसर्गात्त्रिलिङ्गं सान्निपातिकम् ।
ऊर्द्ध्वगं[५] कफसंसृष्टमधोगं पवनानुगम् ॥

कण्ठं धूमायनं कण्ठाद्धूमनिर्गम इव ।२॥

सान्द्रं घनं सपाण्डु सस्नेहमिति ईषत् पाण्डु स्नेहम् । तनु अघनं कषायाभं वटपाटलादिक्काथवर्णं मेचकाभम् आगारधूमाभञ्च रसमारगन्धकादि मषि मसृणीकृत कृष्ण-वर्णस्तेनवर्णो मेचक इति अञ्जनादयः प्राहुः स्निग्ध कृष्ण इत्यर्थः। अञ्जनाभं सौवीराञ्जनवर्णं ननु सर्व्वमेव रक्तपित्तं दुष्टेन पित्तेन आरभ्यते तत्कथं पैत्तिकं रक्तपित्त-मित्युच्यते सत्यं किन्तु यदा स्वस्थानस्थं पित्तं रक्तपित्ता-रम्भकं स्थानान्तरावस्थितेन पित्तेन संघट्यते किम्वा दोषान्तरासंश्लिष्टं केवलं पित्तमारभ्यकं तदा पैत्तिकमिति व्यपदेश इति ॥३॥

ननु केवलं पैत्तिकं न सम्भवत्येव यद्वक्ष्यति ऊर्द्ध्वगं

---

(५) एवं ऊर्द्ध्वाधोदेशगतां विशेषमाह ऊर्द्ध्वं नासाक्ष्यादि । कुपितं मदकं यद् रक्तपित्तम् ।

द्विमार्गं कफवाताभ्यामुभाभ्यामनुवर्त्तते ॥४॥
ऊर्द्ध्वं[1] साध्यमधोयाप्यमसाध्यं युगपद्गतम् ॥५॥

कफसंसृष्टम् अरोगं पवनानुगमिति न तस्य निर्दिष्टो मार्गः उच्यते यदा स्वकारणोद्भूतेन कफेन वातेन वा स्वलक्षणकारिणा संसृष्टं भवति तदा श्लैष्मिकादि व्यपदेशः न तु मार्गसम्बन्धाश्रितेन कफवातसम्बन्धेन । ऊर्द्ध्वगं हि मार्गमहिम्नात्रस्थकफेनाधोगं चावश्यं वातेन सम्बध्यते न च तत्र कफवातौ स्वलक्षणं कुरुतः यथा शरदि ज्वरकरं पित्तं कालमहिम्ना वा तेन कफेनानुबध्यते तथापि पैत्तिक एवासौ प्राकृतो ज्वरः । यदुक्तं कुर्य्यात् पित्तस्य शरदि तस्य चानुबलः कफ इति । तेन यदा एकदोषलिङ्गयुक्तं भवति तदा एकदोषानुगमेवं द्विदोषलिङ्गं त्रिदोषलिङ्गञ्च बोध्यम् । तेनोर्द्ध्वगमधोगं चैकद्वित्रिलिङ्गं भवति एतेन पैत्तिकस्य मार्गनिर्दिष्टं इति यदुक्तं तन्निरस्तमिति ॥४॥

ऊर्द्ध्वं साध्यमिति कफसंश्लिष्टत्वेन कषायतिक्तौ रसौ कफपित्तहरौ योज्यौ पित्तहरणे प्रधानस्य विरेचनं योग्यम् । अधोगे तु एक एव मधुरो वातपित्तप्रशमनः वमनस्य प्रतिमार्गगत्वेन वेगमात्रविरोधि न तु पित्तहरणं उभयमार्गस्य विरुद्धोपक्रमत्वादेवासाध्यम् । यदुक्तं चरके ।

---

(१) ऊर्द्ध्वं साध्यमित्यादि । रक्तपित्तं ऊर्द्ध्वंगतं चेत् साध्यम् अधोगतं चेत् याप्यं युगपद् गतम् एकदोषभवगतं चेत् असाध्यं भवति ॥

एकमार्गं बलवतो नातिवेगं नवोत्थितम् ।
रक्तपित्तं सुखे काले साध्यं स्यान्निरुपद्रवम् ॥६॥
एकदोषानुगं साध्यं द्विदोषं याप्यमुच्यते ।
यत्त्रिदोषमसाध्यं स्यान्मन्दाग्नेरतिवेगवत् ॥
व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च यत् ॥७॥
दौर्ब्बल्य श्वासकासज्वरवमथुमदापाण्डुतादाह-

साध्यं लोहितपित्तं तत्यदूर्द्धं प्रतिपद्यते ।
विरेचनस्य योग्यत्वाद्बहुत्वाद्भेषजस्य च ॥
विरेचनं हि पित्तस्य जयाय परमौषधमित्यादि ॥५॥

साध्यत्वहेतुमाह ।

एकमार्गमित्यादि । एकमार्गमात्रोर्द्ध्वगमभिप्रेतम् अधोगस्य याप्यत्वात् नवोत्थितमचिरजं सुखे काले हेमन्तशिशिरयोः निरुपद्रवं वक्ष्यमाणदौर्ब्बल्याद्युपद्रवरहितम् ॥६॥

एकदोषानुगं साध्यमित्यादि । मार्गभेद दोषभेदाभ्यां साध्यत्वासाध्यत्व विरोधे सर्व्वस्वभिहित दोषभेदबलीभेदाभ्यां साध्यत्वासाध्यत्वव्याख्येयं मन्दाग्ने सथा व्याधिभिः क्षीणदेहस्य यदतिवेगवत् तदसाध्यम् अनश्नतः अरुच्यादिना अन्नाभावाद्वा ॥७॥

उपद्रवमाह ।

दौर्ब्बल्येत्यादि । दौर्ब्बल्यं भक्तापचयो बलाभाव इति गयदासः । भुक्ते घोरो विदाह इति पठार्थे सप्त-

मूर्च्छाः, भुक्ते घोरो विदाहस्त्वधृतिरपि सदा हृद्यातुल्या च पीडा। तृष्णाकोष्ठस्य भेदः शिरसि च तपनं पूतिनिष्ठीवनत्वं भक्तद्वेषाविपाकौ विकृतिरपि भवेत् रक्तपित्तोपसर्गाः॥८॥ मांसप्रक्षालनाभं क्वथितमिव च यत्कर्दमाम्भोनिभम्वा। मेदः पूयास्रकल्पं यकृदिव यदि वा पक्वजम्बूफलाभम्॥ यत् कृष्णं यच्च नीलं भृश-

---

सम्प्रमोति कार्त्तिकः। हृद्य तुल्येति हृदि अतुल्या असदृशी पीडा। कोष्ठस्य भेदः। कोष्ठमलभेदः तपनं तापः प्रवितत शिरस इति पाठान्तरे प्रविततं विस्तीर्णमानमिव प्रविततावेदना शिरसि यस्य स तथेति कार्त्तिकः। प्रविगत शिरसेति पाठान्तरे शिरोव्याप्तगात्रता अविपाक आहारस्य विकृतिरपि भवेद्रक्तपित्तोपसर्गा इति एते रक्तपित्तस्य उपसर्गा उपद्रवाः तथा तस्य विकृतिरपि भवेदिति योज्यम्। सा च वक्ष्यमाणा मांसप्रक्षालनादिरूपा। रक्तपित्तोपसर्गादिति पाठान्तरं सुगमम्॥८॥

क्वथितमिव पूतितां गतमिव कर्दमाविलमिवाम्भः कर्दमाम्भः तथा मेदः पूयास्रकल्पमिति कल्पशब्दो मेदः प्रभृतिभिः सम्बध्यते इति गयदासः। यकृदिवः यकृत्खण्डमिव पक्वजम्बुफलाभं स्निग्धकृष्णं कृष्णमञ्जनाभं नीलञ्चासपक्षप्रतिमम्। ननु पैत्तिके कृष्णत्वं पठितं नच

मति कुणपं यच्च चोक्ताविकारा स्तदव्यैग्र रक्त-
पित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥९॥
येन चोपहतो रक्तं रक्तपित्तेन मानवः।
पश्येद्दृश्यं वियच्चैव तच्चासाध्यमसंशयः ॥
लोहितं छर्दयेद्यस्तु बहुशो लोहिते चणः।
लोहितोद्गारदर्शी च म्रियते रक्तपैत्तिकः॥१०॥

इति रक्तपित्तनिदानम्।

तदसाध्यं नैवम् अतिशब्देनात्र विशेषितत्वात् तेन तत्र मनाकक्कणत्वं बोध्यमिति जेज्जटः अथवा जम्बुफलाभं यकृत् कृष्णमिति योज्यम्। उक्ताविकाराः श्वासकासादयः सुरपतिधनुषातुल्यं नानावर्णम् ॥९॥

येनेत्यादि। येन रक्तपित्तेनेति योज्यं पश्येद्दृश्यं वियच्चाप्यदृश्यमपि वियदृश्यमिति रक्तं पश्यतीति योज्यं रक्तपित्तोपहतनेत्रत्वादिति। अथवा दृश्यं घटपटादिवियच्च रक्तं पश्यतीति बहुशश्छर्दयेदिति सम्बन्धः लोहितोद्गारदर्शीति लोहितोद्गारोलोहितदर्शी च उद्गारोपि लोहितः प्रवर्त्तते इत्यर्थः अथ लोहितमुद्गारं पश्यतीति लोहितोद्गारदर्शीति ॥१०॥

इति रक्तपित्तनिदानम्।

इति व्याख्या मधुकोषपञ्जिकायां रक्तपित्तनिदानम्।

अथ राजयक्ष्मक्षतक्षीणनिदानम् ।

वेगरोधात् क्षयाच्चैव साहसाद्विषमाशनात् ।
त्रिदोषो जायते यक्ष्मागदो हेतुचतुष्टयात् ॥१॥

राजयक्ष्मरूपेषु पित्ताद्रक्तस्य चागम इति वचनात् रक्तपित्तान्तरं यक्ष्मनिदानम् । चिकित्सोपयोगिविप्रकृष्टं कारणं चतुर्विधमाह ।

वेगरोधादित्यादि । वेगोऽत्र वातमूत्रपुरीषाणां न तु वेगावरोधिनी योक्तानां जृम्भणादीनां सर्वेषां यदुक्तं चरके ।

ह्रीमत्वाद्वा घृणित्वाद्वा भयाद्वा वेगमागतम् ।
वातमूत्रपुरीषाणां निगृह्णाति यदा नरः ॥
तदा वेगप्रतीघातात्कफपित्ते समीरयन् ।
ऊर्द्ध्वं तिर्य्यगधश्चैव विकारान् कुरुतेऽनिलः इति ॥

क्षयादिति क्षीयते अनेनेति क्षयः तेनाति व्यायामानशनोपवासादयो धातुक्षयहेतवो गृह्यन्ते । साहसादिति साहसो बलवद्विग्रहादि उरःक्षतहेतुत्वेन कारणम् । विषमाशनादिति सुश्रुतोक्तद्वादशाशनप्रविचारव्यतिरेकेणोपयोगः तस्य शीघ्रं स्रोतोरोधकत्वात् उक्तं हि चरके ।

विविधान्यन्नपानानि[1] वैषम्येन समश्नताम् ।

---

(१) विविधान्यन्नपानानीत्यादि । विविधानि अन्नपानानि वैषम्येन समश्नतां भक्षयतां नराणां सम्बन्धे मारुतादयः विषमाकुपिताः सन्तः घोरान् आमान् रोगान् जनयन्ति तथा अन्नपानादेर्वैषम्यात् विषमं

जनयन्त्यामयान् घोरान् विषमामारुतादयः॥
स्रोतांसि रुधिरादीनां वैषम्याद्विषमं गताः।
रुद्धारोगायकल्पन्ते पुष्यन्ति नच धातवः इति॥

त्रिदोष इति मिलितत्रिदोषज एक एव नतु कारण-भेदादनेकः यदाह सुश्रुतः।

एक एव मतः शोषः सन्निपातात्मकोह्यतः।
उद्रेकात्तत्र लिङ्गानि दोषाणां निपतन्ति हीति॥

ननु वेगरोधादयो वातं प्रकोपयन्ति तज्जनितो यक्ष्मा-कथं त्रिदोषज इति चेत् वातप्रकोपादेवाग्निदुष्ट्या कफ-पित्तयोरपि प्रकोप इत्याहुः। हेतुचतुष्टयादित्यनेना-संख्येया अपि हेतव उक्त चतुष्टयेऽन्तर्भवन्तीति दर्श-यति शोषादि नानाशब्दवाच्यत्वेन चास्य सुश्रुतोऽन्वयम-कार्षीत् यथा[२]।

गता मारुतादयः रुधिरादीनां स्रोतांसि रुद्ध्वा रोगाय क्षय-रोगाय कल्पन्ते नतु धातवः पुष्यन्तीत्यन्वयः। यदिति वाक्यारम्भो वाक्यान्त मार्गावरोधादित्यादि। प्रत्यासत्त्यामीति। प्रत्यासत्त्या सान्निध्येन॥

(२) यथेत्यादि। यथा क्षयः पित्तो वह्निना सन्तप्तः,सन् सान्नि-ध्यात् धातूष्मभागं शोषयति तथा शुक्रक्षयो वायुः शुक्रक्षयेण प्रकुपितः सन् सन्निहितं मज्जानं शोषयति। एवं अनेन प्रकारेण पूर्व्वं पूर्व्वधातून् अस्थिमेदो मांसादीनिति। प्रत्यासत्तेः कार्य्यकारित्वप्रदर्शनार्थं सुश्रुत-वचनमुत्थापयति पूर्व्वं पूर्व्वं इत्यादि। पूर्व्वं पूर्व्वः रसादिकः क्रमेण परस्परं प्रत्येकं नतूभयतः तथा सति कार्य्यकारणयोरविशेषापत्तिः स्यात् किन्तु भिन्न भिन्न प्रत्येक पदार्थानां क्रिया व्यतीहार रूप एव

कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु।
अतिव्यवायिनो वापि क्षीणे रेतस्यनन्तराः॥
क्षीयन्ते धातवः सर्व्वे ततः शुष्यति मानवः॥२॥

संशोषणाद्रसादीनां शोष इत्यभिधीयते।
क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते बुधैः॥
राज्ञश्चन्द्रमसो यस्मादभूदेष किलामयः।
तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः इति॥

वाभटे तु यक्ष्मणां राजा राजयक्ष्मेत्युक्तं राजदन्तादिषु परमिति उपसर्जनस्य यक्ष्मशब्दस्य परनिपातः॥१॥

न केवलं धातुक्षयमात्रादेव यक्ष्मा अपि किं तर्हि
रसादि वह स्रोतो निरुद्ध निरोधादिभिर-
पीति दर्शयितुं विशिष्टां संप्राप्तिमाह।

कफेत्यादि। यदा त्वेवं न स्यात् तदा धातुक्षय एव रोगो न तु यक्ष्मा। कफप्रधानं येषां अनिलादीनां दोषाणां ते तथा। ननु दोषैरित्यनेन दोषत्रयमुच्यते कफस्य विशेषणत्वेनोपात्तत्वात् कथं तस्यैवान्यपदार्थवाच्यता उच्यते अवयवेन विग्रहः समुदायः समासार्थः यथा बहु-

---

परस्परमित्यन्योन्यमित्यर्थः मकुच्यते नत्वन्यत्र अतएव विष्णुपुराणे अहंकृता अहं माना अष्टाविंशाविधात्मकाः। अन्न प्रकाशास्ते सर्व्वे मावृताश्च परस्परमिति। एवं अन्योन्यशब्दस्यापि ज्ञेयं यथात्रैव वैयधुर्यास्य भवति त्वस्यस्यान्योऽन्यमीयत इति॥

द्रवं घनमिति समाधानं विस्तरस्तु सुश्रुते जेज्जड़े द्रष्टव्यः। कफप्रधानता च वेगरोधादि कुपितवातविमूर्च्छिताग्निमान्द्यादिना बोद्धव्या:रसवर्त्मसु रसवह धमनीसु अत्रादिशब्दो द्रष्टव्यः तेन रक्तादिवहस्रोतोरोधोपि बोध्यः। अथवा रसकारणतया रक्तादीनां रसदुष्ट्या एव रक्तादि दुष्टिरिति कार्त्तिकः। इदमत्र सूचितं यन्मार्गरोधात् हृदयस्थो रसः पत्रैवावस्थितो विकृतोमुखेन निःसरति यदाह चरकः।

रसः स्रोतः सुरुद्धेषु स्वस्थानस्थो विदह्यते।
स ऊर्द्धं कासवेगेन बहुरूपः प्रवर्त्तत इति॥

एतेनानुलोमक्षयो दर्शितः कारणभूत रसधातुक्षये सति रक्तादीनां रसकार्य्याणां पोषकाभावे क्षीयमाणत्वात्॥ प्रतिलोमक्षयं दर्शयितुमाह। अतिव्यवायिनोवेत्यादि। क्षीणे रेतसि सति अनन्तराः समीपगाधातवः क्षीयन्ते तद्यथा शुक्रे क्षीणे मज्जा क्षीयते मज्जनिक्षीणेऽस्थि एवं पूर्व्वं पूर्व्वम्। ननु कार्य्यभूतस्य शुक्रस्य क्षयात् कथं कारणभूतानां धातूनां क्षय इत्युच्यते शुक्रक्षयाद्वायुः प्रकुप्यति यदुक्तं वायोर्द्धातुक्षयात् कोपोमार्गस्यावरणेन च इति स वायुः सान्निध्यात् मज्जानं शोषयतीति एवं पूर्व्वपूर्व्वधातून् दृष्टञ्च प्रत्यासत्याकार्य्यजननं यथाग्निसन्तापा योगोलक सन्निधानादार्द्रभूभागस्यापि शोषः यथा चात्र रससञ्चारपक्षे सुश्रुतवचनं पूर्व्वः पूर्व्वोतिदृष्टत्वाद्वयेद्धिपरस्परमिति॥२॥

श्वासाङ्गमर्द कफसंस्रवतालुशोषवम्यग्निसाद मदपीनसकासनिद्राः । शोषे भविष्यति भवन्ति स चापि जन्तुः शुक्लेक्षणो भवति मांस परोरिरंसुः ॥ स्वप्नेषु काकशुकशल्लकिनीलकण्ठा गृध्रा स्तथैव कपयः कृकलासकाश्च । तं वाह-

पूर्व्वरूपमाह ।

श्वासेत्यादि । संस्रवः ष्ठीवनं पीनसः प्रतिश्यायः मांसपरोमांसभक्षणेच्छुः रिरंसुः स्त्रियं वस्तुमिच्छुः एतच्च व्याधिमहिम्ना । मनोदोषात्तथा स्वप्नेषु काकादिवाहनश्च पूर्व्वरूपमेव शल्लकी सेजाहुः इति ख्यातः नीलकण्ठो मयूरः विजलः निर्ज्जलादयो वनाग्निः अर्हितान् अभिभूतान् चकारकात् त्वच केशनिपातादयो द्रष्टव्याः। यदुक्तं चरके।

पूर्व्वरूपं[१] प्रतिश्यायोदौःशील्यं दोषदर्शनम् ।
अदोषेष्वपि भावेषु काये वीभत्सदर्शनम् ॥
घृणित्वमश्नतश्चापि बलमांसपरीक्षयः ।
स्त्रीमद्यमांसप्रियताप्रियता चावगुण्ठने ॥
यक्ष्मिणां घृणकेशानां त्वचानां पतनानि च ।
प्रायोऽन्नपाने केशानां नखानां चातिवर्द्धनम् ॥
पतत्रिभिः पतङ्गैश्च श्वापदैश्चापि धर्षणम् ।

(१) पूर्व्वरूपमित्यादि । यक्ष्मिणां पूर्व्वरूपं प्रतिश्यायः पीनसः दौःशील्यं दुःशीलता । अदोषेष्वपि भावेषु पदार्थेषु दोषदर्शनं दोषदृष्टिः कायेवीभत्सं विकृतं तद्दर्शनं घृणित्वं घृणा एवम् अश्नतः भुञ्जानस्य रक्तमांस परिक्षयः अभिधर्षणम् आक्रमणम् ॥

यन्तिसनदी र्विजलाश्च पश्येच्छुष्कां स्तरून्
पवनधूमदवार्हितांश्च ॥३॥
अंशपार्श्वाभितापश्च सन्तापः करपादयोः।
ज्वरः सर्व्वाङ्गगश्चेति लक्षणं राजयक्ष्मणः ॥४॥
स्वरभेदोनिलाच्छूलं सङ्कोचश्चांशपार्श्वयोः ॥१॥

स्वप्नेकेशास्थिराशीनां भस्मनश्चाधिरोहणम् ॥
शून्यानां ग्रामदेशानां दर्शनं शुष्यतोम्भसः।
ज्योतिषां पततां यत्र दर्शनम् इति।
अत्र श्वापदाः व्याघ्रादयः॥३॥

अंशेत्यादिना त्रिरूपसम्पन्नमाह। अंसपार्श्वयोरभि-
तापः पीड़ा अंशोभुजस्योपरिभागः अभितापत्वेन एकं-
रूपम् एवं सन्तापेति वाच्यम्। करपादयोरित्यत्र
प्राधान्यत्वादेकवद्भावं अन्यमतानां काश्मीरास्तापः पाद-
करस्यचेति पठन्ति करपादिक इति च पाठान्तरम् एतत्
त्रयं प्रायो भावित्वेन चरकेणोक्तं तेनैकादशरूपेषु मध्ये
अन्यदपि त्रयं बोध्यं तथाच भोजः कासोज्वरो रक्तपित्तं
त्रिरूपे राजयक्ष्मणि इति। अन्येत्वाहुः राजयक्ष्मणो यो
ज्वरः तस्यै तल्लक्षणमिति जेज्जड़स्तु त्रिरूपसम्पत्तिमेव
व्याख्यातवान् ॥४॥

यक्ष्मण स्त्रैदोषिकस्यैकादशरूपाणि विभज्यव्याधिप्र-
भावाज्जन्यन्ते नतु सन्निपातज्वरलिङ्गवत्
सर्व्वदोषैः सर्व्वाणीत्याह।

स्वरभेदोऽनिलादित्यादि। शूलं अंशपार्श्वयोः

ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य चागमः ॥१॥
शिरसः परिपूर्णत्वमभक्तच्छन्द एव च ॥
कासः कण्ठस्य चोद्ध्वंसो विज्ञेयः कफकोपतः॥१॥५॥

स चैक एव गणनीयः अभक्तच्छन्दोऽभक्तारुचिः ऊर्द्ध्वंसः कण्ठभेदः उत्कासिकेति कार्त्तिकः। एकादशभिरेभिरिति स्वरभेदादिभिः कण्ठोद्ध्वंसान्तैः। षड्भिरिति सुश्रुतेन षड्रूपाणि पठितानि।

भक्तद्वेषो ज्वरः श्वासः कासः शोणितदर्शनम्।
स्वरभेदश्च जायेत षड्रूपे राजयक्ष्मणीति॥

कासातिसारपार्श्वार्त्ति स्वरभेदारुचि ज्वरैरिति तु कस्यचित्तन्त्रस्य षड्रूपाणि माधवेन लिखितानि॥ एतानि चैकादश षड्रूपाणि। प्रायोभावित्वादुक्तानि अन्यतमरूपपरिहाराद्रूपान्तरयोगेऽपि एकादशत्वं षट्त्वञ्च स्यादेव तथाहि चरकनिदाने एकादशरूपाणि पठित्वा चिकित्सितेऽपि [४]वेगरोधादिकारणचतुष्टयजे प्रतिकारणञ्चतुर्द्धा एकादशरूपाणि पठितानि तथा।

कासोऽंसतापो वैस्वर्य्यं ज्वरः पार्श्वशिरोरुजा।
छर्द्दनं रक्तकफयोः श्वासो वर्च्चोग्रहोऽरुचिः॥
रूपाण्येकादशैतानि यक्ष्मणः षडिमानि च।
कासो ज्वरः पार्श्वशूलं स्वरवर्च्चोग्रहोऽरुचिरिति॥

(४) वेगरोधादिति। वेगरोधादिकारणचतुष्टयाज्जाते यक्ष्मणि प्रतिकारणं प्रत्येककारणभेदेन चतुर्द्धा चतुःप्रकारेणैव एकादशरूपाणि पठितानीत्यर्थः॥